UNIVERSITY OF WISCONSIN - MADISON
LIBRARY

955
B

# BHĀRATĪYA VIDYĀ

A quarterly research organ of the Bhavan on all subjects connected with Indian Culture

RECEIVED
MAY 4 1977
UNIV. WIS. LIBRARY

VOLUME XXXIII : Nos. 1 to 4

1973

Editors:

PROFESSOR JAYANTKRISHNA H. DAVE, M.A., LL.B.
PROFESSOR S. A. UPADHYAYA, M.A.

BHARATIYA VIDYA BHAVAN

BOMBAY-400 007

*Issued in July 1976*

# EDITORIAL COMMITTEE

**Prof. J. H. Dave** | **Prof. S. A. Upadhyaya**

**Dr. A. K. Majumdar**


## CONTENTS


Page

श्री चिद्विलासमुनिविरचित : शङ्करविजयविलास :
—Edited by *Dr. Antarkar;* Department of Sanskrit, Khalsa College, Bombay-19 .. .. .. .. .. 1

Acārya Īśvarasena: A Historical and Philosophical Study —*Dr. Shrinivas Shastri,* Department of Sanskrit, Kurukshetra University, Kurukshetra .. .. .. 93

Observations in Trivikrama's Treatment of Deśya Words —*Dr. K. V. Apte,* Department of Sanskrit, Willingdon College, Sangli .. .. .. .. .. .. 100

Mahmūd Ghaznavi's Futile Raids on Kashmir—*Dr. K. S. Saxena,* Lucknow-4 .. .. .. .. .. 108

Book Reviews: .. .. .. .. .. .. 114

(1) Roth Gustav (Ed.), *Bhiksuni-Vinaya: Manual of Discipline for Buddhist Nuns;* by Dr. Mahesh Mehta

(2) Ranade, R. D., *Vedanta: The Culmination of Indian* Thought; by Dr. P. M. Upadhye


# श्रीचिद्विलासमुनिविरचितः
# शङ्करविजयविलासः ॥

*Edited By*

Dr. W. R. ANTARKAR

V655

# INTRODUCTION

The next i.e. the 4th biography of Śaṅkara to be published is Śaṅkara Vijaya Vilāsa by Cidvilāsa Yati a/s Muni. The text has been based on the ms. thereof procured from the Saṅkeśvara Mutt by the late Shri Athlye. We have also used three other mss. of this work, procured from different libraries as follows:

(A) Ms. 67423 (20 I 50 आ 170) from the Adyar Mss. Library, Adyar, Madras. This is an incomplete ms. and breaks off after st. 19 of ch. VI, in the midst of Śaṅkara's encounter with the followers of the Sun. There is practically no variation in the number of stanzas.

(B) Transcript into Devanāgarī of an edition of this work in Grantha script, printed and published as far back as 1876 at Madras by Vāvillu Rāmasāmi Śāstrī. The transcript was prepared for us by the Adyar Library, Madras. It contains the complete work in 32 chapters with practically the same number of stanzas as the basic one.

(C) Transcript into Devanāgarī from a ms. in Tamil, belonging to the British Museum, London, No. P.S. 103219. This ms. also is complete in 32 chapters, without any variation in the number of stanzas. It adds at the end ch. 16 from an old work called *Śivarahasya*. The chapter gives a summary of the main incidents of Śaṅkara's life.

(D) A micro-film copy of a ms. in the Nandināgarī script was received from the India Office Library, London (Mackenzie Collection, II: 19/No. 5962). There was, however, no one to read that script and even when one became available, the incidental charges proved to be prohibitively high (about Rs. 600/-) and hence the idea of utilising this micro-film had to be abandoned.

Among the three later mss., there is greater agreement between B and C than between A and B or between A and C. Most of the variations noted in the foot-notes will be found to be not very significant. Those that were obviously felt to be wrong have been ignored altogether. Where the variations were common to all three and also appeared to give the correct readings, those in the original

text have been actually altered in the body of the text. In the other cases, the variants, though common to all three, have simply been shown in the foot-notes accordingly.

The main object in comparing these 4 mss. was to ascertain whether there was any substantial difference in the version of the work under consideration but none was found to exist. Even the number of chapters and the stanzas in those chapters was found to be almost without any variation.

B reveals a peculiarity of language. It generally reads द्य for ठ्य (21 : 25), त्रया for त्रयो (14 : 29), ब्र for भ्र (2 : 17), सेवधि for शेवधि (8 : 9 & 48; 10 : 1) and so on. The first and the last occur in C also.

*The Author:* Beyond the facts that the author of the work is called Cidvilāsa Yati or Muni and that he has a devoted disciple Vijñānakanda, to whom he is recounting the life-story of Śaṅkara at his own instance, a portion of which he used to recite or read out every day, we know nothing about the author of this work. The name is given as such in the colophons at the end of different chapters and in the body of the work also as the narrator of the story.

*Date:* There is no definite clue to the date of the author. The author seems to follow Citsukha, a very old biographer of Śaṅkara, more than he follows others and to that extent, the version that he gives, appears to be more natural and older than those of Mādhava (1650 A.D. to 1800 A.D.) and his followers. He seems to be older than Rāja. Dīxit (about 1630 A.D.) and even Tiru. Dīxit (16th cent. A.D.). Beyond this, we are unable to say anything about the date of Cidvilāsa.

It is worth noting that the work mentions the names of the following five kings:

(1) Bhadrasena of Rudrākhya-nagar, near Prayāg—ch. 16.

(2) Vīrasena near the bank of the Tungabhadrā river, Śṛṅgerī Mutt—ch. 24.

(3) Rājasena, king of Kāñcī—ch. 25.

(4) Bhojasingh, king of Cidambar—ch. 26 and ch. 27.

(5) Ratnasingh, king of Badarī—ch. 31.

(6) Rāmarāja of Anantaśayana—ch. 28.



It has not been possible, however, to identify these kings or their dates in history and hence to decide what importance to attach to these references. Hence, no conclusion as to the date of Cidvilāsa can be drawn from the same.

*Nature of the work:* The work contains 32 chapters in the form of a conversation between the author Cidvilāsa and his disciple Vijñānakanda. The conversation refers to the author's practice of reading every day a portion of Śaṅkara's life. The work is said to have been undertaken at the disciple's request to narrate the life in full, which the author agrees to do, just as he has received it from his own Guru.

Mr. Bodas says that Cidvilāsa, like Vidyaranya (i.e. Mādhavācārya) belongs to the Śṛṅgerī tradition but beyond a very few points of agreement between the two writers, like Śaṅkara's passing away at Badarī, there is not much in common between them. In fact, the points of difference are far more than these points of agreement.

Similarly, the Late Mr. T. S. Nārāyaṇa Śāstrī says that Cidvilāsa follows the work of Citsukha. In the absence of the latter, it is not possible to accept or to reject this statement. But from what we know about the version of Cit, from Śāstrī, the points of difference between the two are quite many. We may, therefore, qualify the remark to mean that Cidvilāsa follows and conforms to Citsukha more than the rest of the biographers, so as to make it acceptable. He reminds us of Citsukha oftener than the rest and thus, claims better attention from us than the other biographers.

The first chapter summarises the main incidents of Śaṅkara's life. The last chapter is only a फलश्रुति pure and simple. The biography proper is contained in the remaining 30 chapters. Chapters 21, 22 and 23 have no direct bearing on the story of Śaṅkara's life. They contain a poetic description of the विभाण्डक तपोवन, the various Āśramas round about and the story of the sage Vibhāṇḍaka.

A few peculiarities in this version of Sankara's life may be noted as follows:

(1) Śaṅkara met Kumārila Bhaṭṭa in Ruddhanagar near Prayāg and Maṇḍana-miśra in Kāshmir.

(2) Śaṅkara ascended the Sarvajña-pīṭha at Kāñcī.

(3) Śivaguru himself performed Śaṅkara's thread-ceremony (उपनयन) in his fifth year and was contemplating his marriage. Śaṅkara knew that his father's end was near and hence kept quiet. Śaṅkara performed his obsequies when he passed away.

(4) Śaṅkara entered the cave of Dattātreya i.e. passed away at Kedāra in the Himālayas.

*Style:* The work is entirely in verse and has been written throughout in the Purānic style—of beginning and concluding the chapters and of introducing the new topics. Otherwise, the narration is fairly lucid, straightforward and almost matter-of-fact. The description of Govindamuni (8 : 45, 46) is one of the very few exceptions of poetic quality in the narration. Still, however, the writing does not become dry. It makes a fairly interesting reading. The chapters are never too lengthy, so as to tire the reader and tax his patience.

The major portion of the work has been written in one metre, which changes in the concluding stanzas and rarely in the introductory ones. The variety of metres also is not very wide, Anuṣṭubh being more common than the others. Ch. 12 is written in two metres, Indravajrā and Upendravajrā, the last stanza being in the Āryā metre. A slight mixture of metres is to be seen in some other chapters also. The other metres used are Śārdūlavikrīḍita (I : 2, 25), Śikhariṇī (II : 65), Sragdharā (III : 52), Vasantatilakā (IV : 54, V : 64, XII : 22, 23), Upajāti (IX : 54) and so on. The metres will be found to be of quite common occurrence.

A peculiarity of Cid.'s writing seems to be an occasional change of metre within the same stanza. We may note a few examples:

(1) IV : 55—metre in the first line is different.

(2) V : 65—1st half—Śārdūlavikrīḍita; 2nd half—Sragdharā.

(3) XIII : 22—1st half—Indravajrā; 2nd half—Vasantatilakā.

(4) XIII : 23—1st half—Upendravajrā; 2nd half—Indravajrā.

(5) XIII : 36—1st line—Indravajrā; the other three lines in Vasantatilakā.

We find a few forms also peculiarly used, giving us somewhat symmetrical or parallel constructions. Thus, there is a continuous use of gerunds first and then the verbs in XXII : 18 and 24 to 29. Similarly, there are verbal nouns like दाता, उद्धर्ता, कर्ता &c. used in succession as at II : 26, 27, 28 and verbal participles like तपस्यन्तो स्नान्तो, ध्याचंन्तों, अभ्यर्चयन्तो as at II :. 34, 36, 37. But such phenomena are very rare and do not introduce any artificiality or sense of effort in the writing.



Musical quality is also found in the jingling assonance in some stanzas or lines as follows:

1) माधवीगुञ्जपुञ्जान्तमञ्जुसिञ्जन्मधुव्रताम। VIII:41
2) तुङ्गातरङ्गपरिरञ्जितपार्श्वभागम्। XXX:1
3) अङ्गसङ्गतविपद्भयभङ्गे। तुङ्गमङ्गलनिरर्गलसङ्गे। ऋष्यशृङ्गमुनि॥ XXI:23
4) (वाणी स्वयं कल्पिततुङ्गभद्रा)। सरिच्च सा सङ्गततुङ्गभद्रा
तदाश्रयः संभृततुङ्गभद्रः। पुण्यां धरण्यां सुकृतां समाजः॥ XXI:34
5) तुङ्गा सरित्क्षीरतरङ्गसङ्गा। XXX:39:d

There are a few attempts at Alliteration also as in I : 2 : d, I : 5 : c, II : 66 : b, VI : 15, VII : 42, IX : 56, XI : 41 d, XVI : 50, XXXII : 9 and so on.

The poet uses very few figures of sense but he seems to be rather fond of Simile, of which we have many examples e.g. V: 30, 31, 32, 38, 39; VI : 1, VII : 20 &c. Metaphors and fancies are quite casual and rare. We have, however, a few specimens of good stanzas and epigrams. Here are a few examples:

1) स्वतोऽस्य निर्मला प्रज्ञा कि पुनः शास्त्रनिर्मला। क्षीरं निसर्गतः स्वादु कथं स्याच्छर्करान्वितम्॥ VII:26
2) जगत्संरक्षणायैव ध्वान्तध्वान्तनिवृत्तये। चरन्त्येव महात्मानस्तादृशा धरणीतले॥ IX:496 & 50a;
3) विधूय पापपटलं यया पश्यति तत्पदम्। साऽपि विद्या महेशस्य नियोगयशर्वर्तिनो॥ XXX:46.

As said already, however, all these and such embellishments of language have been used by the poet very sparingly, his principal interest being to narrate the life-story of Śaṅkara and that he has done quite well.

---

*Abbreviations:*

Cid.—Cidvilāsa
Rāja. D.—Rājacūdamani Dīxit
Tiru D.—Tirumala Dīxit
Cit.—Citsukha

(a) Vide his शंकराचार्य व त्यांचा सम्प्रदाय– p. 9.
(b) Vide his 'Age of Śaṅkara', Pt. I, ch. III, p. 37, Foot Note 21.
(c) Vide our Foot Note 18: a and b to our article on Bṛhat Śaṅkara Vijaya of Cit. in the Journal of the University of Bombay, Vol. XXIX, Part 2, September 1960.
(d) *Ch. III: 38*—It is this work alone that says that the meeting of Govindamuni and Śaṅkara took place at Badarī in the Himālayas. According to all the other biographers, it took place on the banks of the Narmadā river.Gauḍapāda is said to be living at the time of this meeting. (See ch. IX: 47).
(e) *Ch. XIII*—Padmapāda's officious and overbearing attitude is quite unnecessary and without any justification. In fact, the entire account of Śaṅkara-Vyāsa meeting sounds very unnatural.
(f) Vide our Foot Note 'c' above. We have shown in our article under reference there, that stt. 12 to 20 correspond almost verbatim to stanzas in Cit.'s work.
(g) Chapters XVIII and XIX—These two chapters together narrate Śaṅkara's encounter first with Maṇḍana-miśra and then with his wife Sarasavāṇi. In this connection, we wish to observe the following:—
(i) Śaṅkara-Maṇḍana discussion seems to have been finished within an hour or so while that between Śaṅkara and 'Vāṇi continues for some weeks. The incident of Śaṅkara's binding Vāṇi by the Vanadurgā Mantra is also very queer.

(ii) Śaṅkara initiates Maṇḍana into Sannyāsa first and then engages Vāṇi in a discussion. The purpose of this is not clear. She had not challenged Śaṅkara to a discussion and Śaṅkara had come to argue with Maṇḍana and not with her. This was also not a contest of Sarvajñatva. The suggestion about their discussion is made by the poet at XVIII: 46, 47 and picked up and continued in the next chapter.

(iii) XIX: 19, 20—How long did Śaṅkara take to cover so many places along with his disciples? The total period available to him was one month only.

(iv) XIX: 46, 47—What were the disciples doing when the minister dragged the body of Śaṅkara and threw it into the fire? Could they not resist or at least protest in any way? They started for the king's palace only after the body was thrown into the fire. How did it remain in tact till Śaṅkara returned to it at the end of his awakening by the disciples?

(v) Why did Śaṅkara need an awakening and also to search for his body? What about his सर्वज्ञत्व ब्रह्मज्ञान and

(vi) That Vāṇī should have been kept standing in mid-air throughout the period is almost outrageously ridiculous.

(h) *XXIX: 13, 14, 20*—This chapter describes Śaṅkara's encounter with what appears from their arguments to be materialists—the Cārvākas or the Lokāyatikas. The name of these people has, however, been given as Ārhats or Saugatas and they have further been identified with the Buddhists. The practices of the Jains have been confounded with the doctrines of the materialists and both have been equated with the Buddhists. Thus, all these four-Ārhats, Saugatas, Buddhists and the Cārvākas have been rolled into one. It is to be noted that ch. II mentions the various religious sects prevalent at the time of Śaṅkara's birth but there is no reference either to the Jains or to the Buddists.

(i) *Ch. XXXI-stt. 32, 34*—Queerly enough, there is a reference to Śaṅkara's body shattered by old age. (जराजर्जरविग्रह) and his being an old man (स्थविर).

# ॥अथ श्रीचिद्विलासमुनिविरचितः शङ्करविजयविलासः ॥

## श्रीगणेशाय नमः।

अस्तु स्वस्तिकृते वस्तु निस्तुलानन्दनिर्भरम्। वस्तु वा शाङ्करं नस्तादीप्सितार्थसमृद्धये ॥१॥

कीरं वाचयितुं किलेव दधती हस्ताम्बुजे पुस्तकम्।
विज्ञानाममृतं प्रदातुमिव तं नित्यं करे बिभ्रती ॥
अक्षस्रग्वलयं करेण गणनां कर्तुं च दातुं वरान्।
सास्तादस्तसमस्तदोषनिचया वागीश्वरी श्रेयसे ॥२॥

अदभ्रशारदाभ्राभां शारदां दधतीं भजे। कायकान्तिजितां पाणौ कलामिव विधोः सुधाम् ॥३॥

भास्वानिव तमोवृत्तिं यं नतिर्विघ्नसंततिम्। निर्वर्तयति तं नित्यं वन्दे स्तम्बे[1]रमाननम् ॥४॥

लीलाः पञ्च च विंशतिं जगति यः सन्धाय लोका[2] तव।
हृनालास्ये[3] च मुदा चतुर्भिरधिकां षष्टिं च ता दर्शयन्।
शिष्टानुग्रहदुष्टनिग्रहविधौ बुद्धौ निबद्धादरः।
कल्याणानि करोतु नः [4]पदनमद्विद्याधरः शङ्करः ॥५॥

## विज्ञानकन्दः

श्रीमन् गुरो देशिकेन्द्र परिज्ञा[5]ताखिलागम। ब्रह्मसूत्रार्थविज्ञानविच्छिन्नद्वैतभावन ॥६॥
श्रीमद्गुरुकृपाप्राप्तपारम्पर्यक्रमोदधे। शङ्कराचार्यचरितं भक्तितः पठ्यते त्वया ॥७॥
पवित्रं तच्चरित्रं तु श्रोतुं मेऽस्ति कुतूहलम्। अन्तेवासिनि मयी[6]षदनुकम्पा तवास्ति चेत् ॥८॥
कलितापोपशमनं स्मृतिमात्रेण धीमताम्। तत्त्वज्ञानप्रदमिति बहुशः कथितं पुरा ॥९॥
आविर्भावं समारभ्य त[7]द्वृत्तान्तमशेषतः। जगतीमवितुं जेतुं दुर्मतान्यखिलान्यपि ॥१०॥
शम्भोः कृतावतारस्य शङ्कराचार्यसंज्ञया। चिद्विलास[7a] यतिश्रेष्ठ शिष्यहृन्मोहभास्कर ॥११॥
कथयाद्य कलावासस्त्वमिन्दुरिव भूतले। अन्तेवासी[8] प्रियो यस्माच्छ्रीगुरावतिभक्तिमान् ॥१२॥

## श्रीचिद्विलासः

साधु पृष्टं त्वया प्राज्ञ गुरुभक्तिकृतादर। सहस्रास्योऽपि तद्वक्तुं लिखितुं वा दिवाकरः ॥१३॥
न शक्नोति किमेकास्यो ब्रूयां विस्तरतः कथम्। प्रश्नेनानेन तुष्टोऽस्मि यज्ज्ञातं मद्गुरोर्मुखात् ॥१४॥
तत्ते प्रियाय शिष्याय वक्ष्यामि शृणु सादरम्। भगवत्पूज्यपादानामाविर्भावं सतां हितम् ॥१५॥
कृतोपनीतेः[8a] पञ्चाब्दे सर्वविद्यासमागमम्। मकरग्रहकालीनसंन्यासाश्रमसंभवम् ॥१६॥
बदर्यागमनं पश्चाद्गोविन्दभगवद्गुरोः। क्रमसंन्यासलाभं च व्याससूत्रार्थनिर्णयम् ॥१७॥
स्वीयं भाष्यं बोधयितुं सच्छिष्याणां परिग्रहम्। स्नातुं सुरतटिन्याश्च पापहारिणि वारिणि ॥१८॥

---

1. स्तम्भे° (A) 2. लोकानवन्। (A) (B) (C); 3. हालास्येश (A), (C); 4. नो मदन° (A); 5. परिध्याता (A) 6. मय्येवा अनु° (A); °मय्ये तदनु°। (B), (C); 7. सद्वृत्तान्त°। (A), (B); 7a. चिद्विलास मतिश्रेष्ठं (B) 8. अन्तेवासिप्रियो (A), (C); 8a. कृतोपनीतः। (B)

शिष्यैः सहैव गमनं स्वीयभाष्यार्थचिन्तकैः । पुण्यश्रेण्यां त्रिवेण्यां च भूयः स्नात्वा निवेशनम् ।।१९।।
पूजयित्वा च विश्वेशं पशुपाशविमोचकम् । पाराशर्येण संल्लापं[8b] सहैवाऽम्भोजजन्मना ।।२०।।
प्रचारणाय भाष्यस्य सर्वत्र जगतीतले । तदर्थंश्रुतितुष्टाभ्यां ताभ्यामायुर्विवर्धनम् ।।२१।।
रु[9]द्धाभिधनगर्यां च भट्टाचार्यस्य दर्शनम् । काश्मीरदेशे मच्छिष्यो वेदवेदाङ्गपारगः ।।२२।।
श्रीमान्मण्डनमिश्रार्यो विद्यते यतिपुङ्गव । यद्वीथिका[9a]गृहद्वारकूजत्कीर[9b]व्रजैरपि ।।२३।।
वाङ्मुखं संमुखीनैर्यैः क्रियते शास्त्रसंततेः । यदङ्गनाऽभवत्साक्षाद्गिरां देवी पुरा किल ।।२४।।
दुर्वासोमुनिना शप्ता किञ्चित्कारणवैभवात् । विवाद्य तेन शास्त्रेषु[9c] यदि शक्नोषि तं जय ।।२५।।
इत्थं निशाम्य तद्वाक्यं[9d] भट्टाचार्यविपश्चितः । शिष्यैः साकं तत्र गत्वा जित्वा मण्डनमिश्रकम् ।। २६ ।।
तद्धर्मदारां निर्जेतुं कायान्तरनिवेशनम् । कलाशास्त्रपरिज्ञानं स्वशिष्यपरिबोधनात् ।। २७ ।।
कोटरस्थापितं देहं गत्वा दृष्ट्वा स देशिकः । चितावारोपिते देहे प्रविश्य परितापिनि ।। २८ ।।
साक्षात्कृतिं नृसिंहस्य स्तोत्रेणानेन तुष्यतः । ततो वाणीं विनिर्जित्य तया साकं जगद्गुरोः ।। २९ ।।
श्रीमच्छृङ्गपुराभ्यर्णगमनं शिष्यसंयुतम् । विभाण्डकमुनेर्यत्र भासते दिव्यमाश्रमम् ।। ३० ।।
तुङ्गभद्रातरङ्गौघवारिताशेषकल्मषम् । मलहानिकरो नाम देवो यत्र विराजते ।। ३१ ।।
देव्याः संस्थापनं तत्र निगमोक्तविधानतः । निर्माय श्रीमठं तत्र विशालं सुविनिर्मलम् ।। ३२ ।।
देशिकेन्द्रः सुरेशाख्यं नानाविद्याविशारदम् । शिष्यं संस्थाप्य तत्रैकं काञ्चीनगरमाविशत् ।। ३३ ।।
तत्र निर्माय नगरीं[10] श्रीचक्रं स्थाप्य शास्त्रतः । कामाक्षीमपि संस्थाप्य दुर्मतानां निर्बर्हणम् ।। ३४ ।।
सर्वज्ञपीठसंस्थानं विजित्य द्वैतवादिनः । ततश्चिदम्बरक्षेत्रगमनं देशिकेशितुः ।। ३५ ।।
तत्राश्रितानां विप्राणां सौराणां मतखण्डनम् । सेतुस्नानं समुद्दिश्य शिष्यैः सह गतिं गुरोः ।। ३६ ।।
तत्रैव भैरवीयाणां खण्डनं दुर्मतस्य च । ततः क्रमाद्वक्रतुण्डपुरीं प्राप जगद्गुरुः ।। ३७ ।।
गाणापतं मतं तत्र खण्डयित्वा सभामुखे । अनन्तशयनं गत्वा खण्डयन्वैष्णवं मतम् ।। ३८ ।।
अवाप वासुकिक्षेत्रं कुमारो यत्र विद्यते । स्नात्वा कुमारधारायां तरङ्गिण्यां स तापसः ।। ३९ ।।
सुब्रह्मण्यं समभ्यर्च्य सर्वरोगभयापहम् । ततो गृडपुरीं लब्ध्वा बौद्धं[11] ध्वान्तनिबर्हणम् ।। ४० ।।
ततो गोकर्णगमनं द्रष्टुं देवं महाबलम् । स्नात्वा रत्नाकरे भूयः कोटितीर्थनिषेवणम् ।। ४१ ।।
महाबलेशमभ्यर्च्य लब्ध्वाऽनुज्ञां महेश्वरात् । जगन्नाथस्य गमनं पुण्यक्षेत्रस्य तत्परम् ।। ४२ ।।
अन्तेवासिनिवासार्थं विनिर्मायाश्रमं पुनः । तत्र[11a] छात्रं प्रतिष्ठाप्य परिज्ञाताखिलागमम् ।। ४३ ।।
ततश्चोज्जयिनीं प्राप्य नगरीं देशिकेशितुः । शाक्तानामतिदृप्तानां तन्मतस्य च खण्डनम् ।। ४४ ।।
द्वारकागमनं पश्चात्तत्रैकं मठनिर्मितम्[12] । तत्र शिष्यं प्रतिष्ठाप्य देशिकेन्द्रो मुदान्वितः ।। ४५ ।।
मायापुरीं समासाद्य षण्मतस्थापनं ततः । बदर्यागमनं पश्चात्तत्रैकं[13] मठनिर्मितम्[13] ।। ४६ ।।
तोटकाचार्यनामानं शिष्यं संस्थाप्य यत्नतः । तत्रैव सुचिरं स्थित्वा दत्तात्रेयस्य दर्शनम् ।। ४७ ।।
भाष्यार्थबोधतुष्टस्य विष्णोः साक्षात्कृतिं[13a] ततः । दत्तात्रेयगुहाद्वारात्कैलासगमनं गुरोः एतत्सर्वं
समासेन वक्ष्यामि शृणुताखिलाः[14] ।। ४८ ।।

8b. सल्लापं । (B), (C); 9. सद्राभिध° (A); 9a. यद्वेदिका । (B); 9b. प्रजै° (B); 9c. शास्त्रौघ° । (B); 9d. तद्वृत्तं । (C); 10. नगरे (A) 11. बौद्धध्वान्त° (A), (B), (C); 11a. तत्तच्छास्त्रं । (B) 12. °निर्मितिम् । (A), (B); 13. तत्रैकां मठनिर्मितिम् । (A), (B), 13a. साक्षात्कृतिस्ततः । (B), (C); 14. शृणु निश्चलः । (A), (B), (C)



## विज्ञानकन्द :

आम्नायोपनिषद्विचारकलनाकूपारनिर्मन्थना[14a] ।
द्वैताद्वैतसुरामृते समुदिते हित्वा सुरामादिमाम् ।
अद्वैतामृतपानतः प्रतिकलं हृष्यन्मनोव्या[14a]वृते ।
भूयस्ते प्रणतोऽस्मि तत्प्रकथय श्रीचिद्विलासादितः ।। ४९ ।।

## चिद्विलास :

जागर्त्येव भवत्सतीर्थ्यनिवहस्तीर्थे न[15] तीर्थोज्ज्वलो ।
नोदन्तश्रवणेऽभवन्मतिरहो श्रीदेशिकाधीशितुः ।
एकस्यापि च तत्तु पृच्छति भवान् धन्योऽसि पुण्यः क्षितौ ।
भक्त्या ते ह्यनुयोगतः प्रमुदितो वक्ष्यामि सद्यः शृणु ।। ५० ।।

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीचिद्विलासयतीन्द्रविज्ञानकन्दतपोधनेन्द्रसंवादे शङ्करविजयविलासे प्रथमोऽध्यायः ।।

14a. °नात् (C); 14b. °मनो व्याप्यते । (C); 15. सतीर्थोज्ज्वलो । (A); तीर्थेन । (B)

# ॥ अथ द्वितीयोऽध्यायः ॥

## श्रीचिद्विलासः

कदाचिन्नारदः श्रीमान् त्रिलोकज्ञो विशालधीः । पितुराज्ञां पुरस्कृत्य त्रिषु लोकेषु पर्यटन् ॥ १ ॥
इन्द्रोपेन्द्रधनेन्द्राग्निमरुद्वरुणभास्वताम् । गिरीशहरिदीशानां लोकान् पश्यन् क्रमेण सः ॥ २ ॥
रसातलमवापाथ भोगिराजविराजितम् । नारदः पारदो लोके भक्तानामघसन्तते : ॥ ३ ॥
फणामणिसहस्रोद्यत्कान्तिसंततसंनते:[1] । निवारितान्धतमसं जागरूकाखिलोरगम्[1a] ॥ ४ ॥
सुधावापीसहस्रा[2]न्तः प्रफुल्लकनकाम्बुजम् । मन्दानिलपरिस्पन्दस्यन्दमानमधूलिभिः ॥ ५ ॥
रजोभिः कल्पितावालैः[2a] शाखिभिः परिशोभितम् । विचित्रकुट्टिमाट्टालनिविशत्पन्नगीगणम् ॥ ६ ॥
तत्त्वविज्ञाननिरतसमस्तभुजगव्रजम्[2b] । फणिराजस्य भवनं क्रमेणाप स तापसः ॥ ७ ॥
पूजितो वन्दितस्तेन कुर्वन् संभाषणं क्षणम्[3] । दत्वा तस्याऽशिषो भूयोऽप्यनुयान्तं निवर्त्य तम् ॥ ८ ॥
महीतलं जवेनाऽगाद्द्रष्टुं तत्रत्यदेवता :। क्षेत्राणि च विचित्राणि तीर्थानि शुभदानि च ॥ ९ ॥
पश्यन् विश्वेश्वरादीनि दैवतानि समन्ततः। स्नात्वाऽसौ[4] पुण्यतीर्थेषु कुर्वन् सन्ध्यादिकाः क्रियाः ॥१०॥
तत्र तत्र चरन् देशान् पश्यन्नेवाग्रजन्मनः । श्रुतिस्मृतिप[5]दभ्रष्टान्मिथ्याचारपरिग्रहान् ॥ ११ ॥
अद्वैतार्थापरिज्ञानविमोहितधियोऽधिकम् । द्वैतमार्गैकनिरतांश्चक्रशूलादिचिह्नितान् ॥ १२ ॥
सौरान् शाक्तान् पाशुपतान् गणेशमतगानपि । वैष्णवान् भैरवीयांश्च तत्त[6]च्चिह्नसमञ्चितान् ॥१३॥
दधीचिना गौतमेन पुरा दक्षाध्वरेऽग्रजान् । संशप्तांस्तान् कलियुगे जाता[7]नद्वैतनिन्दकान् ॥ १४ ॥
पततो[8] नरके लोकानवलोक्य क्रमेण सः । सर्वर्तुफलपुष्पाढ्यैः पादपैरुपशोभितम् ॥ १५ ॥
नदीनदतराभ्यर्णकूजत्कारण्डमण्डलम् । पर्यन्तविचरच्चारुराजहंसविराजितैः ॥ १६ ॥
कुमुदैः पुण्डरीकैश्च भ्रमद्भ्रमरसंकुलैः । वापीकूपतटाकाद्यैः परितोऽपि निषेवितम् ॥ १७ ॥
क्रीडच्चित्क्रोडसन्दष्टनालिकेलफलोदकैः । निर्यत्नर्निमितासेकैः[9] फुल्लपुंनागकेसरैः ॥ १८ ॥
आसी[9a]मदाडिमारामकूजत्कीरकिशोरकैः[9b] । रसालशिखरासीनैर्गायद्भिः कोकिलैर्वृतम् ॥ १९ ॥
उत्तालतालतरुभिर्मण्डितं परितो भृशम् । मनोभवत्रपाकारिभूरिलावण्यरञ्जितैः ॥ २० ॥
विद्वद्भिः स्थूललक्षैश्च धीरैः[9c] शूरैर्जनैर्वृतम् । गीतवादित्रलास्यादिकुशलैरङ्गनाजनैः ॥ २१ ॥
रतिकान्तितिरस्कारिसौन्दर्यैः परिवेष्टितम् । स्मृतिमात्रेण मन्त्राणां सद्यः सिद्धिप्रदायकम् ॥ २२ ॥
इक्षुभिः क्वचिदाकीर्णैः पर्वसंगतमौक्तिकैः । क्वचिद्व्रैहेयशालेयैः क्वचिन्माषैश्च कोद्रवैः ॥ २३ ॥
आढक्यैरपि चाणक्यैस्तिल्वैः सौमनसैरपि । निरन्तप्रसरत्कुल्यैः क्षेत्रैश्चित्रं समन्ततः ॥ २४ ॥
मोहनस्तम्भनाद्यानां विद्यानामङ्कुरस्थलम् । श्रुतिस्मृतीतिहासानां शास्त्रोपनिषदामपि ॥ २५ ॥
याथातथ्या[10]र्थकथनपण्डितैर्मण्डितं बुधैः । दाता भजदभीष्टानामुद्धर्ता कल्मषोदधेः ॥ २६ ॥
कर्ता त्रिजगतामेव विनेता दुष्टसम्पदः[11] । जेता दितिजजालानां[12] श्रीमान् हरिहरात्मजः ॥ २७ ॥

---

1. °संगतेः । (A), (B), (C); 1a. खिलेन्द्रियम् । (B), (C); 2. °सहप्रान्तः । (A), (B), 2a. °वाप्तैः । (B) 2b. °प्रजम् । (B) 3. मिथः । (A) 4. सौधायितीर्थेषु । (A) 5. °स्मृतिपथ° । (A), (B), (C) 6. तप्तचिन्हा° । (A) 7. जानन्° । (A) 8. पतितान् । (A) 9. निर्मितानेकैः । (A), (B) 9a. अक्षीण° । (B), (C); 9b. °कुलोत्तमैः । (B), (C) 9c. सूरिजनैः । (B) (C); 10. यथातत्त्वार्थ° । (A) 11. दुष्टसंसदः । (A), (B), (C); 12. दितिजजातानां । (A)



शास्ता समस्तविघ्नानां शास्ता विश्वैकपूजितः । यदीयां श्रियमालोक्य दिवं त्यक्त्वा भुवं गतः ॥ २८ ॥
तादृशं केरलं देशं द्रष्टुमाप स नारदः । दृष्ट्वा नत्वा च नुत्वा तं समभ्यर्च्यातिभक्तितः ॥ २९ ॥
तदनुज्ञां समासाद्य क्रमेण परितश्चरन् । सुरासुरैर्मुनिवरैः किंनरैर्भूसुरै[12a]रपि ॥ ३० ॥
पूजितः प्रत्यहं यत्र राजते वृषभाचलः । वृषभाचलेश्वरो नाम देवस्त्रैलोक्यपूजितः ॥ ३१ ॥
आविर्भूय प्रसन्नात्मा वर्तते यत्र भूभृति । चूर्णी तरङ्गिणी पुण्या विद्यते यत्समन्ततः ॥ ३२ ॥
कालटीति प्रति[13]ख्यातं क्रमेण क्षेत्रमाप सः । तत्राऽपश्यन्मुनिश्रेष्ठो नारदः श्रीविशारदः ॥ ३३ ॥
तपस्यन्तौ यतौ दान्तौ भूतिरुद्राक्षधारिणौ । कदाचिद्रचिताहारौ नीराहारौ कदाचन ॥ ३४ ॥
कदाचिच्च फलाहारौ पर्णाहारौ कदाचन । कदाचिन्मारुताहारौ निराहारौ कदाचन ॥ ३५ ॥
स्नातौ[13a] शीतेऽपि सलिले पञ्चाग्निपरितापिनौ । वृषाचलेशं सततं ध्यायन्तौ मानसाम्बुजे ॥३६॥
अभ्यर्चयन्तौ नितरां जायासावपि नित्यशः । द्विजान्सहस्र[14]मिष्टान्नैः संतर्प्य श्रुतिपारगान् ॥३७॥
वैश्वदेवबलिं कृत्वा परिगृह्य द्विजाशिषः । तदनुज्ञाबलेनेषदश्नन्तौ तौ फलादिकम् ॥ ३८ ॥
तत्र तौ दम्पती दृष्ट्वा पप्रच्छोदन्तमेतयोः । ततः प्रोवाच विप्रोऽसौ पृच्छन्तं नारदं प्रति ॥ ३९ ॥
नाम्ना शिवगुरुर्यज्वेत्याख्यातोऽहं महीतले । आर्याख्या मम भार्येयं निरपत्या[15]च दुःखिता ॥ ४० ॥
आस्तां तत्तु किमुद्दिश्य तपस्तीव्रं करोष्यहो । भगवन् कथ्यतां तत्त्वं तत्रोपायो विधीयते ॥ ४१ ॥
इत्युक्तो मुनिना यज्वा प्रत्युवाच स नारदम् । अनपत्यतया खिन्नमनसा चिन्तिते सति ॥ ४२ ॥
रहस्युवाच भार्या मे चरित्रमुपमन्युजम् । श्रुत्वा तद्वचनं सत्यमिति निश्चित्य तत्त्ववित् ॥ ४३ ॥
शिवादन्यो न पुत्राणां दाता भवति भूतले । इति निश्चित्य मनसि महेशं शरणं गतौ ॥ ४४ ॥
इति व्यजिज्ञपत्सोऽपि वृत्तान्तं स्वीयमादितः । तच्छ्रुत्वा नारदो भूयस्तत्र तत्र चरन् भुवि ॥ ४५ ॥
क्रमेण त्रिदिवं प्राप वक्तुं तद्ब्रह्मणेऽखिलम् । सत्यलोकमवापाथ कश्यपादिपरिष्कृतम् ॥ ४६ ॥
व्याससूत्रार्थनिष्कृष्टशुद्धाद्वैतप्रसंगिभिः । चतुःषष्टिकलालापनिरन्तरकृतादरैः[16] ॥ ४७ ॥
काणादपाणिनीयादिशास्त्राब्धिकृतवाङ्मुखैः । आकिशोरकथालापमृषारहितमानसैः ॥ ४८ ॥
भूतिरुद्राक्षमालाभिः समलङ्कृतमस्तकैः[17] । रजस्तमो विसृज्यैव सत्त्वेनैव विनिर्मितैः ॥ ४९ ॥
तापसैरभितः[18] सिद्धैश्चारणैरावृतान्तरम् । चतुर्भिः परितो वेदैः स्तूयमानमहर्निशम् ॥ ५० ॥
शान्तैर्दान्तैर्भृशं कान्तैर्नरनारीजनैर्वृतम् । एकैकेन मुखेनाऽर्थोऽन[19]न्येनाम्नायमण्डलीम् ॥ ५१ ॥
शास्त्राणि निखिलान्यद्धा वाचयन्तं तदन्यतः । एकेनोपनिषत्तत्त्वं वदन्तं विस्तरात्क्रमात् ॥ ५२ ॥
अक्षस्रवकारकाभ्राजत्करपल्लवतल्लजम् । सरस्वत्या च सावित्र्या गायत्र्या च विशोभितम् ॥ ५३ ॥
रत्नसिंहासनासीनं प्रणम्य कमलोद्भवम् । स्तुत्वा स्तोत्रैर्बहुविधैः कृताञ्जलिपुटोऽग्रतः ॥ ५४ ॥
उदन्तं वक्तुमारेभे मुनिः स तपतांवरः। नारदः-लोकाः सर्वे दिगीशानां [20]मयाद्य परिलोकिताः[21] ॥५५॥
तत्रत्योदन्तमखिलं जानात्येव भवानपि । विधे विधिस्त्वया सृष्टः सर्वत्र समवृश्यत ॥ ५६ ॥
भूलोकस्य तु वृत्तान्तं शृणु श्रुतिविनिन्दितम् । केचिच्छम्भुरता नित्यं केचिद्विष्णुपरायणाः ॥ ५७ ॥
भैरवोपासका केचिद्विघ्नेशमतगाः परे । केचिच्छक्तिमतस्थाश्च केचित्कामपरायणाः ॥ ५८ ॥
केचित्सौरमतस्थाश्च निशानाथरताः[22] परे । दिक्पालोपासकाः केचिद्ग्रहताराद्युपासकाः ॥ ५९ ॥

---

12a. °भासुरै° । (B) 13. प्रविख्यातम् । (A) 13a. स्नान्तौ । (C) 14. सहस्रान् मृष्टान्नैः । (A), (B) (सहस्रं) । (B), (C); 15. अनपत्या । (A) नारदः । () 16. निरन्तकलितादरैः । (A), (B), (C); 17. °लंकृतविग्रहै । (A), (B), (C) 18. तापसैरपि तैः । (A) 19. मुखेनार्थमन्येना° । (A) 20. दिगांशानाः । (A) 21. प्रविलोकिताः । (A), (C) 22. निशानाथपरायणाः । (A)

केचिद्गन्धर्वसाध्यादीन् भूतवेतालगाः परे। एवं नानाप्रभेदाख्या नृणां वृत्तिर्यथेप्सिता ॥ ६० ॥
स्वाश्रितानि मतान्येते गृणन्ति[23] श्रुतिभाञ्ज्यपि। निःश्रेयसविधायीनीत्येवं जानन्त्यबुद्धयः ॥६१॥
अन्योन्यमत्सरग्रस्ताः परस्परजयैषिणः। स्वेच्छाकलितचिन्हानि धारयन्ति रुषान्विताः ॥ ६२ ॥
आत्मज्ञानविहीनास्ते हित्वा ब्रह्म सनातनम्। अजानन्तः परं मर्त्याः सर्वे पाख[23a]ण्डतां ययुः ॥६३॥
अद्वैतार्थापरिज्ञानात्पतन्ति नरकेऽशुचौ। तेषामुद्धरणायैष[23b] उपायः परिचिन्त्यताम् ॥ ६४ ॥

विज्ञाप्येत्थं महितलगतोदन्तमाद्यन्तमस्मै।
धात्रे पित्रे स तु मुनिवरो नारदो भक्तिनम्रः।
तस्थौ किञ्चिद्दुरि कमलभूः सोऽपि संचिन्तयन्द्राक्।
आसामासक्षणमिव ततो निश्चिकायाऽत्र[23c] कृत्यम् ॥ ६५ ॥

## विज्ञानकन्दः

वृत्तं शङ्करदेशिकेन्द्रपदयोः स्वादु स्वतः पावनम्
वाणी ते मधुराधरीकृतसुधाधारा च धीराऽपि च।
पायंपायमिमं कथामृतरसं तृप्तोऽप्यतृप्तोऽस्म्यहम्
भूयः संदिश चिद्विलास तदनुस्यूतं प्रणम्राय मे ॥ ६६ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीचिद्विलासयतीन्द्रविज्ञानकन्दतपोधनेन्द्रसंवादे शङ्करविजयविलासे नारदवृत्तान्तकथनं नाम द्वितीयोऽध्यायः ॥

23. गृण्हन्ति। (A) 23a. पाषण्डतां। (B), (C) 23b. °येवमु°। (B) 23c. °यात्मकृत्यम्। (B), (C)



# ॥ अथ तृतीयोऽध्यायः ॥

## चिद्विलासः

विज्ञानकंद भवता सावधानेन चेतसा। श्रूयतां कथयाम्यद्य शास्त्र[1]जातशिरोमणे ॥ १ ॥
इत्थं निशम्य वृत्तान्तं भूलोकस्याम्बुजासनः। सह तेनैव मुनिना कैलासाचलमाप सः ॥ २ ॥
निवेदितुं शिवायेदं विज्ञाय स्वेन दुष्करम्। राजते यत्र सततं शिवया सह शङ्करः ॥ ३ ॥
इन्द्राग्निपाशिवित्तेशमरुभिर्ऋतिभिः क्वचित्। निरुद्धैर्नन्दिकेशेन द्वारोपान्तमहीतले ॥ ४ ॥
निषण्णैः सुविषण्णैश्च सवाहन[1a]परिच्छदैः। समन्वित[1b]महेशानपददर्शनकाङ्क्षिभिः ॥ ५ ॥
समावृतं[1b] ततोऽन्यत्र[1c] गायद्भिः किंनरीगणैः। विद्याधरैश्चारणैश्च सिद्धैः साध्यैः समावृतम् ॥६॥
स्वीयच्छायासमुद्योतद्योतिताशेषदिक्तरम्। शिखरैः कुमुदाकारैर्वितत्य व्योमसंस्थितम् ॥ ७ ॥
सलीललास्यकुशलैरुर्वश्यादिभिरावृतम्। रुद्राक्षमालाभरणैः कश्यपादितपोधनैः ॥ ८ ॥
स्तुवद्भिर्गिरिशं स्तोत्रैः पवित्रैरञ्चितं क्वचित्। गायन्त्या[2] च सरस्वत्या विपञ्च्या विश्वहृद्यया ॥९॥
श्रिया च चामरासक्तहस्तया समलङ्कृतम्। मर्दल[3]ध्वाननोद्युक्तनालीकेक्षणलक्षितम्[3a] ॥ १० ॥
स्वकीयोदन्तकथनसमागतधरावृतम्। घण्टाकर्णविरूपाक्षरिटिभृङ्गिमुखैर्गणैः ॥ ११ ॥
तृणीकृतदिगीशानसम्पद्भिरभितो वृतम्। नवरत्नकृतैरेव प्राकारैर्नवभिः शुभम् ॥ १२ ॥
प्रासा[4]दगोपुराट्टालैः स्फाटिकैः सुविचित्रितम्। पीयूषवापिकाक्रोडत्क्रीडत्कादम्बमण्डलम् ॥ १३ ॥
ब्रह्मसूत्रौघतत्त्वार्थसमाकर्णनलालसैः। दधीचिगौतमाद्यैश्च तापसैः परिवेष्टितम् ॥ १४ ॥
नाकौ को ललनावक्त्रदर्शनामलदर्पणम्। समन्ताच्छ्री[5]फलोद्यानसुखासीनबुधव्रजम् ॥ १५ ॥
जाम्बूनदवितर्द्यन्तर्निविष्टैरमरीजनैः। अम्बिकालोकनायत्तचित्तैरत्यन्तशोभनम् ॥ १६ ॥
रसालशिख[6]रारामकूजत्कोकिलसंकुलम्। कुन्दमन्दारपुंनागजातीचम्पककेसरैः ॥ १७ ॥
ललितं त्रिदशस्रोतःप्रवाहेण समन्ततः। कीरशारीमृदुस्वाननान्दीकरदिगन्तरम् ॥ १८ ॥
स्वोदन्तं नन्दिकेशाय ज्ञापयामास पद्मभूः। सोऽपि गत्वा शिवं नत्वा स्तुत्वा चोक्त्वा विधीरितम् ॥ १९ ॥
प्रवेशयेति तस्याऽऽज्ञामासाद्य स्वर्णवेत्रभृत्। प्रावेशयत्स[7] नन्दीशो विद्येते यत्र तौ शिवौ ॥ २० ॥
रत्नसिंहासनासीनं दिव्याभरणभूषितम्। जटातटकटाहान्तर्निलीन[7a]स्वर्गनिम्नगम् ॥ २१ ॥
तत्रत्योद्वृत्तफेनाभकलाधरकलोज्ज्वलम्। फणारत्नप्रभाभास्वत्फणिराजविभूषणम् ॥ २२ ॥
भस्मोद्धूलितसर्वाङ्गं शुद्धस्फटिकसंनिभम्। पाथोजातसुहृन्मित्रवीतिहोत्रत्रिनेत्रकम् ॥ २३ ॥
चतुर्भिः स्वकराम्भोजैरेणं परशुमुज्ज्वलम्। निर्भया[8]न्प्रणतान् कर्तुमक्षय्यं[9] वरमन्वहम् ॥ २४ ॥
दातुं च तेषां दधतमूर्मिकादिपरिष्कृतैः[9a]। गजाजिनसमाश्लेषविशेषोद्यत्कटीतरम् ॥ २५ ॥
दक्षाध्वरातिरौद्रेण वीरभद्रेण चैकतः। मरुत्वद्वाहिनीशानपदवीकलितौजसा ॥ २६ ॥

1. छात्र°। (A), (B), (C); 1a. सहवास°। (B) 1b. सम न्वितं महे° (C) 1b. °वृतं। (B), (C) 1c. तदन्यत्र। (B), (C) 2. गायत्र्या। (A), (B), (C); 3. मद्दल°। (A), (B), (C) 3.a °रञ्जितम्। (B), (C) 4. प्राकार°। (A) विशाल°। (B), (C); 5. सुफलो°। (A) 6. शाखिका°। (A), (B), (C); 7. °यच्च। (A) 7a. निलीनः सर्ग°। (C); 8. निर्भयं। (A) 9. °मभयं। (A), (B), (C); 9a. परिष्कृतम्। (B), (C)

तारकध्वान्तविध्वंससहस्रकिरणत्विषा । सुकुमारकुमारेण कुमारेणाद्रिजन्मनः ।। २७ ।।
सौन्दर्यजितमारेण परितः परिशोभितम् । प्रत्यूहव्यूहदु[9b]र्मोहनिवारणपटीयसा ।। २८ ।।
द्वैमातुरेण चान्यत्र भैरवेन च संगतम्[10] । सिन्धुरासुरपुष्पेषु कालान्धत्रिपुरामपि ।। २९ ।।
गायद्भिर्भविजयं शम्भोस्तुम्बुर्वाद्यैर्विराजितम् । वृषेण वृषरूपेण सुधाधारसमत्विषा ।। ३० ।।
कैलासभूभृतेवाग्रे[11] जाग्रताऽविष्कृतं सदा । वामाङ्कस्थितया लोकजनन्या मान्यरूपया ।। ३१ ।।
अनेककोटिरुद्रैश्च तत्त[11a]द्ब्रह्माण्डवासिभिः । नानाकारधरैश्चित्रैः पवित्रैश्चित्रितं पुरा ।। ३२ ।।
ब्राह्म्यादिभिर्मातृगणैरणिमादिकसिद्धिभिः । बटुकैर्माणिभद्राद्यैः क्षेत्रपालैः समावृतम् ।। ३३ ।।
मायैव यस्य सृजति[12] जगन्त्यवति[12] हन्ति च । शङ्करं भवखिन्नानां सर्वलोकवशंकरम् ।। ३४ ।।
निर्विकारं सदाकारं निराकारं शुभाकरम् । हरं परं स्थिरं शूरं[12a] कोटिभासुरतेजसम् ।। ३५ ।।
पञ्चब्रह्मतनुं पञ्चवक्त्रैः प्रत्यग्रविग्रहम् । तुषाराचलविस्फूर्जच्चन्द्रिकासारशीतलम् ।। ३६ ।।
दृष्ट्वा सत्वरमागत्य ननाम जगदीश्वरम् । अष्टकेन भवं स्तोतुमुपचक्राम पद्मभूः ।। ३७ ।।
नादबिन्दुकलातीतरूपाय परमात्मने । नमस्ते जगतां स्रष्ट्रे भर्त्रे हर्त्रे नमो नमः ।। ३८ ।।
ईशाय सर्वविद्यानां तारकब्रह्मरूपिणे । अनाद्यन्ताय भव्याय पञ्चाक्षरतनूभृते ।। ३९ ।।
नमस्ते भगवन् शम्भो सर्वज्ञायात्मतेजसे । नमः सहस्रनेत्राय सर्वतः पादबाहवे ।। ४० ।।
सर्वगाय नमस्तुभ्यं विश्वेशाय नमो नमः । अस्मादृशानपि पशून् बध्नते पाशबन्धनैः ।। ४१ ।।
दयया मुञ्चते पश्चान्नमस्ते शमनच्छिदे । कन्दर्पदर्पदलनविचक्षणतनूभृते ।। ४२ ।।
कलानिधिकलोत्तंसशिरसे भवते नमः । नमस्त्रिपुरदैत्येन्द्रविजयोज्ज्वलतेजसे ।। ४३ ।।
मुनिमानसपाथोजसमुद्यद्भानुभास्वते । सुधाकरसमाकारतनवे ते नमो नमः ।। ४४ ।।
निरञ्जनाय सत्याय निष्कलायास्तु ते नमः । अविज्ञेयस्वरूपाय नमस्ते मुनिपुङ्गवैः ।। ४५ ।।

सोमव्योमसहस्रधामतनुभृद्धामात्मवन् ह्याशुग ।
क्षीराकारतया जगत्समवते[13] सर्वेश तुभ्यं नमः ।
शान्तायाद्भुतवैभवाय गिरिजासङ्गैकशृङ्गारिणे ।
भूयस्ते नतिरस्तु भक्तजनताहृत्तापहर्त्रे विभो ।। ४६ ।।

इति स्तुत्वा महेशानं स्तोत्रैर्वेदान्तसंमतैः । तस्थौ स पुरतः शम्भोः सावधानेन चेतसा ।। ४७ ।।

## महेश्वर उवाच

धातः किमर्थमायातः कारणं तत्र किं वद । विविग्नोऽसि[14] किमर्थं वा कथयैत[15]न्ममादितः ।। ४८ ।।
यदिष्टं भवतो विष्णोस्तत्सर्वं करवाण्यहम् । नात्रास्ति द्वापरः कश्चिदचिरेणाम्बुजोद्भव[15a] ।। ४९ ।।
इति तुष्टेन प्रष्टोऽसौ लोकानुग्रहकाङ्क्षया । तदेव[16] वक्तुमारेभे प्रश्रयावनताननः ।। ५० ।।

9b. °मोहादिनि°। (B), (C); 10. संततम्। (A) 11. °भूभृदाग्रे च। (A); भूभृतोपाग्रे (B); 11a. तत्र ब्रह्मा°। (B), (C); 12. ससृजे जगत्य°। (A), (C); सृजति is in keeping with अवति and हन्ति in the line; जगन्ति is the grammatically correct word 12a. सूर्यकोटि°। (C) 13. समस्तमवंते। (A), (B), (C) this makes the metre defective 14. विषण्णोऽसि। (A) 15. कथय त्वं ममा°। (B), (C); 15a. °द्विचारेणा° (B) 16. तथैव। (A), तदैव। (B), (C)



## विज्ञानकन्दः

श्रीमन्देशिकलौकिकव्यवहृतिप्रत्यहदूराशये ।
सोऽहं हंस इति प्रपद्य धिषणामैक्यं च जीवेशयोः ।।
तिष्ठन्तं कथयेति वक्त्य[16a]यमिति व्यग्ना न चेत्ते मतिः ।
ब्रूह्यग्रे मम चिद्विलास सुमते शिष्ये दयालुर्भव ।। ५१ ।।

## चिद्विलासः

श्रीमन् विज्ञानकन्द त्वमिव महितलेऽप्यस्ति नैको विवेकी ।
छायेवाहर्निशं मामनुसरसि मुहुः सेवया नैव खेदः ।
[17]वेलामालोक्य वृत्तं विविदिषसि गुरोः पृच्छसि त्वं सदर्थान् ।
नालस्यं वाऽ[18]स्य किञ्चित्प्रभवति हि भवाञ्छ्रेयसामेकमोकः ।। ५२ ।।

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीचिद्विलासयतीन्द्रविज्ञानकन्दतपोधनेन्द्रसंवादे शङ्करविजयविलासे ईश्वरदर्शनकथनं नाम तृतीयोऽध्यायः ।।

16a. वस्त्वय°। (B), (C); 17. देशानालोक्य। (A) 18. वास्ति। (C)

# ॥ अथ चतुर्थोऽध्यायः ॥

## हिरण्यगर्भ उवाच

भगवन्देव देवेश करुणावरुणालय । जगत्सर्गस्थितिलयान्माया ते तनुते ननु ॥ १ ॥
त्वं तु साक्षी समस्तानां सच्चिदानन्दलक्षणः । भवानेवाऽसृजत्पूर्वं दक्षभागादिमंजनम् ॥ २ ॥
पुण्डरीकेक्षणं वामाद्रुद्रं फालप्रदेशतः । तमःसत्त्वरजोभिख्यांस्तदायत्तान्गुणानपि ॥ ३ ॥
तान् नियुज्य जगत्कृत्ये तटस्थ इव लक्ष्यसे । कर्तुं विकर्तुं हर्तुं च त्वन्मायैव पटीयसी ॥ ४ ॥
जडानां जडवद्भासि ज्ञानिनां तु सनातनम् । बन्धुजीवप्रभे वाद्ये स्फाटिके निर्मले मणौ ॥ ५ ॥
प्रकृत्या कलितं यद्यत्त्वयै[1]वाऽध्यवसीयते । मया[2] कादम्बरूपेण शिरोदर्शनवाञ्छया ॥ ६ ॥
कल्पान्बहून् पत[3]न्नूर्ध्वं न व्यलोकि शिरस्तव । भूदारः स च भूदारो भूत्वा पददिदृक्षया ॥ ७ ॥
दारयन्[4] दंष्ट्रया क्षोणिमविशत्स तलातलम् । तेनापि भिन्नदंष्ट्रेण नादर्शि त्वत्पदाम्बुजम् ॥ ८ ॥
चैतन्यरूपतो विश्वं प्रकाशयसि लीलया । मायाविद्याविभेदेन प्राप्योपाधिं पृथक् पृथक् ॥ ९ ॥
जातः[6]शिव इति द्वेधा कथ्यसे न तु तत्त्वतः[7] । त्वन्महः को विजानाति तत्त्वज्ञो जगदीश्वर ॥ १० ॥
बध्वा पशूनिव जनानज्ञानान्मोहयस्यपि । तमोनिवृत्तौ तानेव विसृजस्यपि बन्धनात् ॥ ११ ॥
त[8] एते प्रथिते लोके समे सुमतिदुर्मती । तत्तत्कर्मानुसारेण प्रेरकस्त्वं तयोरपि ॥ १२ ॥
मह्यं यत्पृच्छते पूर्वं तत्त्वार्थं ज्ञातुमिच्छया । ऋतं सत्यं परं ब्रह्म नान्यदस्ति ततो जगत् ॥ १३ ॥
तस्य भासा सर्वमिदं विभातीति श्रुतेः सदा । साकारनिर्विकारादिभेदस्तस्यैव कथ्यते ॥ १४ ॥
उमासहायमित्यादिश्रुत्या साकारकल्पना । अविकारमजं सिद्धं[9] निर्गुणं यन्निरञ्जनम् ॥ १५ ॥
अदीर्घह्रस्वमस्थूलमनण्वध्यमलोहितम् । अनाकाशमसंस्पर्शमगन्धमरसं च यत् ॥ १६ ॥
अचक्षुःश्रोत्रमचलमवाक्पाणिममानसम् । अनामगोत्रममुखमतेजस्कमहेतुकम् ॥ १७ ॥
इत्यादिश्रुतिवाक्यौघैर्निर्विकारत्वकल्पना । क्रमेणोपास्य सगुणं निर्विकारं भजेत्ततः ॥ १८ ॥
इत्येवं कथितं देव भूयो भूयोऽनुयुञ्जते । त्वदाज्ञां हृदि निश्चित्य कश्यपादीनबोधिषम् ॥ १९ ॥
इतः पूर्वं तथैवाऽसीदाज्ञया जगतां मतिः । सर्वत्र समताबुद्धिर्जिज्ञासा वेदशास्त्रयोः ॥ २० ॥
श्रुत्युक्तविहिताचारा यज्ञाविविदिताः[10] क्रियाः । तपश्चर्या बहुविधा गुरुद्विजसमर्चनम् ॥ २१ ॥
स्थितमेवमिदानीं तु तद्विरुद्धान्विलोकयन् । नारदः स्थिति[11]विभ्रष्टान् दुराचारान्[12] परिग्रहान् ॥२२॥
नानाविधानि चिह्नानि शूललिङ्गादिकानि च । बिभ्रतो महतो देहे तप्तान्यपि च सर्वतः ॥ २३ ॥
शिवभक्तिपरान् कांचिद्वैष्णवानप्यनेकशः । सौरान् भैरवदैवत्यान्गणेशस्कन्ददैवतान् ॥ २४ ॥
शाक्तान्नवग्रहपरान् श्रीभूवाण्यादिपूजकान् । वीरभद्रार्चकान् कांश्चिद्धनूमद्भजकानपि ॥ २५ ॥
दिगीशानादिभक्तांश्च स्वमतोत्तम[12a]तार्थिनः । त्यजतो वैदिकं कृत्यं[12b] सप्ततन्तुमनुत्तमम् ॥२६॥
पञ्चयज्ञादिसत्कर्म मुञ्चतः श्रुतिचोदि[12c]तम् । वदतो भेदवादांश्च परस्परजयार्थिनः ॥ २७ ॥

---

1. त्वय्यैवा°। (A); त्वय्येवा°। (C); 2. माया कादम्ब°। (A), महा° (B), (C); 3. ऊर्ध्वगेन। (A) 4. धारयन्। (A), (B), (C); 6. जीवः शिव। (A), (B); 7. तथ्यतः। (A) 8. तपते। (A), (C); तपतो (B) both these are wrong 9. शुद्धं। (A),(B), (C); 10. °विहिताः। (A), (B), (C); 11. श्रुतिवि°। (B), (C); 12. दुराचारपरिग्रहान्। (A), (B) (C) 12a. स्वमन्त्रोक्तमतानुगान्। (B), (C) 12b. कर्म। (B); (C); 12.c श्रुतिबोधितम्। (B), (C);



त्वदाज्ञप्तं मदाज्ञप्तं विस्मृत्य च विमोहितान् । विस्मितः पुनरागत्य मामवादीत्स तापसः ॥ २८ ॥
भवदायत्तकृत्येन त्वदुक्तविधिकारिणा । मया वा विष्णुना वाऽपि किं कर्तुमिह शक्यते ॥ २९ ॥
तस्मादनेन मुनिना नारदेन समन्वितः । निवेदितुं भगवते सर्वज्ञायाऽहमागतः ॥ ३० ॥
उपायं प्रविजानाति बद्धुं मोक्तुं भवान् भुवि । नाऽन्यः शक्तोऽस्ति भुवने भवतः परमेश्वर ॥ ३१ ॥
अद्वैतविद्या जगति प्रसिद्धा स्यात्तथा कुरु । इतीरयित्वा नत्वा[13]च बद्धाञ्जलिपुटोऽब्जभूः ॥ ३२ ॥
ध्यायन् हृदि महेशानं सावधानः स्तुवँ स्थितः । निवेदयति वृत्तान्तमित्थं लोकपितामहे ॥ ३३ ॥
विधातारं विलोक्याऽथ मन्दस्मितमुखाम्बुजः । त्वया निवेदितं सर्वं जानामि कमलोद्भव ॥ ३४ ॥
मयैव कलितं तच्च तत्तत्कर्मानुसारतः । किञ्चित्कारणमत्राऽस्ति जानास्येव तदप्यहो ॥ ३५ ॥
लोकोपकारणायैव पृच्छसे त्वं पुनः पुनः । तथापि चेत्प्रवक्ष्यामि सावधानमनाः शृणु ॥ ३६ ॥
इष्टवान् बहुभिर्देवान् सततं सप्ततन्तुभिः । पौण्डरीकं वाजपेयं चयनं सर्वतोमुखम् ॥ ३७ ॥
कृतवानेष विधिना सर्वशास्त्रविशारदः । विज्ञायोपनिषत्संघान् तदर्थानवलोक्य च ॥ ३८ ॥
निश्चितं[14] विततं ब्रह्म सर्वमावृत्य तिष्ठति । तदंशो जीवना[15]म्नैव सुखदुःखादिभोगभाक् ॥ ३९ ॥
उपायापायचिन्ता[16]भ्यामुपाधिर्विनिवर्तने । जीव एवेश्वरो भाति ज्ञानिनां हृदि सर्वदा ॥ ४० ॥
शिवाभिधं तु तद्ब्रह्म सच्चिन्मात्रस्वरूपकम् । आत्मेति कथितं तच्च मनोवाचामगोचरम् ॥ ४१ ॥
इति विज्ञाप्य मनसा मामेव शरणं गतः । मत्तो वाञ्छन्सतः पुत्राननपत्यत्वदुर्मनाः ॥ ४२ ॥
आर्यया भार्यया साकं यज्वा शिवगुरु[17] द्विजः । हरगौर्योर्दृशावासं पश्यन्नेवानिमेषया ॥ ४३ ॥
सूर्याचन्द्रमसोर्यान्तं[18] स्थिरीकृत्य प्रयत्नतः । चिच्चन्द्रिकासुधापाननित्य[19]तृप्तमनोगतिः ॥ ४४ ॥
विस्मर[20]न्नितरासक्तिं ध्यायन्मामेव सन्ततम् । तपस्यति चिरं घोरं वर्षीयानपि निश्चलः ॥ ४५ ॥
इन्द्रादिसम्पदोऽप्येषः काङ्क्षेत न कदाचन । तृणीकृत्येतरान् देवान् वृषाचलकृतालयम् ॥ ४६ ॥
मामेव भजते नित्यं सुपुत्रावाप्तिकाङ्क्षया। वार्तेयं कथिता धात्र्या दुर्मतेक्षणखिन्नया ॥ ४७ ॥
तदीयान्नियमान्वीक्ष्य वैलक्ष्यं गतया पुरा । ततस्तत्पुत्रतामेत्य दत्वाऽभीष्टं द्विजन्मनः ॥ ४८ ॥
दुर्मतानि विनिर्जित्य सर्वतः प्रथितान्यपि । शङ्कराचार्यनाम्नैव विचरामि धरातले ॥ ४९ ॥
विष्णोश्च भवतो यद्यद्धितं[21] तत्तत्करोम्यहम् । तदेतद[22]चिरेणैव कलयाम्यम्बुजासन ॥ ५० ॥
अमुना मुनिना साकं नारदेन महौजसा । याहि सत्यं स्वकं लोकं ब्रूहि मा कथितं मया ॥ ५१ ॥
पाहि[22a] त्वं पूर्ववल्लोकानी[23]हितं करवाणि ते । स्वेहितं कथयित्वा तं द्रुहिणं प्राहिणोद्भवः ॥५२॥
प्रणम्य शिरसा सोऽयं तेनैव मुनिना सह । निश्चिन्तो वसतिं प्राप्य न्यवसत्सुचिरं सुखी ॥
स्मरन् हृष्यन्[23a] शिवेनोक्तमिदमेव पुनः पुनः ॥ ५३ ॥

### विज्ञानकन्दः

श्रीचिद्विलास कथितं भवता यदत्र । पद्मोद्भवेश्वरपरस्परवादरूपम् ॥
आकर्ण्य संभृत[24]मभूत्प्रमदेन चेतः । ब्रूह्यग्रतोऽपि करुणामृतवारिराशे ॥ ५४ ॥

---

13. स्तुत्वा। (A) 14. निश्चित्य। (A), (B), (C); 15. जीव एवैष। (B), (C); 16. °चिन्तात्मा चोपाधि°। (A) 17. गुरुशिवद्विजः। (A); 18. °र्यातं। (A), (B), (C); 19. °पाननृत्यत्तृप्त°। (A), (B), (C); 20. विस्तर°। (A); 21. यद्यत्स्थितं। (A) 22. तदेव विचिरेणैव। (A); 23. रक्षित्वा....लोकान्नाहितं......। (B), (C); 23a. वचः। (C); 24. संभ्रम°। (A);

## चिद्विलासः

धीमन् विज्ञानकन्द प्रथितमिह मुहुः पृच्छ्यते[25] यन्मयोक्तम् ।
संवादं विधिशर्वयोः प्रतिदिनं भक्त्या पठत्यादरात् ॥
सोऽप्यद्धा भविता भिदा विगलितस्त्वैक्याच्च जीवेशयोः ।
जीवन्मुक्त इवाऽवसन्नतितरां निःश्रेयसायेहते ॥ ५५ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीचिद्विलासयतीन्द्रविज्ञानकन्दतपोधनेन्द्रसंवादे शङ्करविजय-विलासे हरविरिञ्चिसंवादो नाम चतुर्थोऽध्यायः ॥

25. पठ्यते । (A);



## ॥ अथ पञ्चमोऽध्यायः ॥

ततः स भगवानीशः[1] सर्वलोकैकरक्षया । श्रुतिस्मृतिविरुद्धानां दुर्मतानां जिहीर्षया ॥ १ ॥
तपस्यतः शिवगुरोर्दीक्षितस्य विपश्चितः । स्वीयावतारसदृशसुपुत्राणां विवित्सया ॥ २ ॥
भेदवादितमोग्रस्तजनानामुद्दिधीर्षया । बहुशो भुवि लीलाश्च प्रख्या[2]पयितुमद्भुताः ॥ ३ ॥
नीवृतां[3] केरलानां च पावनत्व-विधित्सया । श्रीमद्दक्षिणकैलासं वृषाचलमवाप सः ॥ ४ ॥
चूर्णी स्त्रोतस्विनी यत्र गङ्गेवाघौघनाशिनी । द्युद्रुमा इव सर्वत्र[4] तरवः फलदायिनः ॥ ५ ॥
लोकाः सुमनसः सर्वेऽप्यस्वप्ना निर्जरा अपि । अङ्गना अपि यत्रत्या निर्निमेषाक्षिलक्षिताः[5] ॥ ६ ॥
अलकेव पुरी यत्र कारटीति प्रतिश्रुता । नगरी धनि[6]संवीता राजते जगतीतले ॥ ७ ॥
किन्तु कैलासभूमी[7]भृद्दुर्वर्णमिति कथ्यते । अयं तु जातरूपश्रीर्भासते वृषभाचलः ॥ ८ ॥
तत्र तौ दम्पती दृष्ट्वा वसिष्ठारुन्धती इव । द्योतयन्तौ दिशः सर्वास्तपसोदिततेजसा ॥९॥
तपस्यन्तौ भृशं शान्तौ श्रान्तावपि महत्तरम् । विलोक्य विस्मयं यातः शिवोऽपि करुणाकरः ॥१०॥
मनोभिलषितं नो चेदितो दास्यामि सत्वरम् । दम्पत्योरेनयोरंहो मामेवाऽनुसरेदिति ॥११॥
प्रविनिश्चित्य देवोऽपि करुणानिधिर[7a] व्ययः । प्रसादं छद्मना कर्तुमधत्त मतिमी[7b]श्वरः ॥१२॥
प्रत्यूषे वाति मरुति फुल्लकह्लारसौरभे । पटीरगिरिसंभूते पुष्पकेसरवाहिनि ॥१३॥]
आविर्भवितुमुद्युक्ते दैतेयानां पुरोधसि । खगैर्नी[8]रसनीडेषु कूजद्भिः परितो वृते ॥१४॥
यामिन्यामवसन्नायां प्रायः स्फुटति[9] पङ्कजे । स्वतात[9a]सदनं गन्तुमुद्युञ्जाने[9b] सुधाकरे ॥१५॥
स्वप्ने[9c] स विप्ररूपेण वृषक्षितिभृदीश्वरः । युवामिष्टं गृणीतं कम[9d]चिरात्करवाण्यहम् ॥१६॥
इतीरयित्वा स्मितवे[10]षत्प्रसन्नवदनाम्बुजः । विस्मयेनैव तौ पश्यंस्तस्थिवान् स द्विजाग्रणीः ॥१७॥
स्वप्नेऽपि तौ परिज्ञाय महेशं ज्ञा[11]नतोऽभितः । वृषाचलेशो नियतं वरान्दातुमिहागतः ॥१८॥
इति निश्चिक्यतुश्चित्ते भावना तादृशी तयोः । [11a]समुत्थायेश्वरस्याऽस्य पद्भ्यां निपततौ मुहुः ॥१९॥
उक्तवन्तौ स्ववृत्तान्तं पृच्छते तद्द्विजन्मने । ततस्तेनाऽप्यवादीत्थं सर्वशास्त्रविशारदम् ॥२०॥
दास्यामि पुत्रमेकं वा चिरेतरवयोयुतम् । अथवा सुचिरायुष्कान् बहून् पुत्रांस्तु बालिशान् ॥२१॥
इति पृष्टौ समालोच्य किं फलं बालिशैः सुतैः । अचिरायुरिहैको वा वेदवेदा[12]ङ्गतत्त्ववित् ॥२२॥
स्ववंशानुद्धरत्येव भवाब्धिमिव[12] शङ्करः । एकोऽलमयमित्येवमवादि[13a]ष्टामथाग्रत ः ॥२३॥
तथाऽस्त्विति समुच्चार्य ययौ शम्भुर्यथाऽऽगतम् । एवमेव हि तौ स्वप्ने दृष्टवन्तौ परस्परम् ॥२४॥
उषस्यालोच्य निश्चित्य प्रसङ्गो[13b] गिरिजाधवः । सुपुत्रं दत्तवानेव वृषाचलकृताश्रयः ॥२५॥
चिरायुष्कं करोत्येव मृकण्ड[14]मिव बालकम् । ततस्तौ दम्पती मत्वा स्व[15]फलं स्वप्नदर्शनम् ॥२६॥

1. भगवान् शर्वः । (A); 2. प्रत्यक्षयितु° । (C); 3. निभृता । (A); 4. तत्रत्याः । (A), (B), (C); 5. °लोचनाः । (B), (C) 6. धन° । (A), (B), (C); 7. भूम्यास्तु दुर्वर्णं° । (A); 7a. °निधिरीश्वरः । (B), (C); 7b. मतिमव्ययः । (B), (C); 8. निसर° । (A); 9. स्फुटित-पङ्कजे । (A), (B), (C); 9a. स्वावास° । (B), (C); 9b. °मुद्युक्ते च । (B), (C); 9c. स्वप्नेऽसौ । (C); 9d. वो मा चिरात् । (B), (C); 10. स्मृत्वैष प्रसन्न° । (A); स्थित्वैष° । (B), (C); 11. ध्यानतो° । (A); ध्यानयोगतः । (B), (C); 11a. भक्त्यादरभयाविष्टमानसावथ सत्वरम् ॥ (B), (C); 12. वेदवेदान्त° । (A); 13. °मिह । (A); 13a. °दीत्सा तथाग्रतः । (B), (C); 13b. प्रसन्नो । (B), (C); 14. मृकण्डु° । (A); 15. स्वफलं । (A), (B);

समाप्तभजनौ शम्भुं प्रणम्य भवनं गतौ । सन्तर्प्य विप्रवर्यांश्च वस्त्रान्नकन[16]कादिभिः ।।२७।।
आशीर्वचांसि तेषां तौ जगृहाते वधूवरौ । लब्धा[17]नुज्ञौ द्विजातीनां तेषां भुक्तवतां ततः ।।२८।।
तद्भुक्तशेषमन्नं तौ भोक्तुकामौ बभूवतुः । तत्रान्ने भक्ष्यमाणे तु प्राविशज्ज्योतिरैश्वरम् ।।२९।।
दम्पती तौ मुदोपेतौ बुभुजाते तदाऽऽदृतौ । आर्याम्बा गर्भमाधत्त पूर्णेन्दुमिव पूर्वदिक् ।।३०।।
मृषा भवेत्कथं लोके महेशस्याऽपि भाषितम् । तनुः[18]कृशाऽपि तपसा क्रमेण समवर्धत ।।३१।।
प्राचीवान्तर्निलीनैना शमीवान्तर्हितानला । अन्तर्लीनेन्द्रदन्तीन्द्रसुरस्रोतस्विनीव सा ।।३२।।
निधानगर्भा धात्रीव त्रेतेवाच्छादिता तुषैः[19] । अन्तर्निरूढविज्ञाना मुनेरिव मनोगतिः ।।३३।।
व्यराजत तदाऽऽर्याम्बा शिवैकायत्तचेतना[20] । दृष्ट्वा शिवगुरुर्यज्वा भार्यामार्यां च गर्भिणीम् ।।३४।।
वृषाचलेशं सततं स्मरन्नेकाग्रमानसा[21] । दयालुतां स्तुवन् शम्भोर्दीनेष्वपि महत्स्वपि ।।३५।।
ववृधे स पयोराशिः पूर्णेन्दोरिव दर्शनात् । ततः सा दशमे मासि संपूर्णे शुभलक्षणे ।।३६।।
दिवसे माधवर्तौ च सोच्चस्थे ग्रहपञ्चके । मध्याह्ने चाभिजिन्नाममुहूर्ते चार्द्रया युते ।।३७।।
[22]उदयाचलवेलेव भानुमन्तं महौजसम् । प्रासूत तनयं साध्वी गिरिजेव षडाननम् ।।३८।।
जयन्तमिव पौलोमी व्यासं सत्यवती यथा । तदै[23]वाग्रे निरीक्ष्येयमनुभूयेव वेदनाम् ।।३९।।
चतुर्भुजमुदाराङ्गं त्रिनेत्रं चन्द्रशेखरम् । दुर्निरीक्ष्यैः स्वतेजोभिर्भासयन्तं दिशो दश ।।४०।।
दिवाकरकराकारैर्गौर[24]मीषद्विलोहितैः । एकमाकारमालोक्य विस्मिता विह्वला भिया ।।४१।।
किं किं किमिदमाश्चर्यमन्यदेव मवीप्सितम् । परं त्वन्यत्समुद्भूतमिति चिन्ताभृति[25]स्वयम् ।।४२।।
उद्युञ्जत्यां[26] प्रणमितुं स्तोतुं कुतुकतायुजि । ससृजुः पुष्पवर्षाणि देवा भुव्यन्तरिक्षगाः ।।४३।।
कह्लारकलिकागन्धबन्धुरो मरुदाववौ । दिशः प्रकाशिताकाशाः सा धरा सादरा बभौ ।।४४।।
प्रायः प्रदक्षिणज्वाला जज्वलुर्यज्वपावकाः । प्रसन्नमभवच्चित्तं सतां प्रपततामपि[27] ।।४५।।
इत्थमन्यद्विलोक्याऽपि विस्मिता[27a] प्रश्रयान्विता । वृषाचलेशं निश्चित्य प्रादुर्भूतमतन्द्रिता ।।४६।।
स्वामिन् दर्शय मे लीला बालभावक्रमोचिताः । इत्थं सा प्रार्थयामास साध्वी भूयो महेश्वरम् ।।४७।।
ततः किशोरवत्सोऽपि किञ्चिद्विचलिताधरः । ताडयंश्चरणौ हस्तौ रुरोदैषः क्षणादसौ ।।४८।।
आर्या साऽपि तदैवाऽऽसीन्मायामोहितमानसा । जगन्मोहकरी माया महेशितुरनीदृशी ।।४९।।
तत्रत्यास्तु जना नार्यो नाऽविन्दन्वृत्तमीदृशम् । बालकं मेनिरे प्रोद्यदिन्दुबिम्बमिवोज्ज्वलम् * ।।५०।।
तत्रत्या वृद्धनार्योऽपि यथोचितमथाऽऽचरन् । ततः श्रुत्वाऽपि[28]ताः सोऽपि निधिं प्राप्येव निर्धनः ।।५१।।
मुमुदे नितरां चित्ते वित्तेशं नाभ्यलक्षत । आविर्भावं न जानाति शम्भोर्नाऽबोधयच्च सा ।।५२।।
स्नात्वा शिवगुरुर्यज्वा यज्वनामग्रणीस्ततः । विप्रानाहू[29]रयामास पुरन्ध्रीरपि सर्वतः[30] ।।५३।।
तदोत्सवो महानासीत्पुरे सद्मनि सन्ततम् । धान्यराशीन्मखिभ्योऽ[31]सावीभ्यो भूयः प्रदत्तवान् ।।५४।।
धनानि भूरिविप्रेभ्यो वेदविद्भ्यो दिदेश सः । वासांसि भूयो दिव्यानि सफलानि प्रदत्तवान् ।।५५।।

16. °न्न-करकादि° । (A); 17. लब्धानुज्ञां । (A); 18. पुनः कृशातितपसा । (A), (B); 19. विधानगर्भधात्रीव त्रेतेवाचारिता । (B); अन्तर्निगूढ° । (B),(C); 20. °चेतसा । (A), (B); 21. °एकाग्रचेतसा । (A), (B); 22. Here, (B) and (C) read the following श्रीजगद्गुरुशंकरभगवत्पादपूज्याचार्याणामवतारघट्टः ।। 23. तथैवाग्रे । (A), (B); 24. °गौरैरीषद्° । (A), (B), (C); 25. चिन्तागतिः । (A) 26. उद्विजन्त्यां । (A), उद्विद्यं त्वां । (B); उद्विभ्रन्त्यां । (C); 27. व्रतमतामपि । (A) प्रतपता° । (B); (C) 27a. प्रश्रिता विनया° । (B); (C); (C) * dose not read this stanza. 28. श्रुत्वा पिता सोऽपि । (A), (B) 29. °नाकारया- मास । (A), (B), (C); 30. सत्वतः । (A) 31. सौ विद्भ्यौ । (A), (B), (C);



पुरन्ध्रीणां च नीरन्ध्रं वस्तुजातमदादसौ । घटोध्नीर्बहुशो गाश्च सालङ्काराः सदक्षिणाः ।।५६।।
वृषाचलेशः सततं प्रीयतामित्यसौ ददौ । ततः शिवगुरुर्यज्वा ब्राह्मणान्पूर्वतोऽधिकम् ।।५७।।
सन्तर्प्य बन्धुभिः सार्धं मुदितो न्यवसत्सुधीः । बालभावे विशालाक्षमतिविस्तृतवक्षसम् ।।५८।।
आजानुलम्बितभुजं सुविशालनिटालकम् । आरक्तोपान्तनयनविनिन्दितसरोरुहम् ।।५९।।
मुखकान्तिपराभूतराकाहिमकराकृतिम् । भासा गौर्या प्रसृतया प्रोद्यन्तमिव भास्करम् ।।६०।।
शङ्खचक्रध्वजाकाररेखाचिह्नपदाम्बुजम् । द्वात्रिंशल्लक्षणोपेतं विद्युदाभकलेवरम् ।।६१।।
प्रमोदं दृष्टमात्रेण दिशन्तं तं स्तनंधयम् । पायं पायं दृशा प्रेम्णा श्रीकृष्णमिव गोपिकाः ।।६२।।
प्रपेदे न क्षणं तृप्तिं चकोरीव सुधाकरम् । तादृशं बालकं दृष्ट्वा त्वार्या सा शुभलक्षणा ।
तिष्ठति स्म सुखेनैव लालयन्ती तनूभवम्[32] ।।६३।।

## विज्ञानकन्दः

श्रीचिद्विलास गुरुवर्य समुद्भवोद्यद्वृत्तं निशम्य नितरां हृषितं मनो मे ।
अग्रे यदद्य वद तच्चरितं क्रमेण भूयो नतोऽस्मि गुरवे भवतापहर्त्रे[33] ।।६४।।

## चिद्विलासः

दिव्यं भव्यमनन्यभाव्यमसकृच्छ्लाघ्यं विपश्चिद्वरैः ।
श्रीमच्छङ्करदेशिकेशचरणाविर्भावमत्युत्तमम् ।
भक्त्या विज्ञानकन्द प्रपठति लिखति प्रेमतो यः शृणोति ।
क्षोण्यां नूनं स एव त्रिपुरजिति परं विद्धि बद्धादरस्त्वम् ।।६५।।

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीचिद्विलासयतीन्द्रविज्ञानकन्दतपोधनेन्द्रसंवादे शङ्करविजयविलासे आविर्भावकथनं[34] नाम पञ्चमोऽध्यायः ।।

32. तमात्मजम् । (A) 33. °हर्त्रे । 34. (B) and (C) do not read these two words.

# ।। अथ षष्ठोऽध्यायः ।।

प्रतिपच्चन्द्रलेखेव किशोरस्य तनुस्ततः। वृद्धिं बुबोध[1] नितरां वामनस्येव निर्मला ।।१।।

श्रीकण्ठ एवं सोत्कण्ठो बालभावदिदृक्षया। धरणाववतीर्णो वा[1a] व्यराजत तदाऽनिशम् ।।२।।

एनं स्तनंधयं नार्य : कुमारमिव देवताः। दिदृक्षव : समाजग्मुस्तिग्मांशुं मुनियोषित : ।।३।।

पश्यन्त्य : स्वं त्यजन्त्योऽपि कृत्यं यद्यद्गृहोचितम्। सप्रजास्ताः प्रजाबालमुद्यदिन्दुनिभाननम् ।।४।।

सदा निरीक्षितुं बालं यास्यतां प्रतियास्यताम्। आनन्दबाष्पसलिलैः पङ्किला भूरभून्ननु[1b] ।।५।।

अर्भकास्येक्षणाश्चर्यसंदानितधियामहो। अनिर्वाच्योऽद्भुतानन्दः समजायत सत्वरम् ।।६।।

जातनामान्नभोज्यादिक्रियाः सर्वाः श्रुतीरिताः। अचीकरद्द्विजः सोऽपि प्रेम्णां शिवगुरुर्मखी ।।७।।

सत्पात्रतलविन्यस्तविद्येव ववृधे पटुः। उत्तानशयने किंचिदिन्दुं वीक्ष्य हसन्निव ।।८।।

त्वन्मतालम्बिनो नूनं निर्जेष्यामीत्यवज्ञया। दिवाकरकरे किञ्चिदुदयत्यपि भास्वरे[1c] ।।९।।

त्वन्मतं सन्मतं भास्वन्[2] दित्सन्निव सदा[2]भयम्। करं प्रसारयामास ग्रहीतुमिव वाञ्छया ।।१०।।

गायत्यपि मनोवृत्तिं शाङ्करे चरितो[3]दधौ। त[4]दीयान्यपदानानि गायन्तीति[4a] भृशं मतिम् ।।११।।

जोषमित्थं क्षणं तिष्ठन्मातुर्वीक्ष्य मुखाम्बुजम्। मन्मायामोहितमना न वेत्यपि किमित्यसौ ।।१२।।

इति स्मेराननः किञ्चिद्रुरोद स्तन्यकाङ्क्षया। पुरुषर्षभतां पित्रोः सूचयन्निव भूतलम् ।।१३।।

जानुभ्यां समवष्टभ्य कराभ्यामचरन्मृदु। लालाजलसुधाबिन्दुस्यन्दन्मधुरिमाक्षरम् ।।१४।।

स्वल्पं जजल्प शिल्पेन तातेत्यम्बेति मञ्जुलम्। स्वयं त्रिजगदालम्बोऽप्यलल‍म्ब करं पितुः ।।१५।।

दुर्मतानि विनिर्जेतुं यास्यन्निव चचार सः। क्रमेण बालकैः साकं सवयोभिः सबुद्धिभिः[5] ।।१६।।

बहिर्निर्गन्तुमप्यैच्छद्वारितोऽपि पुनः पुनः। स्वीयं यशो विशदितुं निःसरन्निव सत्वरम् ।।१७।।

मात्रा पित्रा निरुद्धोऽपि निर्गन्तुं मतिमादधे। सिञ्जा[6]दिमणिमञ्जीरहंसकादिविभूषणम् ।।१८।।

जाम्बूनदेन रशनादाम्नोद्भास्यवलग्नकम्। चित्रकायनखोदञ्चिद्धारचिह्नितवक्षसम् ।।१९।।

स्वर्णकङ्कणसौवर्णमुद्रिकादिपरिष्कृतम्। कौशेयवाससं भासा भासयन्तं दिशो दश ।।२०।।

मदनो वा वसन्तो वा किमु राकासुधाकरः। किशोराकारमालम्ब्य चरत्येव न संशयः ।।२१।।

संदिहाना जना नूनं नानिश्चिवन्त मानसे। जनेन येन केनाऽपि सादरं वीक्षितोऽप्यसौ ।।२२।।

सहैव तेन निःसर्तुं काङ्क्षति स्म स विस्मितः। रुचिं विलोकयद्द्वेधा किशोरस्य मनोहराम् ।।२३।।

तृतीये[7]ऽब्देऽभ्युदयति ज्योतिःशास्त्रकलाविदः। आकार्यसूर्यसिद्धान्तसुधाकूपारपारगान् ।।२४।।

सुमुहूर्ते सुलग्ने च शुभनक्षत्रसंयुते। अनेहसि महोदारे द्राविडाचारसंमतम् ।।२५।।

पौरैः स्निग्धैर्विदग्धैश्च वृद्धैर्बन्धुभिरन्वितः। चौलोत्सवमथाऽकार्षीत्सोऽयं शिवगुरुर्मखी ।।२६।।

अनेकदिवसायासतीव्रतप्ततपः[8] समाः। सर्वोत्तमसुतावाप्तिसञ्जातानन्दबन्धुरः ।। २७ ।।

दक्षिणां दक्षिणः सोऽपि स्वप्ने[8a]भसदृशीं ददौ। रत्नानि भूरिवासांसि मण्डनानि बहूनि च ।। २८ ।।

---

1. पुपोष। (B); 1a. ह। (A); °ऽसौ। (B); (C); 1b. °भत्तदा। (B); (C); 1c. भास्वति। (B), (C); 2. भास्वन्निति दित्सन्निवाभयम्। (A); °तदाभयम्। (C); 3. चरिते दधौ। (A), (B); (C); 4. मदीयान्य°। (A); (C); 4a. गायन्त्यपि मतिं तदा। (B), (C); 5. सुबुद्धिभिः। (A), (B); (C); 6. सिंजान°। (A) 7. तृतीयाब्दे। (A), (B), (C) ('याब्धे'–याब्दे।) 8. तपः स माम्। (A); 8a. स्वंप्रेम°। (B); (C);



विप्रभ्यः सुविपश्चिद्भ्यो ददौ गायकसंसदः। वादित्रकुशलेभ्यश्च नृत्यद्भ्यश्च मुदा तदा ।। २९ ।।

स्वीयभौरिकतायोग्यमचीकरदथोत्सवम्। पितरौ दारकं दृष्ट्वा मुमुदाते प्रतिक्षणम् ।। ३० ।।

ततो निपुणतां दृष्ट्वा बालकस्य च[9] विस्मितः। अक्षराभ्यासमाचष्ट सर्वशास्त्रविवित्सया ।। ३१ ।।

हिरण्यगर्भः प्राक्सृष्टां विष्टपानां ततीमिव। सस्मार सुकुमारोऽसौ जग्राह प्राक्तनीः कलाः ।। ३२ ।।

नदीमुखादिवाम्भोधिः सलिलान्यखिलान्यपि। अक्षरग्रहणव्याजाच्छास्त्राणि विविधान्यपि ।। ३३ ।।

बालक्रीडोचिताः सर्वाश्चकर्ष विविधाः कलाः। किरणा दर्पणे भानोरिव यत्र चकाशिरे ।। ३४ ।।

यद्यद्विद्योपदेष्टारो गत्वा[10] विशदतां मतेः। विस्मिताश्चित्रमत्रेदं किञ्चिल्लिखितवान्न वा ।। ३५ ।।

वर्णनाकर्णनामात्रादाचकर्ष सुबुद्धिमान्। कोशानधीतवानाशु स्तोत्राण्यपि महेशितुः ।। ३६ ।।

काव्यान्यपि विचित्राणि छन्दोऽलङ्करणानि च। गीतवादित्रनृत्यादिशास्त्रतत्त्वविचारवित् ।। ३७ ।।

आसन्नपञ्चवर्षोऽयं बालको न तु बालिशः। किशोराकारसंछन्नः कार्तिकेयो न संशयः ।। ३८ ।।

अवतीर्णोऽथ वा विष्णुः पुनर्बालत्वमाश्रितः। आधत्त रूपमपरं नूनं सत्यवतीसुतः ।। ३९ ।।

इत्येव[11] तुष्टुवुर्हृष्टाः स्प[12]ष्टमेव तमर्भकम् ।। ४० ।।

## विज्ञानकन्दः

स्वामिन् देशिकसद्भवीः सुरगवीपीयूषधिक्कारिणीः।
श्रीमच्छङ्करदेशिकेन्द्रशिशुतालीलासुधाधारिणीः।
आकर्ण्यातिमुदं बभार हृदयं श्रीचिद्विलासाग्रतो।
विज्ञातं[13] कथयेति पादकमले तस्याऽग्रहीत्सादरम् ।। ४१ ।।

## चिद्विलासः

विद्वान् विज्ञानकन्द त्वयि सभयनय प्रार्थय[14]त्यादरेण।
प्राज्ञे विज्ञातुमिच्छत्यपि गुरुचरितं वत्स किं वा न बोध्यम् ।।
वक्ष्याम्यग्रेऽपि जाग्रच्छृणुम[15] तृणवत्पश्यसि त्वं नु[15a] विश्वम्।
यद्यद्वृत्तं मयोक्तं तदनिशमखिलं मानसे संनिधत्स्व ।। ४२ ।।

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीचिद्विलासयतीन्द्रविज्ञानकन्दतपोधनेन्द्रसंवादे शङ्करविजय-विलासे षष्ठोऽध्यायः ।।

---

9. स। (A); (B); (C); 10. मत्वा। (A); (B); (C); 11. इत्येनं। (A) 12 सृष्ट°। (A); 13. किं जातम्। (A), (B); 14. °यित्वाऽ। (B); 15. श्रृणु तृणकण...त्वं तु। (A); (B); (C);

## ॥ अथ सप्तमोऽध्यायः ॥

ततः शिवगुरुर्यज्वा श्रीमान्धीमान् कुतूहली । पञ्चम्यां शरदि प्राप्तुमिच्छन्त्यामपि सत्वरम् ॥ १ ॥

प्रतीक्ष्य प्रतिभां वर्चस्तनौ दक्षिणतामपि । उपनीतिं यथाशास्त्रं विधातुमतनोन्मतिम् ॥ २ ॥

पञ्चमाब्दोपनीतश्चेद्ब्रह्मवर्चसमृच्छति । इति सूत्रं समालम्ब्य निजतेजःसमुज्ज्वलम् ॥ ३ ॥

ब्राह्मेन तेजसा भूयो नियोक्तुं द्रुतमैहत । तदुत्सवसदृग्वस्तुजातं द्रुतमनीनयत् ॥ ४ ॥

बन्धूनाह्वापयामास नानानीवृदुपाश्रितान् । पौरान्कलाविदो वृद्धान्[1] द्राविडाचारपारगान् ॥ ५ ॥

गीतवादित्रकुशलान् वैणिकान् पारिहासिकान् । पौराणिकान् वैणविकानितिहासविचक्षणान् ॥ ६ ॥

सभ्यानिभ्यान् पुरन्ध्रीश्च नीरन्ध्रसुगुणोज्ज्वलाः । लोकेशवासरेशादिसिद्धान्तपरिनिष्ठितान् ॥ ७ ॥

विचार्य बहुशः शास्त्रं निर्दुष्टे स्वेष्टसाधके । लोकबन्धौ धनेशस्य व्रजत्यपि हरित्तरम्[1] ॥ ८ ॥

सुमुहूर्ते सुनक्षत्रे सद्योगकरणान्विते[2] । वासरे भासुरे भव्ये दिव्यलक्षणलक्षिते ॥ ९ ॥

अतनिष्टोपनीतिं स समस्तैर्बन्धुभिर्युतः । कृतोपनीतिर्बालोऽपि हुतभुक्सूर्यतेजसा ॥ १० ॥

यथा व्यराजत तथा दीव्यद्ब्राह्मेण तेजसा । चकाशे नितरां सोऽपि शाणोल्लीढमणिर्यथा ॥ ११ ॥

दुर्निरीक्ष्यः स्वतो धाम्ना किं पुनर्ब्रह्मतेजसा । दक्षिणा[3]दीक्षितः सोऽपि वनीपकजनावनौ ॥ १२ ॥

पयोद इव सौवर्णवृष्टीस्तुष्टो ववर्ष हि । ऊर्णाः समुज्ज्वलास्तूर्णं[3a] पूर्णसौवर्णलांछनाः ॥ १३ ॥

दिव्यान्यपि च वासांसि भव्यान्याभरणानि च । विपश्चित्साच्चकाराऽसौ मणींस्तृणकणोपमम्[4] ॥ १४ ॥

वाडवान् दानशौण्डोऽसौ लक्षसंख्यानतर्पयत् । अनसूयाऽपि सासूया यत्पातिव्रत्यशङ्[4a]कया ॥ १५ ॥

अरुन्धतीसदृक्षार्या दारास्तस्याऽपि[4b] तून्मनाः । वाससा[4c] वचसा मृद्व्या द्राक्षामाक्षिकसद्रुचा ॥ १६ ॥

घनसारपटीरोरुरुनाभिसुगन्धिभिः । माल्यैरानन्दयामास पुरन्ध्रीरतिसत्वरम् ॥ १७ ॥

तोष[5]यामास मि[5a]ष्टान्नैर्देवता इव भक्तितः । वृषाचलेश्वरप्रीत्यै स्वच्छन्दं यच्छति स्म सा ॥ १८ ॥

पश्यतस्तस्य पुत्रास्यं सुधासूतिमिवोदितम् । पयोधेरिव कल्लोलाः प्रमदा ननमुर्हृदि ॥ १९ ॥

जयन्तेनेव मघवा वेधसेवाब्जलोचनः । प्रचकाशे निशानाथो बुधेनेव मखी द्विजः ॥ २० ॥

नगरं सादरं तच्च किशोरास्येन्दुदर्शनात् । निस्तुलानन्दसन्दोहसुधाम्बुधिकृताप्लवम् ॥ २१ ॥

ब्रह्मानन्दानुभूत्यैव[6] योगिनां स्तिमितं मनः । विस्मृत्या[6a]ऽन्यकथालापमवतस्थे समन्ततः ॥ २२ ॥

निर्वर्त्य तत्रभवतो बालकस्य विधानतः । उपनीतिमथो विद्वान् यज्वा ऋज्वा धियोज्ज्वलः ॥ २३ ॥

वेदानध्यापयामास साङ्गान्मङ्गलसङ्गिनः । पश्यँल्ललाटपदयोः शास्त्रे नेत्र इवाऽपरे ॥ २४ ॥

पुरतः पाठयामास सूत्रं जैनिमिनोदितम् । पाराशरीयसूत्राणि दिव्योपनिषदो मुदा ॥ २५ ॥

स्वतोऽस्य विमला प्रज्ञा किं पुनः शास्त्रनिर्मला। क्षीरं निसर्गतः स्वादु कथं स्याच्छर्करान्वितम् ॥ २६ ॥

वेदान्तार्थपरिज्ञानविमलाऽस्य तदा मतिः । कुम्भयोनेरिवा(लोका)दपामिव ततिर्बभौ ॥ २७ ॥

---

1. हरित्तटम् । (B); (C); 2. °करणाञ्चिते । (A); (B); (C); (B) and (C) read after this श्रीमदाचार्याणामुपनयनकथनम् । 3. दक्षिणो दीक्षितः । (A); 3a. तूर्णपूर्णं° । (B); 4. विपश्चि त्सोत्त्चकारासौ मणीन् तृणकणोपमा । (A) 4a. °व्रत्यकाङ्क्षया । (B); (C); 4b. °स्तस्याऽग्रजन्मनः । (B); (C); 4c. वचसा सहसा.......साम्यया । (B); °साम्यया । (C); 5. पोर्वयामास । (A) 5a. मृष्टान्नैः । (B), (C); 6. °भूत्येव । (A), (B); 6a. विस्तृ तास्य. । (B); .तान्य. । (C);



नूत्नानि[7] यानि शास्त्राणि दृष्टान्याकर्णितानि च । प्रतिजग्राह वेगेन स्वाभ्यस्ता[7a]नीव बुद्धिमान् ॥२८॥

सर्वासामपि विद्यानामादिकर्ता महेश्वरः । हरावतार एवाऽसौ स्वीचकार किमद्भुतम् ॥ २९ ॥

परस्परविरोधेन कुसुमास्त्रांतकद्विषोः । तदीयां न कलामेकां विलोकयितुमुद्यतः ॥ ३० ॥

तदैव निश्चिकायान्तः सत्यं ब्रह्म सनातनम् । दृश्यं तदन्य[8]द्यद्विश्वं पश्यन्नेव विनश्वरम् ॥ ३१ ॥

नैराश्यं यत्र कुत्राऽपि समता सर्वजन्तुषु । प्रपेदे स्थिरचित्तत्वं परमात्मनि सन्ततम् ॥ ३२ ॥

सर्वज्ञतां पिताऽऽलोक्य बालकस्य विसिस्मये । जहर्ष हर्षतर्षेण पाणिग्रहविधित्सया ॥ ३३ ॥

उद्योगं रचयामास जनकः स्वतनूभुवः । कुमारोऽपि हसन्नन्तस्तातः किं मे चिकीर्षति ॥ ३४ ॥

पीडायै संभवेन्नूनं कृतं यत्पाणिपीडनम् । नेच्छामीति यदि ब्रूयां न शृणोत्यतिमोहतः ॥ ३५ ॥

न विजानाति मत्तत्त्वं पुत्रमित्येव वेत्त्यसौ । किन्तु दोषः प्रसज्येत तातवाक्यतिरस्कृतेः ॥ ३६ ॥

न स्वायुरभिजानाति किञ्चिदेवावशेषितम् । आस्तां तन्मदभीष्टं[8a] तु स्पष्टमग्रे भविष्यति ॥ ३७ ॥

इति निश्चितवानन्तस्तूष्णीकत्वमुपेयिवान् । उद्वाहं जनकः सोऽस्य विधित्सुः प्रत्यहं सुधीः ॥ ३८ ॥

पदार्थसार्थानाहर्तुं समर्थानर्थवज्जनान् । प्राहिणोद्द्रुहिणप्रख्यः[9] संख्यावज्जनकोविदः ॥ ३९ ॥

सुतपाणिग्रहोद्योगसमाहितमनास्तदा । न्यवर्तत निवृत्तान्यव्यापारकलितादरः ॥ ४० ॥

### विज्ञानकन्दः

आकर्ण्याकर्ण्य कर्णावमृतमिव कथां देशिकेन्द्रोपनीतेः ।
उद्भूतोत्कर्षतर्षाञ्चितपुलकमृतौ सत्यमेतावभूताम् ।
तत्तादृग्भूरिधाम्नो[10] व्यपगतविषयव्यापृतेः पूतनाम्नः ।
को वोद्योगो विवाहे कथय किमभवच्चिलाद्विसाऽग्रतो[11]मे ॥ ४१ ॥

### चिद्विलासः

युक्त्या विज्ञानकन्द प्रतिकलविलसद्भूरिभक्त्याऽनुयुक्त्या[11a] ।
मत्या नित्यानुसृत्या प्रतिपदविसरद्देशिकायत्तवृत्त्या ।
अन्तेवास्यग्रणीस्त्वं तव सुगुणगणा नाग्रतो वर्णनीया
भव्यं भाव्यं च दिव्यैः कलय तदखिलं वृत्तमत्यद्भुतं तत् ॥ ४२ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीचिद्विलासयतीन्द्रविज्ञानकन्दतपोधनेन्द्रसंवादे शङ्करविजय-विलासे उपनयनकथनं नाम सप्तमोऽध्यायः ॥

---

7. न्यूनानि । (A); (B); (C); 7a. स्वभ्यस्तानिव । (B), (C); 8. तदन्यथा विश्वं । (A) 8a. तत्तन्मदिष्टं । (B); (C); 9. °प्रख्यसंख्या° । (A) 10. °म्नोऽप्यवगत.....व्यावृतेः । (A); म्नेऽप्यव.....व्यापृतेः । (B); °व्यावृतेः । (C); 11. °ग्रतोऽपि । (A); (B); (C); 11a. °भक्त्या सुयुक्त्या । (B);

# ॥ अथाऽष्टमोऽध्यायः ॥

ततः परं स कुतुकी श्रीमान् शिवगुरुर्मखी । नियतेर्येन केनाऽपि दुर्लङ्घ्यत्वादनीदृशः ॥ १ ॥
कदाचिदीश्वरे नित्ये सत्ये चित्तं निधाय सः । ध्यायन्नन्तः परं तत्त्वंस्तस्थि[1]वान् सुविनिश्चलः ॥ २ ॥
पितुरुत्क्रान्तिसमयं निरीक्ष्याऽथ स शङ्करः । व्यधत्त सत्वरं साक्षात्कृतिमेष तनूभवः ॥ ३ ॥
अन्तर्बहिः पुरः पार्श्वे[1a] शर्वमेवावलोकयन् । कैलासे कथमास्तेऽसाविति द्रष्टुमना इव ॥ ४ ॥
निमीलयदथाक्षि स्वं जोषमेषोऽवतिष्ठत । ततो विज्ञाय भार्याऽऽर्या पतिं लोकान्तरं गतम् ॥ ५ ॥
सहैव तेन निर्गन्तुमैच्छद्द्रष्टुमिवाम्बिकाम् । सुकुमारो मतिं मातुरन्तरालोच्य सर्ववित् ॥ ६ ॥
संन्यधत समुद्धर्तुं धात्रीमघ[2]पयोनिधेः । सा निरीक्ष्य विरूपाक्षमग्रतस्तनुजाकृतिम् ॥ ७ ॥
जाग्रती मन्युमुत्सृज्य सान्त्विता निजबान्धवैः । अचीकरत्सुतेनैव पत्युः[3] साध्वौर्ध्वदेहिकम् ॥ ८ ॥
द्राविडाचाराविधिना मान्यसौजन्यशेवधिः । यायजूकोक्तविधिना मखिभिः सुसमाहिता ॥ ९ ॥
तनूभवोऽथ विधिषु यद्यदुक्तं पुरोधसा । चकार श्रद्दधानोऽसौ मानी मौनी समुत्सुकः ॥ १० ॥
शोभते ननु सा लीला याऽवतारसदृग्विधा । इत्थं समाप्य विधिवज्जनकस्यौर्ध्वदेहिकीः ॥ ११ ॥
निर्विक्रियः क्रियाः सर्वाः शिवसायुज्यदायिनीः । सवित्र्या सुचरित्रोऽसौ पुनश्चित्रगुणोज्ज्वलः ॥ १२ ॥
शुशुभे स तदा दित्या[4] सत्येव हिमदीधितिः तनयेनान्विता साऽपि न्यवसत्सुहिता गृहे ॥ १३ ॥
ततः कदाचन स्नातुं चूर्णीनद्या जलाशये । अवतीर्णं विदीर्णास्यो ग्राहो जग्राह पादयोः ॥ १४ ॥
गृहीतस्तेन नक्रेण पादे सर्वविदां वरः । उदयुङ्क्त ततः पादौ मोचयन्नतियत्नतः ॥ १५ ॥
नात्याक्षीच्चरणौ तस्य ब्रह्मशापवशं गतः । न जहात्येष नक्रो मां वपुर्व्यर्थीभविष्यति ॥ १६ ॥
अन्त्याश्रमं ग्रहीष्यामि यत्तदग्रे भवत्वलम् । इति निश्चित्य मनसा संन्यासं कर्तुमुत्सुकः ॥ १७ ॥
ततस्तटगतां[5] धात्रीं वित्रसन्नाजुहाव सः । मातरेष महान् ग्राहो पादे[6] जग्राह नोज्झति ॥ १८ ॥
अन्त्याश्रमं करि[7]ष्यामि देह्याज्ञामम्ब सत्वरम् । इत्थमुक्ताऽथ सा धात्री चेतस्यालोच्य निश्चिता ॥१९॥
संन्यासाश्रममाश्रित्य जीवत्वेष तनूभवः । वत्सवात्सल्यमुत्सृज्य तथाऽऽस्तामित्यवोचत ॥ २० ॥
स्वीचकार ततस्तूर्णं संन्यासं व्याससंनिभः । नक्रोऽसावपचक्राम विक्रान्त इव विष्णुना ॥ २१ ॥
गन्धर्वाकारमालम्ब्य नक्रः शक्रसमप्रभः । भक्त्या प्रदक्षिणीकृत्य देशिकेन्द्रं तमादरात् ॥ २२ ॥
प्रणम्य बहुधा स्तुत्वा स्वोदन्तं प्रत्युवाच तम् ।* नाम्ना पुष्परथः ख्यातो गन्धर्वाणामधीश्वरः ॥ २३ ॥
अहं शप्तः पुरा धात्रा तदाज्ञापरिलङ्घनात् । प्रार्थितः स च भूयोऽपि शापस्यान्तमभाषत ॥ २४ ॥
चतुर्भिः पार्षदैः साकं भगवान्नीललोहितः । श्रौतस्मार्तप्रतिष्ठार्थं मानुषाकारमाश्रितः ॥ २५ ॥
दुर्मतानि विनिर्जेतुं शङ्कराचार्यसंज्ञया । युगधर्मानुसारेण महेशोऽवतरिष्यति ॥ २६ ॥
तदा तत्पादपाथोजरजोलेशानु[8]मर्शनात् । त्वं शापान्मोक्ष्यसे तूर्णमित्थमाह पितामहः ॥ २७ ॥
अतस्तद्दर्शनायत्तचित्तश्चूर्णीजलाशये । नक्रीभूय निलीनः सन्न्यवसं यतिपुङ्गव ॥ २८ ॥
इदानीं त्वत्पदाम्भोजरजःसङ्गाद्विकल्मषः ।[8a] जातोऽहं भगवन् साक्षात्त्वमेव पुरशासनः ॥ २९ ॥

1. स्थितवान् । (C); 1a. सर्वं° । (B); 2. धात्रीमिव पयो° । (A) 3. सा त्वौर्ध्वं° । (A)
4. तदादित्य सत्ये वा । (A); चित्या वज्रीव स तु देशिकः । (C); 5. तटागतां । (C); 6. पादौ । (C);
7. ग्रहीष्मामि । (A), (B), (C); * 'A' does not read st. 23=c, d, st. 24 & st. 25—a, b;
8. °लेशाभि° । (A) °लेखाभि° । (B), (C); 8a. भूतो° । (B); जातोऽस्मि । (C);



कृतार्थोऽहं त्वया नूनं यास्यामि त्रिदिवं पुनः । अनुगृह्णीष्व मामद्य बालिशं देशिकोत्तम ॥ ३० ॥
इति विज्ञाप्य गन्धर्वः स जगाम त्रिविष्टपम् । आर्या तटगता सर्वं वृत्तमेतद्व्यलोकत ॥ ३१ ॥
विस्मिता हर्षतर्षेण न शशाकाऽभिभाषितुम् । ततस्तीरमुपागत्य[9] चूर्ण्या[9a]स्तीर्णं यतीश्वरः ॥ ३२ ॥
मातरं प्रणिपत्याऽह देह्याज्ञां प्रव्रजाम्यहम् । याहि सद्म निराशङ्का वर्तस्वात्मनि शङ्करम् ॥ ३३ ॥
ध्यायन्ती परमात्मानं तमेव परमं मुहुः । यदा स्मरसि मामम्ब तदा मां त्वत्समीपगम् ॥ ३४ ॥
विद्धि बुद्धिमदग्रण्ये जागृहि त्वमनुक्षणम् । व्यग्रतामुग्रतां साग्रां निरीक्ष्याग्रे[10] निरीक्ष्यताम् ॥ ३५ ॥
इत्युक्त्वा मातरं सोऽयं प्रणिपत्य पदं स्पृशन् । निर्गमय्य तदा सद्म जननीं सान्त्ववादनैः[11] ॥ ३६ ॥
निर्जगाम स्वयं तूर्णं क्रमसंन्यासलब्धये । निजदेशिकताभाग्यपदभाजनमौनिनम्[12] ॥ ३७ ॥
अन्विष्य[13] शङ्कराचार्यः सर्वत्र जगतीतले । क्रमेण बदरीं प्राप[14] यत्र विष्णुस्तपस्यति ॥ ३८ ॥
जनैर्मुनिभिराकीर्णां सौवर्णाभ्यर्णवेदिकाम् । वेदशास्त्रकथालापलालसाखिलदिक्तटाम् ॥ ३९ ॥
निर्वैरविहरत्सत्त्वजातिजातसमुत्कटाम् । निकटोटजनिर्विष्टतपस्यत्सन्मुनिव्रजाम् ॥ ४० ॥
चम्पकाशोकपुंनागकिंशुकादितरुस्रजम् । माधवीगुञ्जपुञ्जान्तर्मञ्जुसिञ्जन्मधुव्रताम् ॥ ४१ ॥
मानसैरिव सर्वत्र मानसैरिव[15] मौनिनाम् । सरोभिर्विमलैर्व्याप्तां फुल्लकल्हारसौरभैः ॥ ४२ ॥
बदर्यो भूरुहो यत्र फलन्ति स्वर्द्रुमा इव । तत्रैकत्र समासीनमुटजाभ्यन्तराङ्गणे ॥ ४३ ॥
ध्यायन्तं परमेशानं व्याघ्रकृत्तिकृतासनम् । भूत्युद्भासितसर्वाङ्गं पौण्डरीकोत्तरच्छदम् ॥ ४४ ॥
रुद्राक्षमालिकाजालसमाकलितविग्रहम् । निस्तरङ्गमिवाम्भोधिं निर्विकारमिवाशुगम्[15a] ॥ ४५ ॥
निस्तमस्कमिवादित्यं भास्वन्तमिव पावकम् । गोविन्दभगवत्पाददेशिकेन्द्रमलक्षयत्[16] । ॥४६॥
विलोक्याऽतिमुदं जग्मे किंस्विदेष विसिस्मये । खनता मूलिकां लब्धुं धरणीमञ्जनेच्छया ॥४७॥
सुवर्णपूर्णमथिकमीयिवानिव शेवधिम्[17] । अहो मदर्थमेवाऽयमवतीर्णो धरातले ॥४८॥
उपदेष्टुं वसिष्ठो वा शुको वा कश्यपोऽथ[18] वा । पाराशरिरिहास्तीति शृणुमः खलु सर्वतः ॥४९॥
स एवाऽयमिहाऽस्ते[19] वा नाऽत्र कार्या विचक्षणा । यो वा को वाऽस्तु महसा भासते भानुमानिव ॥५०॥
अनेनैवोररीकुर्मः क्रमसंन्यासलक्षणम् ॥५१॥

## विज्ञानकन्दः

श्रील श्रीचिद्विलास त्वयि वदति कथां शङ्कराचार्यनेतुः ।
पुण्ड्रेक्षावग्रभागाद्ग्रसति[20] मधुरिमा पर्वपर्वातिशेते ।
तद्वद्वाणी प्रवीणा विरचयति परानन्दमन्तर्निरूढा ।
स्वामिन्नग्रे समग्रं कथय किमभवद्वृत्तमत्युद्भुतं मे ॥५२॥

## श्रीचिद्विलासः

प्रेयन् विज्ञानकन्द प्रचुरगुरुकृपालब्धविज्ञानसीमन् ।
उद्वाहोद्योग[21]वार्ताश्रवणकृतजनुर्द्वापरस्याऽस्य शान्तिः ।
जाता[22] वा तात तादृग्विधमहिमभृतामादरः कः कलत्रे-।
-ऽप्यग्रे[23] चित्रं चरित्रं कलय हृदि परं वत्स यद्वद्वदामि ॥५३॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीचिद्विलासयतीन्द्रविज्ञानकन्दतपोधनेन्द्रसंवादे शंकरविजयविलासे[24] अष्टमोऽध्यायः ॥

9. °गम्य । (A), (B), (C); 9a. तूर्णं (B); 10. निगृह्याग्रे । (A), (B), (C); 11. °वादिनीः । (A); 12. मानिनम् (A), (B); 13. अन्वीक्ष्य । (A); अन्विष्यन् (B), (C); 14. प्राप्य ।(A); 15. मानसीरिव मानिनाम् । (A); 15a. °मिवांशु° । (B); 16. °लक्ष्यत । (A), (B); 17. °पूर्णमधिकं लब्धवानवशे निधिम् । (A); 18. काश्यपो° । (A); 19. °स्त्येव । (A), (C); 20. पुण्ड्रे के त्वग्रभागात् ग्रसत । (A); पुण्ड्रेक्षोरग्रभागाद्रसति । (B); (C); 21. उद्वाहायोग° । (A) 22. ज्ञाता । (A) 23. व्यग्रे । (A), (B); 24. गोविन्दभगवत्पाददर्शनं नाम । (A), (B), (C);

# ॥ अथ नवमोऽध्यायः ॥

ततः श्रीदेशिकेन्द्रोऽपि लीलाकलितविग्रहः । चत्वारा[1]स्यान्यपास्यैकमाश्रितः स्मरजित्खलु ॥१॥
प्रदक्षिणत्रयं कृत्वा प्रणम्य परतः स्थितम् । दृष्ट्वा[2] श्रीशङ्कराचार्यं प्रश्रयावनताननम् ॥२॥
श्रीमद्गोविन्दभगवत्पूज्यपादोऽब्रवीत्ततः । को भवान् कुत आयातः कुत्रत्यः किं नु नाम ते ॥३॥
को वा नी[3]वृदिहागत्य दिनानि कति वाऽभवन् । किं कारणमिहायातो वद सर्वं सविस्तरम् ॥४॥

## शङ्कर उवाच

शुश्रूषते भवच्चित्तं यदि तच्छ्रूयतां गुरो । जातोऽहं केरले देशे श्रीमच्छिवगुरोर्द्विजात् ॥५॥
किशोरतादशायां मे तातो लोकान्तरं गतः । मात्रैव पालितो नित्यं न्यवसं सुहितो[4] गृहे ॥६॥
यथोचितं यथाशक्ति यथामत्यखिलाः कलाः । अधीताः सकृदेवाऽहं मात्रा स्नातुं समागतः ॥७॥
चूर्णीतरङ्गिणीतोयं स्पर्शमात्रशुभावहे । महान्[5] ग्राहोऽथ जग्राह पादे शापधृताकृतिः ॥८॥
नाऽजहाच्चरणौ सोऽपि नक्रः क्रोधसमन्वितः । वपुर्मे निष्फलं याति संन्यस्तं चेत्तु सार्थकम् ॥९॥
इति निश्चित्य वेगेन संन्यासाश्रममाद्[6]तम् । तेनाहं सत्वरं मुक्तः सोऽपि शापेन तत्क्षणात् ॥१०॥
आदातुं क्रमसंन्यासलक्षणं तद्विचक्षणम् । अन्विष्यन्नुर्वरां सर्वां क्रमादिह समागतः ॥११॥
अस्मत्प्राक्तनजन्मीयसुकृतातिशयादिह । निरीक्ष्य भगवत्पादपङ्कजं साङ्कुशध्वजम् ॥१२॥
अन्यतो[7] गमने वाञ्छा पूर्वपक्षो[8] व्यजायत । अनुजानीहि मे सर्वं शर्वप्रतिमसद्गुरो ॥१३॥
कृतार्थं कुरु मामद्य त्वत्कटाक्षनिरीक्षणात् । इत्युक्त्वा पुरतस्तस्थौ बद्धाञ्जलिरतन्द्रितः ॥१४॥
इहामुत्रफलत्यागं नित्यानित्यविवेकताम् । शमादिगुणसम्पत्तिं मुमुक्षुत्वं वितन्द्रिताम् ॥१५॥
देहाभिमानराहित्यमीषणत्रयमोक्तृताम् । इत्यादिकान् गुणांस्तस्मिन्विलोक्याऽतीवनिर्मलान् ॥१६॥
संन्यासाश्रमयोग्योऽयमिति कृत्वा हृदन्तरे । गोविन्दभगवत्पाददेशिकेन्द्रो मुदान्वितः ॥१७॥
तमाहूय निजाभ्यर्णमालिङ्ग्य प्रणतं मुहुः । मूर्ध्न्याघ्राय निवेश्याङ्के सादरः प्रश्रयान्वितम् ॥१८॥
महावाक्यानि दिव्यानि तत्त्वमस्यादिकान्यपि । मुमुक्षुभिः सदा ध्येयं रहस्यं यद्यदस्ति तत् ॥१९॥
उपादिशदतः[9] सर्वं वेदान्तार्थविनिश्चितम् । संन्यासिभिर्विधेयांस्तु विश्वेशस्मृतिचोदितान् ॥२०॥
दत्वाऽथ क्रमसंन्यासं बोधयामास तत्त्ववित् । सोऽहमस्मीति मत्यै[9a]व सर्वत्र समदर्शनम् ॥२१॥
न ब्रह्मान्यकथालापो नाऽलोक्या वामलोचनाः । पुत्रमित्रसुवस्त्रादौ धने धान्ये[10] मणावपि ॥२२॥
मृत्स्नायामश्मकाष्ठेषु समदृक्तव[10a] वर्तताम् । अत्याहारं निराहारं हिंसामनृतभाषणम् ॥२३॥
परिग्रहमसूयां च माननां च विमाननाम् । विसृज्य निर्ममो भूत्वा विहर त्वमहर्निशम् ॥२४॥
जीवन्मुक्तस्तनुं धृत्वा[10b] चर दग्धपटोपमाम् । कौपीनं कटिसूत्रं च धत्स्व दण्डकमण्डलू ॥२५॥
काषायं वल्कलं वाऽपि शीतातपनिवृत्तये । नैकत्र नगरे वासो भिक्षा चैकत्र सद्मनि ॥२६॥
न कर्तव्या त्वया नित्यमन्तेवासिजनाग्रणीः । यदुक्तं तत्परित्यज्य भिक्षामात्रकृतादरः[10c] ॥२७॥

1. चत्वार्यास्या° । (A), (C); 2. दृष्टवाऽसौ शंकरा° । (A) 3. भवानि° । (A) 4. सुहृदो । (A); सुखितो । (B); 5. महानक्रो° । (A) 6. °माश्रितम् । (B); 7. अन्यत्र । (A) 8. °ऽप्यजा° । 9. उपादिशत तत्सर्वं । (C); 9a. मत्वैव । (B); 10. धनधान्यमणावपि । (A) 10a. °दृग्भव सर्वदा । (B); (C); 10b. दग्ध्वा । (B); (C); 10c. °कृताशनः । (B); (C)



धनसम्पादनोद्युक्तः स यतिः परिनिन्दितः । निर्गुणं निष्कलं ब्रह्म निर्विकल्पं निरञ्जनम् ॥२८॥
तद्ब्रह्माऽहमिति ज्ञात्वा विहरस्व यथासुखम् । इत्याज्ञाप्य च तं शिष्यं गोविन्दभगवान्गुरुः ॥२९॥
सद्गुरूक्तेन विधिना ध्यायन्नन्तः परं शिवम् । अनादिमध्यान्तमजमवृद्धिक्षयमच्युतम् ॥३०॥
तद्ब्रह्मेति[10d] विनिश्चित्य विसृज्येतरकाङ्क्षिताम् ।
आत्मक्रीडश्चात्मरतिः क्रियावान् देशिकेश्वरः ॥३१॥
आत्मानमभयं शुद्धं मत्वा धीरो न शोचति । इत्याद्युपनिषद्वाक्यैर्निश्चित्यात्मानमीश्वरम् ॥३२॥
ध्यायन्नन्तः सदा तस्थौ निस्तुलानन्दतुन्दिलः । जातुचिच्छङ्कराचार्यदेशिकेन्द्रो विचक्षणः ॥३३॥
स्वामिन् विज्ञाततत्त्वार्थ निर्मलोज्ज्वलमानस । शिष्यसन्देहसन्दोहमोहवारणभास्कर ॥३४॥
श्रोतुं वाञ्छति मे चित्तं देशिकेन्द्रपरम्पराम् । कथयित्वा पुनीहीमं त्वामेव शरणागतम्[11] ॥३५॥
ततः प्रोवाच तुष्टात्मा गोविन्दभगवद्गुरुः । सावधानेन मनसा श्रृणु वक्ष्यामि तेऽधुना ॥३६॥
ईशानः सर्वविद्यानामीश्वरः सर्वदेहिनाम् । ब्रह्म ब्रह्माधिपः सोऽयं सर्वेषामपि[12] देशिकः ॥३७॥
सर्वाश्चोपदिशन्[12a] विद्यास्तत्त्वज्ञानैकसाधनाः । निष्कलङ्कां शिवाद्वैतविद्यामप्युपदिष्टवान् ॥३८॥
विधोरिव कलामेकां सर्वज्ञमुकुटस्थिताम् । तथा रहस्यमखिलं माधवं गिरिजाधवः ॥३९॥
श्रीधवेन[13] ततोऽवादि तनयाय स्वयंभुवे । वसिष्ठायाऽवदत्स्रष्टा वरिष्ठाय तपस्विनाम् ॥४०॥
वसिष्ठो मुनये प्राह शक्तयेऽनघशक्तये । शक्तिः पराशरायोचे विनयानतचेतसे ॥४१॥
तनूभुवेऽथ व्यासाय श्रेयोविन्यासभूमये । उवाच विधवत्सोऽपि या या विद्याः शिवागताः ॥४२॥
शुकाय जगदे तेन विनयोज्ज्वलचेतसे । स एव गौडपादार्यदेशिकेन्द्रमुपादिशत् ॥४३॥
साक्षात्स एव भगवानस्माकं गुरुरीरितः । श्रीगौडपादयतिराट् द्विबाहुरपरः स्वभूः ॥४४॥
वेदवेदाङ्गतत्त्वज्ञो निर्माता निखिलस्मृतेः । जैमिनीयानि सूत्राणि सार्थानि त्रिरधीतवान् ॥४५॥
दिव्योपनिषदो वेत्ता साभिप्रायकृतोदयः । पाराशरीयसूत्राणामपि तत्त्वार्थवित्तमः ॥४६॥
निर्मथ्य शास्त्रवाराशिं युक्तिमन्थेन नित्यशः । अद्वैतामृतमासाद्य जीवन्मुक्तश्चरत्यसौ ॥४७॥
किं पुनर्बहुनोक्तेन मानवाकारमाश्रितः[14] । अवतीर्योर्वरां सर्वां दुर्मतोद्धत[15]विह्वलाम् ॥४८॥
पातुं कृतसमुद्योगो जगजाजानिरेव सः । जगत्संरक्षणायैव ध्वान्तध्वान्तनिवृत्तये ॥४९॥
चरन्त्येव महात्मानस्तादृशा धरणीतले । बुद्धिमानसि भोः शिष्य विज्ञाताखिलदर्शन ॥५०॥
पाराशरीयसूत्राणां दशोपनिषदामपि । गीतासहस्रनाम्नां च रुद्राध्यायस्य तत्त्वतः ॥५१॥
अर्थान् केऽपि न जानन्ति व्यत्यस्तान् कथयन्त्यहो ।
तेषां रचय भाष्यं त्वमद्वैतार्थप्रकाशकम् ॥५२॥
इत्युक्त्वा चन्द्रमौलीशं रत्नगर्भं गणाधिपम् । शिवात्क्रमादिहायातं ददौ तस्मै स देशिकः ॥५३॥

## श्रीशङ्कराचार्यः

देशिकेन्द्र करुणासदृशा[16a] त्वया । पावितोऽस्मि शिवतत्त्वबोधनात् ।
त्वादृशो गुरुरनेकजन्मनाम् । पुण्यतस्त्विह तु लभ्यते जनैः ॥५४॥

10d. तद्ब्रह्मैवेति निश्चित्य । (B); (C); 11. शरणं गतम् । (A); (B); (C); 12. °षामादिदे° । (A); (B); (सी); 12a. °पनिषद्विद्या° । (B); (C); 13. श्रीधरेण । (A) 14. °वासितः । (A); °मास्थितः । (B); (C) 15. दुर्मतोद्याति° । (A); °द्धति । (B); 16a. करुणा दृशात्त्वया । (B);

## विज्ञानकन्दः

संन्यासं क्रमशो निशम्य स ततः[16b] श्रेयः फलप्रापकम् ।
श्रीमच्छङ्करदेशिकेश्वरमणेर्भक्तोऽद्य[17] चिन्तामणेः ।
चेत : पूततमं बभूव नितरां श्रीचिद्विलासाग्रतः
तेनाऽकारि किमद्भुतं कथय तद्विश्वैकरक्षाकृता ।।५५।।

## चिद्विलासः

विद्वन् विज्ञानकन्द प्रगुणगुणमणिश्रेणिनिश्रेणिमूर्ते ।
भूयस्ते देशिकेन्द्राभ्युदयनिशमने कौतुके सातिरेकम् ।
अन्तर्वाणिव्रजेषु[18] त्वदुपमसुकृती नो मयादर्शि को वा ।
तुष्ट : पुष्टं यदग्रे समजनि कथये वत्स संश्रूयतां तत् ।।५६।।

**इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीचिद्विलासयतीन्द्रविज्ञानकन्दतपोधनेन्द्रसंवादे शङ्करविजय-विलासे नवमोऽध्यायः ।।**

16b. सततश्रेयः फल°। (B); 17. भक्तोघ°। (A); (B); (C); 18. वाणिद्विजेषु। (A)



# ।। अथ दशमोऽध्यायः ।।

ततः सद्गुरुसंदेशलब्धविज्ञानशेवधिः। शङ्कराचार्यगुरुराड्राका विधुरिवाबभौ ।।१।।
भाष्यं चोत्तरमीमांसासूत्राणामतिविस्तरम् । दशोपनिषदां दिव्यं चकारातिमनोहरम् ।।२।।
तथैव भगवद्गीताभाष्यं भूष्यं[1] सुरैरपि । विष्णोः सहस्रनाम्नां च श्रीरुद्रस्य च निर्मलम् ।।३।।
सौन्दर्यलहरीस्तोत्रं स्तोत्राणामुत्तमोत्तमम् । स्तोत्राण्यन्यानि दिव्यानि पवित्राणि व्यधत्त सः ।।४।।
पाठयन् सुधिय : शिष्यान् भाष्यं स्वेन विनिर्मितम् । प्रविविच्य तदीयार्थान् बोधयन्नतियत्नतः ।।५।।
अवर्तत निवृत्ताशो यत्र कुत्रापि वस्तुनि । प्रमना विमना[2]नन्दसंदानितनिजान्तरः ।।६।।
एतस्मिन्नन्तरे विप्रो विदिताखिलदर्शन :। निर्णेतुं स तदा[3]वर्णा ब्रह्म नित्यं निरञ्जनम् ।।७।।
गुरू[4]नन्वेष्टुमुद्युक्तो विसृष्ट : स्वेष्टबान्धवैः। यत्रास्ते शङ्कराचार्यदेशिकेन्द्रो विशारद : ।।८।।
तं प्रदेशं समासद्य भक्तिभारसमावृतः। प्रदक्षिणं परिक्रम्य प्रणम्य विनयान्वितः ।।९।।
तं दृष्ट्वा शङ्कराचार्यदेशिकेश्वरपुङ्गव :। किमर्थमागतोऽसि त्वं किशोर इव लक्ष्यसे ।।१०।।
पितरौ तौ कुतो यातौ मत्त : किं ते प्रयोजनम् । इति पृष्टस्तदोवाच स्वीयोदन्तमशेषतः ।।११।।
अहोबलमुपाश्रित्य माधवाचार्यनामवान् । क्षेत्राणामुत्तमं क्षेत्रमध्यवास्त प्रशस्तधीः ।।१२।।
विज्ञाने वाक्पतिः[5] सोऽयं सम्पदा धनदोपमः। तस्य पत्नी सुशीला सा पतिभक्तिपरायणा ।।१३।।
नाम्ना लक्ष्मीरिति[6] ख्याता छायेवासीद्दिनेशितु :। निरपत्यतया[7]ऽपत्यलोकान्तरतिरस्कृतेः ।।१४।।
विविग्नौ तौ विनिर्मग्नौ चिन्तानवधिनीरधौ। प्रह्लादमानसाह्लादकलिताद्भुतविक्रम : ।।१५।।
आविर्भवन् पुनः[8] स्तम्भादनायासात्तदायसात् । नृकेसरितनुर्भूत्वा हिरण्यकशिपुं रिपुम् ।।१६।।
जघान नखरैरेवं तं देवं शरणं गतौ। प्रसन्नः सोऽप्यदात्पुत्रं विष्णुशर्माणमेतयोः ।।१७।।
स एवाऽहमिहायातो पितरौ मे स्वराश्रितौ। धनधान्यादिकं वस्तु नैराश्येन विसृज्य च ।।१८।।
स्वप्ने मम समागत्य स साक्षान्नरकेसरी। शङ्कराचार्यमन्वेहि स तु त्वां पावयिष्यति ।।१९।।
इत्युक्त्वाऽन्तर्दधे देवस्त्वत्समीपं ततोऽभ्य[9]गाम् । पवित्रय[9a] कृपासिन्धो शरणागतवत्सल ।।२०।।
ज्ञानविज्ञान[10] वाराशे श्रीमन् शङ्करदेशिक। स्वीयां प्रवृत्तिमुक्त्वाऽथ शङ्करं शरणं गतः ।।२१।।
त[11]दीयचरणाम्भोजमवलम्ब्यैव तस्थिवान् । तं बालं पुरत : पश्यन् सप्तसप्तिनिभप्रभम् ।।२२।।
विरक्ततामतीवाऽस्य प्रतिभामप्यनीदृशीम् । निरीक्ष्य प्रददौ तस्मै संन्यासं क्रमसङ्गतम् ।।२३।।
ददौ सनन्दनाभिख्यां सर्वलोकैकविश्रुताम् । तेन प्रथमशिष्येण रराज यतिपुङ्गव : ।।२४।।
शरद्यधिकदीप्तेन भानुना भानुमानिव। तदा गुरु : स्वगुरवे स्वकृतं भाष्यसन्ततिम् ।।२५।।
प्रदर्श्य[12] तेन तुष्टेन गुरुणाऽतीवमानतः[13]। स्वामिन्नाज्ञां प्रदेह्यद्य चिकीर्षति मनो मम ।।२६।।
अटितुं क्षेत्रतीर्थानि पवित्राणि समन्तत :। इत्युक्तवन्तं प्रणतमुत्थाप्यालिङ्ग्य सादरम् ।।२७।।
जाने त्वदिङ्गितं साङ्गं वत्स मे श्रृणु भाषितम् । गुरुपादोदकं तीर्थं पुण्यक्षेत्रं तदाश्रयम्[14]।। २८।।

1. भाष्यं । (A), (B), (C); 2. विमला°। (A), (B,) (C); 3. तदा वर्णी। (A), (B), (C); 4. गुरुम°। (A) 5. चाकृतिः। (A) 6. लक्ष्मीति विख्याता। (A) 7. °तया पत्या लोका°। (A), (B), (C); 8. पुरः। (A), (B); 9. °त्यगाम्। (A) 9a. पवित्रितजगज्जालशरणा°। (B); (C) 10. ज्ञातविज्ञात°। (A) 11. यदीय°। (A) 12. प्रदेश्य। (A) 13. °तीव मानितः। (A), (B), (C); 14. °श्रयः। (A), (B), (C)

मन्त्रोपदेशस्तद्वाक्यश्रुतिरेव न चेतरत्। स्नानं निर्मलता बुद्धेः शौचमिन्द्रियनिग्रहः ।।२९।।
जीवन्मुक्तिरिहैवाऽसौ विमुक्तिर्विषयेषु या। नियमो निग्रहः क[15]म्प्रचित्तवृत्तेरनुक्षणम् ।।३०।।
[16]तीर्थयात्रादिकं यद्यत्कायायासफलप्रदम्। विद्यतां मानसे नूनं सोऽहमित्येव भावना ।।३१।।
ज्ञानमेव हि तत्सर्वं विमलीकुरुते मनः। न हि ज्ञानेन सदृशं त्रिषु लोकेषु विद्यते ।।३२।।
सर्वव्यापि सदा ब्रह्म सर्वतोऽ[17]प्यवतिष्ठते। सगुणोपासना यद्यत्क्रमनिःश्रेयसाप्तये ।।३३।।
आत्मज्ञानपरो भूत्वा विसृज्य निखिलव्यथाः। ब्रह्मैवाहमिति ध्यायन्निवसात्रैव सन्ततम् ।३४।।
इत्यादि कथयत्येव गोविन्दभगवद्गुरौ। तदा सस्मार जननी पुत्रं शङ्करदेशिकम् ।।३५।।
आसन्नमरणा साध्वी बुद्ध्वा तत्सत्यभाषितम्। ज्ञातवाँस्तत्क्षणादेव शङ्कराचार्यदेशिकः ।।३६।।
तद्वृत्तं समुदीर्याऽथ गुरोराज्ञामवाप्य सः। यत्राऽस्ते जननी देशे तं देशं प्राप्य सत्वरम् ।।३७।।
प्रसुवं तादृशं दृष्ट्वा क्वचिन्निर्गन्तुमक्षमाम्। चूर्णी सरिद्वरां तूर्णं गृहाभ्यर्णमनीनयत् ।।३८।।
अम्बार्थं यदि[18] यन्नीता तटिनी सद्मसंनिधिम्। अम्बातरङ्गिणीत्येव कथ्यतेऽद्यापि सा खलु ।।३९।।
मुमुर्षुं मातरं वीक्ष्य विप्रान् सर्वानथाऽह्वयत्। अनागतेषु तेष्वेष शशाप यतिदूषकान् ।।४०।।
अद्यप्रभृति भो[19] विप्रा भवत ज्ञानवर्जिताः। अनाचारैकनिरताः कृषिवाणिज्यकारिणः ।।४१।।
भवद्देशोऽपि यतिनां वासयोग्यो न जायताम्। अथ वा यदिहायातः पतितः स भविष्यति ।।४२।।
शैवं भुजङ्गमाहाऽथ शङ्कराचार्यदेशिकः। तुष्टाः शैवगणाः सद्यो मातरं नेतुमुद्यताः ।।४३।।
गणान् भयंकरान् शूलान् धृत्वा[20] निजपरिष्कृतान्।
त्रस्ता तैः सह निर्गन्तुं नाऽलमस्मीत्यवोचत ।।४४।।
भुजङ्गं[21] वैष्णवं प्राह तुष्टस्तेन रमापतिः। पार्षदान् प्रेषयामास मनोज्ञान् पीतवाससः ।।४५।।
शङ्खचक्रगदाशार्ङ्गपरिष्कृतकराम्बुजान्। कस्तूरीतिलकोद्भासिफालमूलविशोभितान् ।।४६।।
दृष्ट्वा तान् हृष्टचित्ताऽसौ सार्धं तैरेव सत्वरम्। देवयानं समारुह्य वैकुण्ठं प्राप सा तदा ।।४७।।
ततः सनन्दनेनैव साकं देशिकपुङ्गवः। प्रयागं प्रययौ शीघ्रं जननीमुक्तिदायकम् ।।४८।।
सद्यः स्मरणमात्रेण मोक्षसाम्राज्यदायकम् ।।४९।।

## विज्ञानकन्दः

सनन्दनमनिन्दनं तदनु शिष्यमाचार्यराट्।
व्यधत्त शुभकृत्तमं सुजनमानमान[22]न्दनम् ।।
प्रयागमगमद्रयादिति च चिद्विलासा[23]ऽभणः।
ततः किमभवद्गुरो विविदिषामि तद्ब्रूहि मे ।।५०।।

## श्रीचिद्विलासः

वक्ष्ये त्र्यक्षोपमस्याद्भुतमपि चरितं देशिकेन्द्रस्य तुभ्यम्।
श्रेयो जज्ञे समग्रं विमलमतिमतामग्रणीस्त्वं कृतार्थः।
माघे मासि प्रयागे मकरमुपगते भास्वति प्रेमतोऽसौ।
स्नायं स्नायं प्रभाते प्रतिदिनमकरोद्यत्तदग्रे श्रृणुष्व ।।५१।।

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीचिद्विलासयतीन्द्रविज्ञानकन्दतपोधनेन्द्रसंवादे शङ्करविजयविलासे दशमोऽध्यायः ।।

15. शान्तचित्त° ।(A) 16. क्षेत्रयात्रा° । (A), (B), (C); 17. °तो व्यव° । (A); तो व्याप्य । (B); (C); 18. यदियं नीता । (B); (C); this appears to be the correct reading 19. ते । (A) 20. शूलाजिनपरि° । (A), (B) 21. भुजङ्गवैष्णवं । (A) 22. °सानन्दनम् । (A), (B), (C); 23. °लासाफण । (A)



# ।। अथैकादशोऽध्यायः ।।

ततः प्रयागमासाद्य सद्यः श्रेयःपदं नृणाम्। त्रिवेण्यां सुकृतश्रेण्यामघसृण्यामनुक्षणम् ।।१।।
स्नात्वैव जननीमोक्षसाधनानि समाहितः। ततान जनकस्यापि मोक्षसाम्राज्यसम्पदम् ।।२।।
पाठयन् ब्रह्मसूत्रार्थबोधकं भाष्यमन्वहम्। भाष्यं पातञ्जलानां च सूत्राणामतिविस्तरम् ।।३।।
शिष्यान् विपश्चितो विप्रान्नानादेशसमागतान्। श्रीमद्भगवदुक्ताया गीताया भाष्यमुत्तमम् ।।४।।
कञ्चित्कालमुवासाऽथ बोधयंस्तं सनन्दनम्। आसेतुहिमवच्छैलं कीर्तिर्व्यासगुरोरथ[1] ।।५।।
भाष्यमध्येतुकामा ये विशुद्धाद्वैतबोधकम्। मुनयो बहवो याता नानाक्षेत्रकृताश्रयाः[2] ।।६।।
समित्पाणिर्विष्णुगुप्तः शुद्धकीर्तिर्मुनीश्वरः। धीमान् भानुमरीचिश्च कृष्णदर्शननामवान् ।।७।।
विरिञ्चिचरणो योगी बुद्धिवृद्धिरथापरः। इत्याद्या मुनिवर्यास्तं शङ्कराचार्यमन्वयुः ।।८।।
तानशेषान्विशेषेण बोधयँस्तत्त्वमन्वहम्। कानिचिद्वासराण्यास्त निरस्ताशेषकल्मषः ।।९।।
सदा सनन्दनः सोऽयमन्तेवास्यग्रणीर्ननु। शुश्रूषमाणः सततं देशिकेन्द्रपदाम्बुजम् ।।१०।।
ये ये पठन्ति यद्यद्वा तैः सार्धं तत्पठन्मुदा। सतीर्थ्येषु च सर्वेषु प्रेम बिभ्रन्निसर्गजम् ।।११।।
उपाचरन्नतितरां प्रेमपात्रमभूद्गुरोः। मकरं मोक्तुकामेऽर्के प्रयागं त्यु[3]क्तुमुद्यतः ।।१२।।
शङ्कराचार्यवर्योऽपि चेतस्यालोच्य तस्थिवान्। सहाध्यायिजनोऽप्येनं निनिन्द स सनन्दनम् ।।१३।।
सनन्दनः कियानेष कियत्यस्मिन्[4] गुरोः कृपा। निश्चिन्वन्तो मनस्येनं त्याजयाम इति ध्रुवम् ।।१४।।
ईर्ष्यां पुपुषिरे तस्मिन् प्रश्रयावनताननने। ज्ञातवान्देशिकेन्द्रोऽपि शिष्यजा[5]तमनोगतम् ।।१५।।
कार्येण दर्शयिष्यामः सनन्दनमहोदयम्। अस्तोकस्त्वयमुत्सेकः स्वयमेषां गलत्यथ ।।१६।।
आस्तां तदिति निश्चिन्वन् पूर्ववत्पाठयन् स्थितः। तदन्तरे तु संख्यावान् प्रयागक्षेत्रमाश्रितः ।।१७।।
दिवाकराध्वरीत्येव नाम्ना सर्वत्र विश्रुतः। अनेडमूकस्तस्यासीत्पुत्रः स्थाणुरिवापरः ।।१८।।
यथाजातवदाभाति पश्यन्त्या जनसंसदः। न जिघ्रत्सति किञ्चिद्वा न पिपासति किञ्चन।। १९।।
न स्पन्द[6]ते न वदति कृमिकीटादिदंशने। किं वा पिशाचिकाग्रस्तः किमु यक्षेण पीडितः ।।२०।।
ब्रह्मरक्षोपभुक्तो वा किं वा मत्पापसंचयः। इत्थं विचिन्तयन् भूयः किं कर्तुमुचितं त्विह ।।२१।।
उपनेष्याम्यमुं पुत्रं यो वा को वा भवत्वयम्। उपनीतिं ततश्चक्रे विक्रियाय क्रमोचिताम् ।।२२।।
मार्गमाणो गद[7]स्यास्य प्रतीकारक्रियाक्षमम्। वाग्छन्नवि[8]द्यत गृहे चिन्तासन्तमसाऽऽवृतः ।।२३।।
आकर्ण्य शङ्कराचार्यदेशिकेन्द्रं[9] समागतम्। तनयं त समानीय मूकवत्सम[10]वस्थितम् ।।२४।।
शरणं [11]समुपायातो धुरि निक्षिप्य बालकम्। स्वामिन् पालय मामद्य दयस्व तनये मम ।।२५।।
अनेकशः परिक्रामन्नमस्कुर्वन् सहस्रशः। आदरेणाञ्जलिं बद्ध्वा दिवाकरमखी[12] द्विजः ।।२६।।
ततो विलोक्य तं बालं सू[13]र्मीव पुरतः स्थितम्। ऊचे वाचमिमां तुष्यन् दरस्मेराननाम्बुजः ।।२७।।

## शङ्कराचार्यः

कस्त्वं शिशो कस्य कुतोऽसि गन्ता। किं नाम ते त्वं कुत आगतोऽसि।
एतद्वद त्वं मम सुप्रसिद्धम्। मत्प्रीतये प्रीतिविवर्धनोऽसि ।।२८।।

1. व्याप्ता गुरो° । (A), (B), (C); 2. °निवासिनः । (B); 3. गन्तुं । (A) 4 कत्यस्मिन् सुगुरोः । (A) 5. °जाति° । (A) 8. °न्नविग्राहि । (?) 9. °देशिकं तु । (A) 10. त्समुप° । (A) 11. चरणं तं समायातो । (A) 12. दिवाकरमुपस्थितः । (A); °मखी स्थितः । (B); (C); 13. शूर्मिवत् । (A), सूर्मिवत् । (B); (C)

### बालकः

नाहं मनुष्यो न च देवयक्षो। न ब्राह्मणः क्षत्रियवैश्यशूद्राः।
न ब्रह्मचारी न गृही वनस्थो। भिक्षुर्न चाहं निजबोधरूपः ॥२९॥

निमित्तं मन इत्यादिपद्यैर्द्वादशभिस्तदा। प्रत्युत्तरमथाऽदत्त स्वात्मज्ञानप्रकाशकैः ॥३०॥
ततस्तुष्टो देशिकेन्द्रो ब्रह्मानन्दमविन्दत। दिवाकराध्वरिन् सूनुर्नायमर्हस्तवानघ ॥३१॥
अस्माकमेव सदृशो बालकः स्वात्मधीरसौ। सुपुत्रवान् भवान् भूयादिति दत्वाशिषो बहून् ॥३२॥
परिजग्राह तं प्रेम्णा स जगाम पिता गृहम्। प्रददौ क्रमसन्यासं शुद्धाद्वैतप्रबोधकम् ॥३३॥
उपादिशन्महावाक्यान्यनन्यसदृशान्यपि। बोधयामास विविधं शास्त्रतत्त्वमनन्यधीः ॥३४॥
आत्मस्वरूपमेतेन हस्तामलकसंमितम्। दर्शितं पुरतस्तस्मान्मुदितो देशिकेश्वरः ॥३५॥
हस्तामलक इत्येव दत्तवानभिधामपि। पुष्पवत्सदृशत्विड्भ्यां शिष्याभ्यामभितो वृतः ॥३६॥
शङ्कराचार्यगुरुराड्रत्नसानुरिवाबभौ। सनन्दनादिभिः शिष्यैः पौरैर्जानपदैरपि ॥३७॥
कौतुकालोकनासक्तैर्बहुभिः परिवारितः। वटं प्रदक्षिणीकृत्य त्रिवेण्यां स्नानमाचरन् ॥३८॥
गयाक्षेत्रमपि प्राप्य सर्वदेवसमाश्रितम्। विष्णुपादं निरीक्ष्यादावीशानादिपदं गत[14]: ॥३९॥
वाराणसीं जिगमिषुः प्रतस्थे निखिलैः सह। गीतवादित्रनिध्वानैः पूरयन्निखिला दिशः ॥४०॥

### विज्ञानकन्दः

श्रीमच्छङ्करदेशिकेश्वरमणेः शिष्यार्जनोद्योगि[15]ताम्।
आपीयेव सितां[16]शुमण्डलगलत्पीयूषधारां[17] बुधा।
तृप्तिं नाप हृदग्रतोऽपि कथय श्रीचिद्विलासाऽद्य मे।
काश्यां यद्व्यतनिष्ट विष्टपहितं सोऽप्यष्टमूर्त्याकृतिः ॥४१॥

### चिद्विलासः

या काशीति पुरी षडाननगुरोर्विश्वैकवन्द्या हि सा।
साक्षाद्यत्र वसत्ययं पुरहरो हित्वैव रूप्याचलम्।
तत्रत्यां गुरुणाऽऽदृतामपि कथां वक्ष्येऽधुनाऽऽकर्ण्यताम्।
वस्तुः श्रोतुरथाऽदधाति कुतुकं लोकैकहृद्या हि सा ॥४२॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीचिद्विलासायतीन्द्रविज्ञानकन्दतपोधनेन्द्रसंवादे शङ्करविजय-विलासे एकादशोऽध्यायः ॥

14. ततः। (A), (C); 15. नोयोगि°। (A) 16. हिमांशु°। (A), (B); 17. °धारांबुदाः। (A)



## ॥ अथ द्वादशोऽध्यायः ॥

ततः क्रमेणैव स देशिकेन्द्रो। वाराणसीमीशनिकेतभूताम्।
नानाविधाश्चर्यनिवेशकोशाम्। विवेश तूर्णं सह शिष्यवर्गैः ॥१॥
श्रीमानसौ शङ्करदेशिकेन्द्रः। साधूदिते भास्करसारथौ च।
स्नात्वैव तोये मणिकर्णिकायाः। विश्वेवरं प्रत्यहमर्चति स्म ॥२॥
दासं[1] चकारानिशमेष शिष्यैः। साकं स घट्टे मणिकर्णिकायाः।
दिदृक्षवस्तत्र यतीन्द्रमेनम्। जनाः समासेदुरतीव हृष्टाः ॥३॥
आमेरुपाश्चात्यपयोधिविप्राः। प्रणेमुरानम्रितमौलिभागाः।
पुरोविभागाकलिता[2] यदास्ते। प्रज्ञातुकामा यतिमात्मरूपम् ॥४॥
एवं वसन्नेष यतीश[3]चन्द्रः। संपूज्य विश्वेश्वरमादिदेवम्।
स्नास्यन् त्रिसन्ध्यं मणिकर्णयाम्। महामणीमण्डलकर्णिकायाम् ॥५॥
कुर्वन् स शिष्यैः सह तीर्थयात्राम्। दिव्यानि लिङ्गानि निरीक्षमाणः।
चरन् स घट्टेषु समन्ततोऽपि। भक्त्या चतुःषष्टिमितेषु नित्यम् ॥६॥
अटन् स तीरे दिविषत्तटिन्या। रम्योटजाभ्यर्णनिषण्णलेखे।
दृष्ट्वा मुनीन्द्रानपि तत्र तत्र। प्रादर्शयद्भाष्यमनुत्तमं सः ॥७॥
इत्थं न्यवात्सीत्सुरसिन्धुतीरे। शिष्यानसौ भाष्यमपीपठत्सः।
विवृक्षतां तत्र तपोधनानाम्। चित्रं[4] चरित्रं प्रकटीचकार ॥८॥
तस्मै ददौ कश्चन पीतवासोऽ। प्यूर्णास्तदान्यो वितितार भूयः।
कश्चिद्व्यतारीन्मणिपादुके च। स[5]काञ्चनाढयां करकां च दिव्याम् ॥९॥
ददुस्तदा केचन वल्कलानि। काषायवस्त्राणि मनोहराणि।
एकाक्षरुद्राक्षमयीं[6]च मालाम्। जपस्रजं कश्चन मौक्तिकाढयाम् ॥१०॥
इत्थं जनैः प्रत्यहमादरेण। यद्यद्वितीर्णं गुरुपुङ्गवाय।
श्रीचन्द्रमौलीशकृते व्यधत्त। श्रीरत्नगर्भाय गणेश्वराय ॥११॥
विश्राणनं विश्वजनीनमस्य। कृत्वाऽधिकर्णं जितकर्णमुच्चैः।
आम्नायपाथोनिधिपारदृश्व[7]–। विश्वानवद्याद्वयभावनां च ॥१२॥
विपश्चितो दीनजना मुनीन्द्राः। विनेतुकामा निज[8]मानसाधिम्।
आसेवुरस्यैव सदेशमारात्। आराधितस्तैः सुचिरं न्यवात्सीत् ॥१३॥
ततः समाकर्ण्य स काशिराजः। काश्या[9] अपीशः सुकृतातिरेकात्।
समेत्य साकं निजपौरवर्गैः। प्रत्यग्रहीदस्य पदारविन्दम् ॥१४॥
अदत्त तस्मै मुकुटं महार्हम्। केयूरयुग्मं मणिकाञ्चनाढयम्।
श्वेतातपत्रं शिबिकां विचित्राम्। शशिप्रभाढये सितचामरे द्वे ॥१५॥

1. वासं। (A), (B) 2. °कलितोऽपदा°। (A), (B), (C); 3. यतीन्द्र। (A), (B), (C); 4. इत्थं। (A) 5. सु°। (B) 6. °मयां। (A), (B), 7. °दृश्वा। (A) 8. इस मानसा°। (B); (C); 9. काश्यामपीश:। (A); काश्यामधीशः। (B); (C)

पुत्रैः कलत्रैः सह भृत्यवर्गैः। मित्रैः समन्तादपि पौरवर्गैः।
तदोपवीकृत्य निजं च राज्यम्। साकं धनेनाखिलवाहनेन ॥१६॥
भृत्योपमं सेवनमाचरन् सः। बद्धाञ्जलिः शिष्यवदेव तस्थौ।
एनं समालोक्य स देशिकेन्द्रः। दिव्याशिषोऽस्मै वितितार भूयः ॥१७॥
श्रीशङ्कराचार्यगुरोरमुष्य–। तृणीकृतब्रह्मपुरन्दरस्य।
किमस्ति वाञ्छा कनकाचले वा। तद्भक्तिमेकां गणयांचकार ॥१८॥
द्रष्टुं कदाचित्परपारमागात्। यतीश्वरोऽसौ दिविषत्स्रवन्त्याः।
शिष्यैः[10] समेतैश्च सनन्दनाद्यैः। तत्रत्यतीर्थानि निरीक्ष्य तुष्टः ॥१९॥
तत्राऽधिवास्यैव सनन्दनाख्यम्। वाराणसीं गन्तुमना बभूव।
विश्वेश्वरालोकनदत्तचेताः। क्षणादवापाऽथ निजं निकेतम् ॥२०॥
तीर्थानि नीराण्यखिलानि यत्र। किं त्वश्मजातान्यपि दैवतानि।
लता : समग्रा अपि कल्पवल्ल्यः। पृथ्वीरुहाः[11] श्रीफलचन्दनाख्याः ॥२१॥
भूयोऽपि या[12] सगरसंभवनाकलोक–। संप्रापणोद्यमनकारणकल्पवल्ली।
ईशानमौलितलनिर्मल फुल्लमल्ली–। मालेव विस्फुरति यत्र च सिद्धसिन्धुः ॥२२॥
यत्रोटजान्यपि मुनीन्द्र तरङ्गितानि। यत्कन्दराण्यपि दिगीश्वरमन्दिराणि।
यत्सैकतानि शिरसा कृतलालनानि। वाराणसीपुरसदृग्भुवनेऽस्ति का वा ॥२३॥
कान्तेव काशी मणिकर्णिकाढ्या। सदूर्मिका कङ्कण[13]भासमाना।
सदा शिवालङ्कृतविग्रहा[14] सा। विराजते सद्गतिदानदक्षा ॥२४॥
भूभृत्सुतेवोज्ज्वलचित्रपात्रा[15]। लक्ष्मीरिवाऽभीप्सितकामसूश्च।
वस्वौकसारेव च पुण्यलोकैः। वीता हि सा तन्मुदमाततान ॥२५॥
स्थाणुः फलत्येव फलानि यस्याम्। काश्यामपर्णाऽपि लतेव सूते।
नमन् सकृद्यत्र दिवं प्रयाति। पारं गिरां सा नगरी पुरारेः ॥२६॥
गङ्गेति या सरिदुमाधवलालनीया। मूर्ध्नैव[17] राजशकलाभरणाञ्चितेन।
सूते च सा तनुभवान् धृतचन्द्ररेखान्। स्वस्यां निमग्नमलिनानपि शुद्धचित्तान् ॥ २७ ॥
कैलासमन्दरसुधाम्बुधिरत्नसानु–। गोकर्णसेतुहिमबद्धरणीधरादीन्।
उज्झित्य यत्र किल वासमधत्त नित्यम्। गङ्गातरङ्गसमुदीक्षणकौतुकीशः[18] ॥२८॥
एवं सुखं तत्र यतीन्द्रचन्द्रः। वसन् स घट्टे मणिकर्णिकाख्ये।
सुरस्रवन्तीमसतोऽप्यवन्तीम्। निरीक्षमाणो नितरां मुमोद ॥ २९ ॥
ध्यायन् गुरुं शङ्करमन्तरङ्गे। निर्गन्तुमिच्छन् स गुरोरनुज्ञाम्।
पश्यन् स तीर्थानि च तत्र तत्र। तत्र न्यवात्सीत्स सनन्दनोऽपि ॥ ३० ॥
ततः कदाचित्सह शिष्यवर्गैः। वदन् सुखं तत्समयोचितानि।
तेषां समक्षं गुरुराजुहाव। सनन्दनाख्यं सहजातसख्यम् ॥ ३१ ॥

10. स्वयं तैश्च। (B); 11. °रुहः संफल°। (A) 12. नगर°। (A) 13. °भास°। (A); (B), 14. °ग्रहोऽसौ। (A)। 15. °पत्रा। (A), (B), (C); 16. °तीव च काम°। (B); (C); 17. मूर्ध्नि व्यराज सकला° तेव। (A); मूर्ध्न्यैव। (C); 18. °कीनः। (B); °की सः। (C)



दृष्ट्वा गभीरं सुरसिन्धु[19]पूरम्। निर्भीरयं निश्चितमानसोऽभूत्।
गुरोः सदेशं व्रजतो ममाऽपि। किमन्तरायो भविताऽन्तको वा ॥ ३२ ॥
यदक्षिवीक्षाक्षणतस्तमोब्धिः। निस्तीर्यते किं पुनरत्र सिन्धुः।
इत्येव जानन् चरणौ न्यधत्त। सुरस्रवन्तीसलिले स विज्ञः ॥ ३३ ॥
ज्ञात्वा गुरावस्य परां च भक्तिम्। साऽपि प्रसन्नाऽथ तरङ्गहस्तैः।
प्रसारयामास सरोरुहाणि। नूनं तदा तत्पदधारणाय ॥ ३४ ॥
निस्तीर्य तां लेखधुनीं क्षणेन। गुरोर्ववन्दे चरणारविन्दम्।
अन्तेवसन्तो गुरुपुङ्गवस्य। विलोक्य तं विस्मयिनो बभूवुः ॥ ३५ ॥
समागतं वीक्ष्य स देशिकेन्द्रः। प्रेम्णा समालिङ्ग्य मुहुः स्तुवन्तम्।
मेने तदन्तेवसतां वरेण्यम्। ददौ मुदा पद्मपदाभिधानम् ॥ ३६ ॥
विलोकयन्तस्तमिमं सतीर्थ्याः। निस्तीर्य पूरं त्रिदशस्रवन्त्याः।
समागतं वीतविशेषदर्पाः। तमेव चक्रुर्निजवर्गमुख्यम् ॥ ३७ ॥
ततः कदाचित्सुरसिन्धुपुरे। स्नात्वैष विश्वेश्वरमर्चयित्वा।
पश्यत्सु सर्वेषु कृताञ्जलिः सन्। संप्रार्थयामास महेशमित्थम्[20] ॥ ३८ ॥
अद्वैतमेव भुवि सत्यमुत द्विता वा। ब्रूहीश निश्चितमशेषविदां समाजे।
जानासि सर्वमखिलश्रुतिसारभूतम्। एषां निवारय मनोगतसंशयांश्च[21] ॥ ३९ ॥
आविर्भवन् विश्वगुरुस्तदानीम्। विश्वेश्वरो लिङ्गशिरोविभागात्।
धृत्वा वपुर्दिव्यमथाऽबभाषे। वाचैव निर्घोषसदृक्षयाऽसौ ॥ ४० ॥
अद्वैतमेव विमलं भुवने महीये। न द्वैतमित्यपि वदन् त्रिरुदस्य बाहुम्।
पश्यत्सु तेषु सकलेष्वपि तत्र लिङ्गे। प्राविक्षदद्रितनया[22]सममीश्वरोऽपि ॥ ४१ ॥
तस्मात्तदादि जनता प्रविसृज्य भेद–। वादान् श्रुतिस्मृतिविरुद्धनिजानुभावान्।
अद्वैतमेव भुवि सत्यमितीरयन्ती। तत्रैव चित्तमकरोत्सुचिरं विशेषात् ॥ ४२ ॥

## विज्ञानकन्दः

यतः शर्वेणासावचकथरिह[23] द्वैतमनृतम्[24]। सदद्वैतं नित्यं न हि भवतु[24a] वः संशयलवः।
तदद्याकर्ण्याऽहं[25] ध्रुवमिव कृतार्थः समभवम्। यदग्रे जातं तत्कथय गुरुवर्याश्रितकृप ॥४३॥

## चिद्विलासः

विज्ञानकन्द भवतो विज्ञानेनाऽधिकं प्रहृष्टमनाः।
ब्रूयामहं यदग्रेऽप्यासीद्वत्सादराच्छृणुष्वाद्य ॥ ४४ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीचिद्विलासयतीन्द्रविज्ञानकन्दतपोधनेन्द्रसंवादे शङ्करविजयविलासे[26] द्वादशोऽध्यायः ॥

19. °सिन्धुरूपम्। (B) see st. 38 : a below; 20. मदाशयांश्च। (A) 21. st. 39 is not found in (A). 22. °तनया स मही°। (A) 23. °कथदिहाद्वैतममृतं। (A) 24. °मसृतम् (B); 24a. °भवभुवः°। (B) 25. तदाद्य। (A) 26. विश्वेश्वरप्रत्यक्षकथनं नाम। (A), (B); (C)

## ॥ अथ त्रयोदशोऽध्यायः ॥

ततः कदाचित्कलिताधिवासः। क्षेत्रे च तत्रैव महाविचित्रे।
श्रीविश्वनाथाध्वरिवर्यपुत्रः। नाम्ना कलानाथ इति प्रसिद्धः॥ १ ॥
समागतं शङ्करदेशिकेन्द्र–। माकर्ण्य विश्वोन्नतिकीर्तिसान्द्रम्।
स्तोत्रं पठन् तोटकवृत्तक्लृप्तम्। तत्पादपद्मं शरणं गतोऽसौ॥ २ ॥
विदिताखिलशास्त्रसुधाजलधे। महितोपनिषत्कथितार्थनिधे।
हृदये कलये विमलं चरणम्। भव शङ्कर, देशिक मे शरणम्॥ ३ ॥
करुणावरुणालय पालय माम्। भवसागरदुःखविदूनहृदम्।
रचयाऽखिलदर्शन[1]तत्त्वविदम्। भव शङ्कर देशिक मे शरणम॥ ४ ॥
भवता जनता सुहिता भविता। निजबोधविचारणचारुमते।
कलयेश्वरजीवविवेकभिदम्[2]। भव शङ्कर देशिक मे शरणम्॥ ५ ॥
भव एव भवानिति मे नितराम्। समजायत[3] चेतसि कौतुकिता।
मम वारय मोहमहाजलधिम्। भव शङ्कर देशिक मे शरणम्॥ ६ ॥
सुकृतेऽधिकृते बहुधा भवतः[4]। भविता पददर्शनलालसता।
अतिदीनमिमं परिपालय माम्। भव शङ्कर देशिक मे शरणम्॥ ७ ॥
जगतीमवितुं कलिताकृतयः। विचरन्ति महामहसः छलतः।
अहिमांशुरिवात्र विभासि पुरः। भव शङ्कर देशिक मे शरणम्॥ ८ ॥
गुरुपुङ्गव पुङ्गवकेतन ते। समयतामयतां[5] न हि कोऽपि सुधीः।
शरणागतवत्सल तत्त्वनिधे। भव शङ्कर देशिक मे शरणम्॥ ९ ॥
विदिता न मया विशदैककला। न च किञ्चन काञ्चनमस्ति गुरो।
द्रुतमेव विधेहि कृपां सहजाम्। भव शङ्कर देशिक मे शरणम्॥ १० ॥
इत्थं स्तुवंस्तच्चरणारविन्द–। सेवामजस्रं रचयांचकार।
भावं विजानन् समयोचितानि। वस्तून्यतन्द्रोऽप्यनयत्स शीघ्रम्॥ ११ ॥
निर्णेजयामास तदीयशाटीः। उपाहरच्छौचकृते च मृत्स्नाम्।
प्रक्षालयद्रत्नकमण्डलुं च। चित्रं कटीसूत्रमचीक्लृपच्च॥१२॥
श्रीचन्द्रमौलीश्वरपूजनाय। दिव्यानि पुष्पाणि समानिनाय।
पत्राणि बिल्वस्य तथा तुलस्याः। पूर्णानि पर्णानि समाजहार॥१३॥
श्रीपद्मपादेन महोज्ज्वलेन। तथैव हस्तामलकाभिधेन।
पदं च काङ्क्षन् सममित्युदारम्। उपाचरत्तं गुरुमादरात्सः॥१४॥
यदा यदा वाञ्छति देशिकेन्द्रः। यद्यन्महेशार्चनकौतुकी सन्।
तत्तत्समादाय पुरो न्यधत्त। तीव्रं स बद्धाञ्जलिरेव तस्थौ॥१५॥

1. रचिता°। (B); (C); 2. °मिदम्। (A); °विदम्। (B); (C); 3. समजायसि। (A)
4. भवतु। (A) 5. समता समया। (A)



शुश्रूषणासक्तिमतीव पश्यन्। शिष्येष्वनूनेषु सदृक्[6]च सख्यम्।
द्विजोऽप्यसौ जागरितेति मत्वा। तस्मिन् कृपां कर्तुमनाः स जज्ञे॥१६॥
आहूय तं विप्रमदी[7]प्रबुद्धिम्। क्षिप्रं कटाक्षैः करुणासुधार्द्रैः।
संस्नाप्य तं वीतमलं विधाय। ददावसाधारणकौशलीं[8] सः॥१७॥
संप्रार्थयामास ततो निपत्य। पादद्वयीपल्लवतल्लजाभ्याम्।
संन्यासमेवाऽप्तुमनाः समागाम्। उपादिशाऽद्यैव यतीन्द्रवर्य॥१८॥
इत्थं वदन्तं समुदस्य दोर्भ्याम्। प्रेम्णा समालिङ्ग्य विनीतचित्तम्।
संन्यासमन्यादृशपुण्यलभ्यम्। तदा मुदाऽसौ वितताार तस्मै॥१९॥
यतो मुखाब्जात्तव निःससार। मनोज्ञवृत्तं वरतोटकाख्यम्।
त्वं तोटकार्यो भविता धरायाम्। इत्यूचिवान्नाम ददौ तदाऽसौ॥२०॥
श्रीशङ्कराचार्यसुधांशुमौलिः। शिष्यैस्त्रिभिस्तैः परिवीतपार्श्वः।
सरोजभूवासुकिशायिरुद्रैः। रेजे महेशानवदेव भूयः॥२१॥
देवैर्मरुत्वानिव तापसेन्द्रैः। वीतो विधातेव सम[9]न्ततोऽपि।
कैलासभूभृदचलैरिव मन्दराद्यैः। नूनं व्यराजत तदा वरदेशिकेन्द्रः॥२२॥
पठद्भिरेकत्र च पाणिनीयं। वेदान्तमन्यत्र स कापिलं च।
आकर्णयद्भिः पर[10]तो रहस्यम्। समावृतोऽसौ शुशुभे तदानीम्॥२३॥
पाराशरिः स्नातुमहन्यनर्घे। दिव्ये च नीरे मणिकर्णिकायाः।
कदाचिदागत्य निरीक्षमाणः। मुमोद वृत्तं सुगुरोर्विचित्रम्॥२४॥
आवृत्य रूपं स जरत्सरूपम्। किञ्चिच्चलन्मौलिनिवेशिताङ्घ्रिः।
मन्दं धरायामवलम्ब्य दण्डम्। गुरोः सदेशं[11]द्रुतमाससाद॥२५॥
को वा वसन् पाठयिताऽत्र भाष्यम्। यूयं च के तत्परितश्चरन्तः।
इतीरितं तेन वचो निशम्य। श्रीपद्मपादोऽप्यवदत्प्रमोदात्॥२६॥
किं जानाति भवान् मदीयगुरुराट्प्रज्ञां च सर्वज्ञताम्।
यः पाराशरिसूत्रभाष्यमकरोन्निर्णिक्तयुक्त्यन्वितम्।
भाष्याण्यारचयद्दशोपनिषदामद्वैतभावोदयम्।
साक्षाच्छङ्कर एव देशिकवपुर्भूत्वा चरत्यन्वहम्॥२७॥
इत्थं ततस्तस्य वचो निशम्य। तदन्तिकं प्राप सहैव तेन।
नान्दीकराशान्तरमत्युदार–। षड्दर्शनीतत्त्वविचारवादैः॥२८॥
कुत्राऽस्ति भाष्ये तव निश्चिता[12]धीः। उद्घुष्यतां तत्र यतिन् मदग्रे।
निवारयैतानिह शिष्यवर्गान्। उच्चावचानारटतः समन्तात्॥२९॥

### श्रीशङ्कराचार्याः

तवाऽस्ति यस्मिन् प्रतिभा समग्रा। सूत्रे च तस्मिन् परिपृच्छ विद्वन्।
तत्रैव वक्ष्यामि विनिश्चितार्थान्। अलं विलम्बेन किमत्र चित्रम्॥३०॥

6. सदृक्षसख्यम्। (A) 7. विप्रमतिप्रबुद्धम्। (A); विप्रमदीर्घबुद्धिम्। (B); 8. °कौशलं। (B); (C); 9. समं ततो°। (A); (C); 10. परितो। (B); 11. सकाशं। (B); (B);
12. निश्चला। (A)

## व्यासः

सूत्रे पाराशरीयेऽप्यतिविशदमतिर्वर्तते चेत्तपस्विन् ।
ब्रूह्येतत्तत्त्वमर्थं कथयसि च कथं दृप्तवद्भासि मेऽद्य ।
यत्राऽध्याये तृतीये प्रथम[13]सुगणितं सूत्रमर्थांपयाऽद्य[14] ।
क्षिप्रं संन्यासिवर्य त्वरयति हृदयं श्रोतुमेतन्ममापि ।।३१।।
[15]सूत्रस्य तस्यातिरहस्यमर्थम् । केनाऽप्यभेद्यं सुधिया कथंचित् ।
विस्तारितं शङ्करदेशिकेन । निशम्य वृद्धोऽपि तुतोष भूयः ।।३२।।
ततोऽवदत्तस्य च पूर्वपक्षान् । आम्नायसार्थार्थविरुद्धवृत्तीन् ।
अमर्षणः किञ्चिदिवाबभाषे । यतिन् त्वया किञ्चन नावबोधि ।।३३।।
ब्रूषे यतिन् सर्वमतथ्यमेव ।[16] वाक्यार्थमन्योन्यविरुद्धमेव ।
नाऽत्राऽस्ति कश्चित्तव दोषलेशः । श्रोतुर्ममैवाऽत्र समागतस्य ।।३४।।
शिष्यानविज्ञानतिसंदधानः । गर्वायसे त्वं ननु विज्ञमानी ।
जानासि चेद्व्यासविनिर्मितस्य । सूत्रस्य कस्याऽपि [17]वदाऽर्थमद्य ।।३५।।

## श्रीदेशिकेन्द्रः

किञ्चिच्चलास्यः स्थविरोऽपि वक्ति । श्रीपद्मपाद वद तस्य सदुत्तरं त्वम् ।
इत्यूचिवान् गुरुवरो ननु जोषमासीत् । व्यासोऽपि सर्वविदितो हि विसिस्मये सः ।।३६।।
श्रीपद्मपादोऽवददग्रजं तम् । अस्मद्गुरूनप्यति धिक्करोषि ।
जल्पस्यनल्पा वितथा गिरोऽपि । सर्वज्ञतामप्युररीकरोषि ।।३७।।
इति वदति सतीर्थ्याः पद्मपादेऽतिरुष्टाः । कतिचन निजमुष्टिं यष्टिमन्ये च काङ्क्षुः ।
इदमखिलमुदारः शङ्कराचार्यवर्यः । स्मितवदनसरोजः पश्यति स्माऽतिहृष्यन् ।।३८।।
स्पृष्टेऽपि गात्रे पततीव भाति । किञ्चिन्न जानाति तथापि धृष्णुः ।
रटत्वयं किञ्चन वञ्चितार्थम् । का हानिरस्माकमनेन भूयात् ।।३९।।
व्यासः समालोक्य समस्तमेतत् । विस्मेरचित्तो धुरि संन्यधत्त ।
आस्थाय रूपं निजमेव दिव्यम् । तुष्टाव भूयो वरदेशिकेन्द्रम्[18] ।।४०।।
व्यासं विदित्वाऽथ स देशिकेन्द्रः । प्रदक्षिणीकृत्य नमश्चकार ।
यातोऽहमद्यैव कृतार्थभावम् । भवत्पदाम्भोजविलोकनेन ।।४१।।
श्रीमन् यते ते प्रतिभा सदृक्षा । त्र्यक्षावतारो हि भवाञ्जगत्याम् ।
त्वया व्यधायीति मदीयसूत्र– । भाष्यं समाकर्णितुमागतोऽस्मि ।।४२।।
पाराशरिं मामवगच्छ विद्वन् । मदीयसूत्रार्थमबुद्ध नैकः ।
त्वं[19] चेद्विविच्य प्रकटीकरोषि । लोकोपकाराय कृतावतारः ।।४३।।
भाष्यं भूय्यं समस्तैः प्रकटय पुरतो निर्विशङ्कं समग्रम् ।
प्रीतः श्रोतुं समागां कथमिव भवता निर्मितं भावगर्भम् ।

---

13. प्रथमग° । (B); 14. °पयायि । (A) 15. श्रीदेशिकेन्द्रः । (A), (B); (C) 16. °मतत्त्व° । (A) 17. पदार्थं° । (A); (B); 18. °केन्दः । (A) 19. त्वं वै । (B) (C)



इत्थं द्वैपायनोक्तेर्गुरुरवददथ स्वीयभाष्योचितार्थान् ।
अध्यायानां चतुर्णामधिकरणगणैः पूरितानां विशेषात् ।।४४।।

## विज्ञानकन्दः

श्रीचिद्विलास सुमते यतिवर्य तेऽद्य । वक्त्रारविन्दगलितां[20] गुरुवर्यवार्ताम् ।
व्यासावलोकनसहोक्तिविभावनाढ्याम् । आकर्ण्य मोदमवहन्मम चित्तमन्तः ।।४५।।

## श्रीचिद्विलासः

विज्ञानकन्द कथयामि यदग्रतोऽपि । सर्वाद्भुतोदयविधाननिधानभूतम् ।
आधत्स्व चेतसि तदप्यखिलं मदुक्तम् । श्रीशङ्कराचार्यगुरोश्चरित्रम् ।।४६।।

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीचिद्विलासयतीन्द्रविज्ञानकन्दतपोधनेन्द्रसंवादे शङ्करविजयविलासे व्यासदर्शनं[21] नाम त्रयोदशोऽध्यायः ।।

---

20. °गदितां । (A) 21. व्यासदर्शनकथनं । (A), (B), (C)

# ॥ अथ चतुर्दशोऽध्यायः ॥

ततः सम्यक् समाकर्ण्य भाष्यं सत्यवतीसुतः। तुष्टाव बहुशः प्रीत्या दुर्मतोद्धूननक्षमम् ॥१॥
श्रीमान् द्वैपायनः साक्षात्त्रिलोकज्ञस्तपोधनः। भूतं भवद्भविष्यच्च विजानाति तपोदृशा ॥२॥
अवै[1]त्सीच्छङ्कराचार्यदेशिकेन्द्रस्य सत्वरम्। पुरा पुरामथारातेर्वरादचिरजीविताम् ॥३॥
भाष्यं प्रतोष्यं बिबुधैर्मत्सूत्राणामनुत्तमम्। पाठयेत्प°ठतः[2] को वा चेदेवं शङ्कराज्ञया ॥४॥
को वा रहोगतानर्थानभेद्यान् बिबुधैरपि। एतदन्यो वदान्योऽत्र दृश्यते न मया क्वचित् ॥५॥
अतश्चिरायुरेवाऽस्तां भवेद्भाष्यप्रचारणम्। अद्वैतपद्धतिः स्रस्ता भूयसा नेहसा ननु ॥६॥
इति व्यासः प्रसन्नात्मा ककुदस्तत्त्ववेदिनाम्। सस्मार मनसा सद्यः पाथोरुहसमुद्भवम् ॥७॥
आविरासी[3]द्दयात्सोऽपि देवदेवः पितामहः। पश्यत्सु सकलेष्वेषु काशिराजादिकेष्वपि ॥८॥
ततः श्रीशङ्कराचार्यः समुत्थायाऽतिभक्तितः। प्रणनाम परीयाय[3a] तुष्टाव च पुनः पुनः ॥९॥
अनेकजनुरायातसुकृतानां तनूभृताम्। भवदीयपदाम्भोजदर्शनं सुलभं ननु ॥१०॥
अन्वर्थतामगामद्य विगताखिलकल्मषः। विलोकनेन भवतः क्षणतः कमलोद्भव ॥११॥
मुहुर्मुहुः स्तुवन्नित्थं महान्तं कमलोद्भवम्। बद्धाञ्जलिपुटो भूत्वा तस्थौ तत्पुरतः क्षणम् ॥१२॥
वेधा विलोक्य तद्भाष्यं स्वीयान्तर्गतबोधकम्। सन्तुतोष विशेषेण विस्मयाकलितान्तरः ॥१३॥
ब्रह्मसूत्रार्थतत्त्वज्ञ[4]विज्ञाताऽस्य विलोकिता। विजानातु भवान् व्यास संन्यासाकारमावृतः ॥१४॥
हर एव परः साक्षाच्चरतीति धरातले। अद्वैतविद्यामुद्धर्तुं मुग्धधीभिः कदर्थिभिः ॥१५॥
कलावपि खिलीभूतं संन्यासाश्रममुत्तमम्। जाने द्वैपायनाऽहं तु त्वं तु जानासि वा न वा ॥१६॥
इति स्तुवन् समानीय परमेष्ठी तमन्तिकम्। समालिलिङ्गे निःसङ्गं शङ्कराचार्यपुङ्गवस् ॥१७॥
ततो व्यासोऽब्रवीत्प्रीतो विनिरीक्ष्य पितामहम्। आयुरस्ये[6]षदेवाऽस्ते भाष्यं तु सुमहत्तरम् ॥१८॥
विनैनं न हि वक्ताऽन्यः शिष्ये[7] भोऽस्ति विचक्षणः। किमत्र करणीयं ते हृदि भाति पितामह[8] ॥१९॥
सत्यवत्याः सुतेनेत्थं कथितः कमलोद्भवः। ऊचे द्वैपायनं साक्षाद्भगवन्तमिवाऽच्युतम् ॥२०॥
अहं वेद पुरा सर्वं कारितं शङ्कराज्ञया। स एवाऽयमिहाऽस्तेऽद्य लीलाकलितविग्रहः ॥२१॥
स्वच्छन्दं विहरत्ये[9]षः स्वीयभाष्यं प्रचारयन्। जीवन्निच्छानुसारेण कैलासं यातु तत्परम् ॥२२॥
मया वा केशवेनाऽपि किं देयमिति[11] विद्यते। यथोचितं विजानाति स एव जगदीश्वरः ॥२३॥
इति संश्लाघ्य बहुधा शङ्कराचार्यमादरात्। ददौ सुचिरमायुश्च धराभारापनुत्तये ॥२४॥
व्यासेन प्रेरितस्तेन त्रिकालज्ञेन धीमता। शङ्कराचार्यवर्याय तुष्टो लोकपितामहः ॥२५॥
पश्यतां सर्वलोकानामाश्चर्याक्रान्तचेतसाम्। मूर्तित्रयसमायोगस्तत्र दैवादजायत ॥२६॥
नतः सर्वेऽपि तत्रत्या दृष्ट्वेदं महदद्भुतम्। आनन्दबाष्पसलिलैर्गलद्भिः परितो भृशम् ॥२७॥
सुरस्रोतस्विनीपूरमुत्तुङ्गं[12] व्यदधुस्तदा। उच्चैः संस्तु[13]वतां तेषामारावा[14] पूरितान्तराः ॥२८॥

1. अवैमि शंकरा°। (A) 2. पाठत। (A) 3. °द्दया सो°। (A); तदा सोऽपि। (C); 3a. वरिष्ठाय। (B); (C); 4. तत्त्वज्ञविज्ञातस्य। (A) विज्ञताऽस्य। (C); 5. कदर्थिताम्। (A), 6. °स्येव देवा°। (A) 7. शिष्येभ्यो°। (A), (B); (C); 8. पितामहः। (A) 9. °त्वेषः। (A), (B); (C); 11. °मिह। (A), (B); (C); 12. °मुत्तरङ्गं व्यधुः। (A), (B); (C); 13. संस्तूयतां। (A) 14. °भारवापूरि° । (A)



तुष्टुवुर्हरितो मोदाद्दिवि देवत्रयीं तदा[15]। वाराणसी समग्राऽपि विस्मिता सा तदाऽभवत् ॥२९॥
पद्मपादोऽवदद्भीतः पूर्वोक्ता[16]युक्तभाषणैः। मूर्तित्रयं परिक्रम्य प्रणनाम नताननः ॥३०॥
द्रष्टुः[17] पुण्यप्रभावेन मूर्तित्रयविलोकनम्। समभूदधुना तेन वयं धन्या जगत्त्रये ॥३१॥
शङ्करः शङ्करः साक्षाद्व्यासो नारायणः स्वयम्। तयोर्विवादे संप्राप्ते किङ्करः किं करोम्यहम्॥३२॥
क्षन्तव्यो मेऽपराधोऽद्य विद्वन् व्यास महामते। पितेव बालककृतं दुष्कर्म करुणादृशा ॥३३॥
अन्तेवसन्तः सन्तस्ते सर्वेऽपि यतियुङ्गव। सम्यक् पाठय तानेतान् त्वत्पदायत्तमानसान् ॥३४॥
ततः पद्मोद्भवव्यासौ त्वद्भाष्यं जगतीतले। आसेतुहिमवच्छैलं प्रसिद्धं भवतादिति ॥३५॥
श्रृण्वाचार्य भिदा मिथ्या ह्यद्वैतं पारमार्थिकम्। उपदेशं नृणामेकं[18] कुरु यत्नेन सर्वदा ॥३६॥
*इति दत्वा वरं तस्मै निस्पृहायामि[19] सस्पृह। अन्तर्हितावभूतान्तौ[20] वीक्षमाणे जनव्रजे ॥३७॥
ततो भानुमरीचिं च [20a] शुद्धकीर्तिमतन्द्रितम्। हस्तामलकसंज्ञं च पद्मपादमनुत्तमम् ॥३८॥
तोटकाचार्यनामानं तथाऽन्तेवसतां[21] वरान्। पाठयन्न्यवसत्काश्यां शङ्कराचार्यदेशिकः ॥३९॥

## विज्ञानकन्दः

वेधा लोकपितमाहोऽपि जगतां स्रष्टाऽपि दिष्टा[22]च्छुभात्।
आविर्भूय विलोक्य भाष्यमनघं दीर्घायुषं [23]क्लृप्तवान्।
इत्याकर्ण्य च देशिकस्य चरितान्यासीत्प्रहृष्टं मनः।
ब्रूह्यग्रेऽपि च चिद्विलास यदथ व्याधायि तेनाऽद्भुतम् ॥४०॥

## श्रीचिद्विलासः

विज्ञानकन्द कथयामि तवाऽधुनाऽहम्। श्रीदेशिकेश्वरकृतानि महाद्भुतानि।
भक्त्याऽवधार्य[24] च विधेहि मनस्यशेषम्। विज्ञे जने किमथ वा कथनीयमस्ति ॥४१॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीचिद्विलासयतीन्द्रविज्ञानकन्दतपोधनेन्द्रसंवादे शङ्करविजयविलासे चतुर्दशोऽध्यायः ॥

15. मोदादिव देवत्रयं तथा। (A), मोदादिव °त्रयां तदा। (B); 16. °वुक्त°। (A) 17. द्रष्टृषु°। (B); (C) 18. °मेवं। (A), (B); (C); * (C) does not read this stanza. 19. °यापि संस्पृहम्। (A), (B); 20. °भूतां तावीक्ष°। (A), (B) 20a. सुधाकीर्ति°। (B); (C); 21. °वसतान्। (A) 22 दृष्टा°। (A) 23. चाप्नुवान्। (A) 24. °वधारय निधेहि। (A), (C) °निधेहि मनन्य°। (B)

# ॥ अथ पञ्चदशोऽध्यायः ॥

एवं सुखेन वसति शङ्कराचार्यदेशिके । पाठयत्यपि सच्छिष्यानाश्चाव्येत्थं तदद्भुतम् ॥१॥
समाजग्मुस्तदा सर्वे विवादे जेतुमुद्यताः । शिवपाषण्डिनो नूनं शङ्कराचार्यमञ्जसा ॥२॥
अद्वैतद्रोहिणः केचिल्लिङ्गाङ्कितभुजद्वयाः । केचित्फाले त्रिशूलं च डमरुं च भुजद्वये ॥३॥
केचित्फाले लिङ्गचिह्नं हृदि शूलं तथाऽपरे । केचित्फाले भुजद्वन्द्वे हृदि नाभौ च लिङ्गिनः ॥४॥
एवं रुद्रस्य चिन्हानि धारयित्वा समन्ततः । ऊचुस्तदा[1] देशिकेन्द्रं रुद्रः सर्वोत्तमो भुवि ॥५॥
तादृशेऽपि यते तेऽद्य कथमासीन्निरास्थता । अस्मिन्नर्थे पुराणानां वचनानि बहून्यपि ॥६॥
सन्त्येतानि श्रृणुष्वाद्य श्रुतिस्मृतिहितान्यपि । दूर्वाससे महेशेन कथितं रुद्रयामले ॥७॥
तत्सर्वं कथयामोऽत्र शिवतत्त्वमनुत्तमम् । शिवः– अहमेकोऽक्षरः कर्ता परात्परतरः शिवः ॥८॥
ब्रह्मविष्णू[2] मदात्मानौ लोकानामादिकारणम् । मदिच्छारूपिणी शक्तिर्जगत्सर्गादिकारिणी ॥९॥
लुप्ता मय्येव सा सृष्टा पुनः सृष्टौ मयाऽनघ । सा महत्तत्त्वमुत्पाद्य त्रिगुणाङ्कुरकारणम् ॥१०॥
अहंकारं समुत्पाद्य त्रैगुण्यं पूर्वतत्त्वतः । गुणत्रयात्मिकान् कृत्वा ब्रह्मविष्ण्वादिकानथ ॥११॥
*पञ्चाक्षरीजपपरा रुद्राक्षाभरणैर्युताः । भूतिभूषितसर्वाङ्गाः सदा ध्यानपरायणाः ॥१२॥
ईश्वरं रुद्रमव्यक्तं व्यक्तरूपं जगल्लये । येऽर्चयन्ति नरश्रेष्ठास्तेषां[3] मुक्तिः करे स्थिता ॥१३॥
अतस्त्वं भूतिरुद्राक्षधारणं कुरु सर्वदा । कुरु नित्यं महादेवपूजनं भक्तिसंयुतः ॥१४॥
दूर्वाससे मुनीन्द्राय एवमुक्त्वा सदाशिवः । अन्तर्दधे स[4]दाचारसक्तोऽभून्मुनिसत्तम ॥१५॥
यतो दूर्वासमुनये उपदेशं चकार सः । अतो रुद्रार्चनो[4a]द्युक्ता वयं धन्या जगत्त्रये ॥१६॥
कोटिजन्मार्जितैः पुण्यैः शिवे भक्तिः प्रजायते । तल्लिङ्गधारी सततं तद्भक्तजनवत्सलः ॥१७॥
सितेन भस्मना कार्यं ललाटे तु त्रिपुण्ड्रकम् । धारयेत्सर्वदा शूलं ललाटे गन्धवारिणा ॥१८॥
शिवध्यानपरा ये तु शिवभक्तावतन्द्रिताः । लोकं यान्ति शिवस्यैव तेषां मुक्तिः करे स्थिता ॥१९॥
बहुनाऽत्र किमुक्तेन यस्य भक्तिः शिवे दृढा । ब्रह्महत्यादिभिः पापैर्मुच्यते नाऽत्र संशयः ॥२०॥
अग्निहोत्रं यथा नित्यं वेदस्याध्ययनं तथा । ब्राह्मणस्य तथैवेदं तप्तमुद्रादिधारणम् ॥२१॥
तस्मात्कार्यं त्रिशूलाङ्कं[5] सन्तप्तायसवन्हिना । स्वामिन् श्रीशङ्कराचार्य त्वमस्मन्मतमाश्रय ॥२२॥
ततस्तैरेवमुक्तोऽसौ बभाषे देशिकेश्वरः । त्वदुक्तं सत्यमेतत्तु[6] वीरविद्वेषनामक ॥२३॥
आदिकर्ता शिवः साक्षादिति चेत्सममावयोः । किन्त्वङ्कनं विरुद्धं ते श्रुतिस्मृतिविगर्हितम् ॥२४॥
प्रमाणं नैव पश्यामस्तप्तलोहाङ्कने हृदि । आकर्णयाऽत्र वाक्यानि पुराणैः कथितान्यपि ॥२५॥
मा भूत्तवाऽत्र सन्देहः शिवेनाऽप्युदितं पुरा । अनाद्यनन्तं परमं महेश्वरमजं शिवम् ॥२६॥
नित्यानन्दं निराभासं निर्गुणं तमसः परम् । अद्वैतमचलं ब्रह्म निष्कलं निष्प्रपञ्चकम् ॥२७॥
ईदृशस्य महेशस्य कथं चिन्हत्वकल्पना । तद्धारणान्मुक्तिरिति प्रमाणं कुत्र विद्यते ॥२८॥
कायक्लेशविधेरन्यत्फलं नास्तीति निश्चयः । शूलं लिङ्गाद्यङ्कितं च गीतनृत्ता[7]दिकं तथा ॥२९॥
एकजातेरयं धर्मो न जातु स्याद्द्विजन्मनः । शिवकेशवयोरङ्कान् शूलचक्रादिकान् द्विजः ॥३०॥
न धारयेत मतिमान्वैदिके वर्त्मनि स्थितः । नाभेरूर्ध्वं सोमपास्तु नाभ्यधस्तादसोमपाः ॥३१॥
देवास्तिष्ठन्ति विप्रेन्द्रे वेदवेदाङ्गपारगे । शिखा शिरो ललाटं च कर्णौ घ्राणं कपोलकम् ॥ ३२ ॥
वक्त्रं जिव्हा तथा चोष्ठौ चुबुकं कण्ठमेव च । अंसद्वयं भुजद्वन्द्वं बाहू हस्तयुगं तथा ॥ ३३ ॥

---

1. तथा। (A) 2. ब्रह्मविष्णुमहात्मानौ। (A), (C); * between stt- 11 and 12, the following stanza is given अस्मद्विभूतयः सर्वाः स्थावरा जङ्गमादयः। अतो रुद्रार्चनपरा रुद्रसूक्तजपाश्रिताः। (A), (B); (C); 3. सैषां। (B); 4. तदा°। (A), (B); (C); 4a. °र्चने युक्ता। (B); (C); 5. °लान्तं। (A) 6. °मेनास्तु। (A) 7. °नृत्या°। (A)



वक्षो नाभिं कटिं लिङ्गं वृषणं चोरु जानुकम् । गुल्फौ पादौ समाश्रित्य शिवाद्याः सर्वदेवताः ॥ ३४ ॥
पितरो ऋषयश्चैव स्ना[8]य्वादिषु समाश्रिताः । नित्यादिकर्मभिस्तृप्ताः विद्यन्ते नाऽत्र संशयः ॥ ३५ ॥
योग्ये कर्मणि देहे[9]ऽस्मिन् सन्तप्ते सर्वतो भृशम् । एनं शप्त्वा[10] पलायन्ते देवाः शीर्षादिवासिनः॥३६॥
पतितोऽयं भवत्येव शूद्रवच्चितिकाष्ठवत् । तप्तं[11] तु विप्रमालोक्य सचैलं जलमाविशेत् ॥३७॥
रे मूढ वीरविद्वेष द्वैतबुद्धिं निवारय । मनोवृत्तिमयं द्वै[12]तमद्वैतं परमार्थतः ॥ ३८ ॥
अविद्यामोहितात्मानः पुरुषा भिन्नदर्शिनः । तस्मात्त्वमद्वय[13]ब्रह्मध्यानं कुरु महामते ॥ ३९ ॥
इत्यादिवचनैरेतान् प्रबोध्य श्रुतिसंमतैः । चकार गुरुवर्योऽसावद्वैतज्ञानकोविदान् ॥ ४० ॥
ततस्ते प्रणिपत्यैनं शङ्कराचार्यपुङ्गवम् । भवत्कृपासुधासेकैर्वयं जाता विकल्मषाः ॥ ४१ ॥
सोऽहमस्मीति मन्वाना भवामो नात्र संशयः । खण्डयित्वा[14] मतान्येष न्यवसत्सुचिरं मुदा ॥ ४२ ॥
एतस्मिन्नन्तरे कश्चित्समागत्याऽतिसत्वरम् । स्वामिन्नाकर्ण्यतामीषदहं रुद्धपुरागतः ॥ ४३ ॥
भट्टाचार्याभिधो धीमान् साक्षात्स्कन्दापरा[15]कृतिः । समस्तशास्त्र[15a]तत्त्वज्ञः स्वयमेव धिया स्वया ॥ ४४ ॥
तन्मतोद्भेदनोद्युक्तः पपाठ[16] सुगतैरसौ । शतशश्चूर्णयित्वाऽथ तन्मतानि समन्ततः ॥ ४५ ॥
वाङ्मुखैरखिलान् जित्वा तं[17] निवेद्य महीभृते । शीर्षाणि छेदयामास तेषामेव विशेषतः ॥ ४६ ॥
एवं दुर्मतविध्वंसं विधाय विगतज्वरः । वर्तते यतिवर्योऽद्य विज्ञातं ज्ञापयामि ते ॥ ४७ ॥
एतद्वचः श्रुतिपथं जगाम श्रीगुरोर्यदा । निर्गन्तुमुपचक्राम सर्वैः शिष्यैः समन्ततः ॥ ४८ ॥
समाकर्ण्याऽथ विमतः[18] शङ्कराचार्यनिर्गमम् । काशिराजः समागत्य प्रणिपत्य पदाम्बुजे ॥ ४९॥
सहैवानयनं स्वस्य प्रार्थयामास भूयशः । इत्यूचिवांसं राजानं समुद्यम[19]पदानतम् ॥ ५० ॥
राजन् वस सुखेनेह ध्यायन्मां शङ्करं हृदि । नाऽत्राऽस्ति विघ्नलेशस्ते परिपन्थिविनिर्मितः ॥ ५१ ॥
दीर्घायुरचिरेणैव लभस्व तनयान् बहून् । इत्याशिषो वितीर्याऽथ निवर्त्याऽनुगतं च तम् ॥ ५२ ॥
निःससार रयाच्छिष्यैः सार्धं श्रद्धासमं[20] चितैः । सहैव तेन विप्रेण पुरोमार्गप्रदर्शिना ॥ ५३ ॥
रुद्धाख्यनगरं प्राप क्रमेण यतिपुङ्गवः । विद्वज्जनसमाकीर्णमुच्चप्राकारशोभितम् ॥ ५४ ॥
नदीनदसमायुक्तं सर्वर्तुफलसंयुतम् । सौधैः सुधाधवलितैरालीढ[21]गगनान्तरम् ॥ ५५ ॥
मातङ्गैश्च तुरङ्गैश्च सर्वतः समलङ्कृतम् ॥ ५६ ॥

## विज्ञानकन्दः

श्रीचिद्विलास कथितं भवता गुरूणाम् । रुद्धापुरीगमनमुन्नतभावगर्भम् ।
तत्राऽकरोत्किमयमीशसमाहितात्मा । विस्तारयाऽद्य मम तात तदप्यशेषम् ॥ ५७ ॥

## चिद्विलासः

विज्ञानकन्द गुणवृन्द-समुज्ज्वलं ते । चेतो नितान्तमतिभक्तिगुरोः पदाब्जे ।
किं गोप्यमस्ति भुवने सति शिष्यवर्ये । वक्ष्यामि सम्यगधुना शृणु सादरं त्वम् ॥ ५८ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीचिद्विलासयतीन्द्रविज्ञानकन्दतपोधनेन्द्रसंवादे शङ्करविजयविलासे पञ्चदशोऽध्यायः ॥

---

8. पाश्वा। (A) 9. देहे°। (A) 10. शप्तो। (A) 11. तप्ताङ्गं विप्र°। (A), (B); (C) 12. दैवं°। (A) 13. तस्मात्त्वमद्वयं ब्रह्म-ध्यानं। (A), (B); (C) 14. खण्डयन् विमतान्। (A), (B); (C); 15. °परागतिः। (A), (C); 15a. सर्वशास्त्रार्थं। (B), (C) 16. पपात। (A) 17. तन्निवेद्य। (A); तान्नि° (B); (C) 18. विनतः। (A) 19. समुद्यम्य पदा°। (A) 20. श्रद्धासमंचितैः। (A), (B); समन्वितैः। (C); 21. °लीढं गगना°। (A)

# ॥ अथ षोडशोऽध्यायः ॥

ततः श्रीशङ्कराचार्यदेशिकेन्द्रो विचक्षणः। स्थित्वा चैकदिनं तत्र रुद्धाख्यनगरान्तरे ॥ १ ॥
भट्टाचार्यमदृष्ट्वाऽसौ तत्र विस्मितमानसः। अप्राक्षीदथ वृत्तान्तं तस्यैकेन[1] द्विजन्मना ॥ २ ॥
तद्वचो हृदि कृत्वाऽसौ यत्राऽस्ते विजने वने। भट्टाचार्यः सुधीवर्यः शयानः[2] स तुषानले ॥ ३ ॥
तं प्रदेशं विचिन्वानस्तत्र तत्र चरन् क्रमात्। अधिगत्य निरीक्ष्यैनं तुषानलशिरोगतम् ॥ ४ ॥
लब्धवर्णविशीर्णोऽसि किमिदं वर्णयाऽद्य मे। तुषानलशिखातीव्रबाढलीढतनुः[3] क्षणात् ॥ ५ ॥
इत्थमुक्तोऽथ गुरुणा भट्टाचार्यो द्विजोत्तमः। स्वामिन् यतिन् भवानद्य किमुद्दिश्य समागतः ॥ ६ ॥
अथ वा[4]ऽस्मत्कृतैः पुण्यैरनेकजनुरागतैः। भवादृशां भुवि भवेदन्यथा कथमीक्षणम् ॥ ७ ॥
विशेषतो मुमूर्षोर्मे धन्योऽस्मि यतिकेसरिन्। नृणां संसृतिमोक्षाय त्वादृशैः संगतिर्भवेत् ॥ ८ ॥
इत्युक्तवति विप्रेन्द्रे भट्टाचार्यविपश्चिति[4a]। द्राक्षारसद्रवमुचं वाचमूचेऽथ देशिकः ॥ ९ ॥
किञ्चिदेव मयाऽऽकर्णि चरितं ते विचक्षण। शुश्रूषते मनो मेऽद्य तदप्यखिलमादरात् ॥ १० ॥
इत्युक्तः स जगादाऽथ शङ्कराचार्यमादरात्। अहं विज्ञातवान् सर्वं शास्त्रतत्त्वं द्विजोत्तमैः ॥ ११ ॥
सौगतानां मतं ज्ञात्वा श्रुतिजात[5]विनिन्दितम्। तत्कुलीनं गुरुं प्राप्य तदन्तेवासिभिः समम् ॥ १२ ॥
पठन्ननुदिनं तत्र कतिचिद्दिवसान्यहम्। श्रुतिस्मृतिविरुद्धार्थबोधकांस्तद्विदूषकान् ॥ १३ ॥
दुराकर्णान्[6] समाकर्ण्य विदीर्णमनसो[7] मम। अर्णो[8] न्यपतदक्ष्णोऽ[8a]द्धा स्थूलमुक्ताफलाकृति ॥ १४ ॥
ददृशुस्तत्र तच्छिष्यास्तदा सर्वत्र संस्थिताः। अपृच्छन् किमिदं तेऽद्य निष्पपाताम्बु लोचनात् ॥ १५ ॥
अवादिषमहं तेभ्यः कपटेनेत्थमञ्जसा। युक्तीराकर्ण्य निर्णिक्ता भवद्देशिकनिर्मिताः ॥ १६ ॥
समुद्यन्निर्भरानन्द[9]तुन्दिलावशचेतसः। निःसस्रुरश्रुव्याजेन [10]बहिरानन्दबिन्दवः ॥ १७ ॥
इत्थं जल्पत्यनल्पं मय्यग्रजं मां तु मेनिरे। ततः साप्तपदीनं ते विससर्जुः पुरेव मे ॥ १८ ॥
विज्ञाय तद्विनिष्क्रम्य तन्मतान्यभितो[11]ऽप्यहम्। युक्तिभिश्च तदुक्तार्भिविवाद्य नृपसंसदि ॥ १९ ॥
विजित्य सौगतान् सर्वान् विज्ञाप्यैतन्महीश्वरम्। शिरांसि छेदयामास सौगतानां समन्ततः ॥ २० ॥
विद्योपदेष्टृनिधनप्रसक्तप्रबलांहसः। निष्कृतिं धर्मशास्त्रेषु विलोक्य प्रविनिश्चिताम् ॥ २१ ॥
तुषाग्निमध्यशयनं क्रमेणाऽ[12]सुविमोचनम्। तदर्थमेव विजने तुषानलशिखावृतः ॥ २२ ॥
असूनहं विमोक्ष्यामि किञ्चिद्दग्धतनुर्यते। भवदागमनं मेऽ[13]द्य पुरातनशुभोत्करैः ॥ २३ ॥
इत्युक्तवति विप्रेन्द्रे भट्टाचार्ये[14] विपश्चिति। विद्वन्न किञ्चिज्जानासि श्रीमद्गीतार्थभावनाम् ॥२४॥
को हन्ति हन्यते को वा सर्वं सर्वेश्वरेच्छया। अस्मिन्नर्थे श्रुतिततिर्भूयसी परिदृश्यते ॥ २५ ॥
इत्युक्ते यतिवर्येऽस्मिन् विस्मितः स द्विजोऽब्रवीत्। अस्तु पुस्तकमेतेषां हस्ते[15] शस्तं प्रदृश्यते ॥२६॥
व्यरच्य[16]प्यनघं भाष्यं केनापि [17]यतिनेत्यहम्। [18]अश्रौषं स भवानेव[19] स्यादेतद्भाष्यपुस्तकम् ॥२७॥

1. तस्यैकं ब्राह्मणोत्तमम्। (A) 2. भट्टाचार्यसुधीवर्यः नियानः। (A) 3. बाधतेऽतीव तत्क्षणात्। (A); 4. अथवा मत्कृतैः। (A) 4a. °विनिश्चिते। (B); 5. °जाति°। (A), (B); (C); 6. दुराकर्ण्यान्। (A), (B); 7. °मनसस्तथा। (A) 8. अंभो। (A); 8a. °ऽथ। (B) 9. °रानन्दं तुन्दि°। (A) 10. भक्ति°। (A) 11. °मतान्यविधो°। (A) 12. °णाऽशु°। (A) 13. वेद्य। (A) 14. भट्टाचार्यविपश्चिति। (A); (C); 14a °श्वराज्ञया। (B); 15. हस्ते शास्त्रं। (C); 16. विरच्या°। (A) 17. केनासि। (A) 18. अश्रूषं। (A) 19. भवानेह। (A)



यद्यायासि पुरा किंचित्कतिभिर्दिवसैरपि। विलोक्य त्वत्कृतं भाष्यं चतुरध्यायसंमितम् ॥ २८ ॥
स्थाने तत्प्रविचार्यैव वक्तव्यं सूरिभिर्ननु। अर्धदग्धतनोर्मेऽद्य कथं निश्चलता मतेः ॥ २९ ॥
भवद्दिव्यपदाम्भोजचरणादेव[20] पावितः। तथाऽप्यर्धा[20a]वदग्धस्य जीवनं स्यात्पुनः कथम् ॥ ३० ॥
अतः प्रयाहि काश्मीरं सर्वसम्पत्समुज्ज्वलम्। मदन्तेवासिनांवर्यः सर्वशास्त्रविशारदः ॥ ३१ ॥
वाराणासं न [21]विंशान्यो मन्मुखेनाऽप्यधीतवान्। सूत्राणां जैमिनीयानामर्थान्निश्चित्य तत्त्वतः ॥३२॥
कर्मैव ब्रह्म मन्वानस्तत्रैव[21a] कृतनिश्चयः। आस्ते मण्डनमिश्रार्यः साक्षाद्धातृ[22]कलोद्भवः ॥ ३३ ॥
भार्या सरस्वती[23] वाणी तस्याऽसीच्छुभलक्षणा। कथं तस्याऽभवत्पत्नी विद्वंस्तत्कारणं शृणु ॥ ३४॥
निगमाध्ययने पूर्वं दूर्वासा धातुरन्तिके। स्वरेऽस्खलत्तदा वाणीं विहसन्तीं शशाप ह[24] ॥ ३५ ॥
मानुषी त्वं भवेत्या[25]शु शप्त्वा तस्यै मुनिर्ददौ। दर्शने शापमोक्षं च मर्त्यमूर्तेरुमापतेः ॥ ३६ ॥
अथ सा भारती जज्ञे शोणातीरे द्विजन्मनः। तनया विष्णुमित्रस्य सर्वाङ्गमधुरा सती ॥ ३७ ॥
योगिभिर्मनसा ध्येया यस्या वर्णमयी तनुः। सा वाणी बाल्यमायाता पितृभ्यां परिलालिता ॥ ३८ ॥
क्रमेण ववृधे चान्द्रीकलेव सितपक्षगा। विवाहोचितकाले तामुपयेमे यथाविधि ॥ ३९ ॥
विद्वान्मण्डनमिश्रार्यः सर्वज्ञां जगदीश्वरीम्। तया पत्न्या सहैवाऽस्ते मच्छिष्यो लोकवित्तमः ॥ ४० ॥
यदि वादे चिकीर्षा ते[26] कण्डूतिं तेन वारय। स चेज्जितः स्याद्भवता शङ्कराचार्यपुङ्गव ॥ ४१ ॥
प्रदेहि तस्य संन्यासं तेन कारय वार्तिकम्। प्रणम्य मनसैवैनं स्तुत्वा चोत्थातुमक्षमः ॥ ४२ ॥
प्राहिणोद्भक्तिभरितो[27] भट्टाचार्यः सुधीरिति। ततः पुरीं समागत्य रुद्धाख्यां देशिकेश्वरः[27a] ॥४३॥
भद्रसेनेन तेनाऽपि वन्दितो धरणीभृता। कृत्वा च तं महीपालं शुद्धाद्वैतपरायणम् ॥ ४४ ॥
तत्रत्यानखिलांश्चक्रे शुद्धाद्वैतपरायणान्। ततः सर्वैरभिनतः[28] पौरैर्जानपदैरपि ॥ ४५ ॥
कांस्यतालधरैः कैश्चिदन्यैर्लास्यपरैरपि। स्तुवद्भिरपदानानि विविधानि समन्ततः ॥ ४६ ॥
मर्दलध्वाननोद्युक्तैश्चामरोद्वीजनोद्यतैः। तालवृन्तधरैः कैश्चिच्छ्वेतछत्रधरैरपि ॥ ४७ ॥
काश्मीरं गन्तुमुद्युक्तः शङ्कराचार्यदेशिकः। यत्राऽस्ते सा गिरां साक्षाद्देवताऽपि मुदान्विता ॥ ४८ ॥

## विज्ञानकन्दः

भट्टाचार्यं विलोक्यानुपमितधिषणं तेन संभाष्य भाष्ये।
तत्रत्यानाकलय्याऽद्वयभजनपरान् भद्रसेनं च भूपम्।
तच्छिष्यं जेतुमारादगमि गुरुवरेणाभ्यधायीति वृत्तम्।
काश्मीरे तत्र किं वा व्यतनुत गुरुराट् चिद्विलासाऽभिधत्स्व ॥ ४९ ॥

## श्रीचिद्विलासः

विज्ञानकन्द कथयामि कथां क्रमेण। वत्साऽधुनाऽधिहृदयं कलयाऽतिभक्त्या।
श्रीदेशिकेश्वरवरेण च तत्र क्लृप्ताम्। आकर्णय श्रुतिपथस्य विनोददात्रीम् ॥ ५० ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीचिद्विलासयतीन्द्रविज्ञानकन्दतपोधनेन्द्रसंवादे शङ्करविजयविलासे षोडशोऽध्यायः ॥

19a. तत्र विचार्यैव। (B); 20. दर्शनादेव लालितः। (A) 20a. °धंवि°। (बी); (C); 21. वारानासन्नविंशान्यो। (A); (C) (विंश्यान् वै); त्रिंश्यास्त्वे........मुखे वाप्य°। (B); 21a. (मन्वानः) शास्त्रेषु। (B); (C); 22. °कुलो°। (A) 23. सरसवाणीति। (A), (B), (C); 24. सः। (A), (C); 25. भवत्वाशु। (A) 26. चिकीर्षास्ते। (A) 27. °भरतः। (A) 27a. देशिकोत्तमः। (B); (C); 28. °भिहितः। (A)

# ॥ अथ सप्तदशोऽध्यायः ॥

निःससार ततस्तस्मात्पुराद्रुद्राभिधानतः। छात्रैश्चित्रचरित्रैस्तैरन्वितो विस्मयाङ्कितैः ॥ १ ॥
जेतुं मण्डनमिश्राख्यं विधातारमिवाऽपरम्। काश्मीरं विद्वदाधारं शुभाकरमवाप सः ॥ २ ॥
इक्षवः सुवते मुक्ताः प्रतिपर्वसमुज्ज्वलाः। अकृष्टपच्या [1]धरणी फलानि फलति [2]स्फुटम् ॥ ३ ॥
यदीयां सुषमां वीक्ष्य विलक्ष्या[2a] हरिदीश्वराः। यत्रैवं न्यवसन् प्रीताः शारदाश्रयणोद्यताः ॥ ४ ॥
मन्दारः पारिजातो वा दिव्येको हि [3]विराजते। यत्रत्यास्तरवः सर्वे वाञ्छितार्थफलप्रदाः ॥ ५ ॥
दाडिमः पन[4]सो बिल्वो नारिङ्गो मातुलिङ्[5]गकः। कोविदारो दन्तशठः केसरो लिकुचद्रुमः ॥६॥
अयत्ननिर्मिता सेकमरन्दैरेव[6] तुन्दिलाः। फलन्ति वाञ्छिता[7]नर्थान् समर्थाः स्वर्द्रुमा इव ॥ ७॥
शुकत्रोटी[8]पुटावीषद्दृष्टदिक्षोः[9] स्रवद्रसैः। प्रवहन्त्यमिताः कुल्यास्तन्मुक्ताः शर्कराङ्किताः ॥ ८ ॥
घटोध्न्यो[10] धेनवो यत्र कामदोग्ध्र्यस्तनूभृताम्। काश्मीरजन्मनः स्थानं भृङ्ग[11]नाभेर्निवासभूः ॥९॥
मनो वा मातरिश्वा वा जनेषु[12] पतगाधिपाः। अर्वाणो वाऽथ तत्रत्या गीर्वाणाधिपवाजिनः ॥१०॥
मदावलाश्चतुर्दन्ताः सुरेशगजवंशजाः। अभितः कुम्भ[12a]योरन्तर्मौक्तिकैः समलङ्कृताः ॥ ११ ॥
सुधाधवलितैः सौधैर्हसन्तं द्यामिव स्थितम्। अभ्यर्णप्रसरत्सृ[13]प्रातरङ्गकलिताप्लवैः ॥ १२ ॥
कल्हारकलिकामोदकषायितदिगन्तरैः। तत्रत्यविस्मयालोकादिव[14] मन्थरगामिभिः ॥१३ ॥
समीरैः पान्थविश्रान्तसमर्पणविचक्षणैः। समुल्लसल्लतालास्यविद्या[15]भ्यासोचितैः श्रियम्[16]॥१४॥
विज्वल[17]द्विन्दुराख्यातं पुरमाप स देशिकः। पप्रच्छैकं द्विजं तत्र तद्गेहं गन्तुमुन्मनाः ॥ १५ ॥
क्व वा मण्डनमिश्रस्य वर्तते सद्म विस्तृतम्। तमुवाच स विप्रोऽपि देशिकेन्द्रमनन्यधीः ॥ १६ ॥
शृणु तत्सद्मविस्तारं श्रीमन् शङ्करदेशिक। विद्यालयमिति ख्यातं तालद्रुमसमुच्छ्रितम् ॥ १७ ॥
प्राकारतोरणाकीर्णशिलास्तम्भशतावृतम्। गर्भागारेश्वरागारशय्यागारसमुज्ज्वलम् ॥ १८ ॥
तत्पुरः पाठशालाभिर्विशालाभिः समन्वितम्। वितर्दिकां विनिर्माय दशहस्तसमुन्नताम् ॥ १९ ॥
तत्राऽध्यस्य स्वयं शिष्यानध्यापयति नित्यशः। आगारोभयतो वीथ्यौ विनिर्मायाऽतिशोभने ॥ २० ॥
तद्द्वारेषु च सर्वत्र पाठयित्वा श्रुतीरपि। तदङ्गान्यपि साङ्गानि पुराणान्यखिलान्यपि ॥ २१ ॥
पञ्जरेष्वभितो बद्धाः प्रबुद्धा इव सर्वतः। शुकशारीमुखा यत्र तन्वते ननु वाङ्मुखम् ॥ २२ ॥

यद्वीथिकाद्वारनिबद्धकीरैः–। रारादधिष्ठाय परस्परेण।
विधीयते शास्त्रकथाप्रसङ्गः। जानीहि तन्मण्डनमिश्रसद्म ॥ २३ ॥
पातञ्जले निर्मलकापिले च। सूत्रेषु वा जैमिनिनिर्मितेषु।
कीरैरजस्रं क्रियते प्रसङ्गः। जानीहि तन्मण्डनमिश्रवेश्म[18] ॥ २४ ॥
गायन्ति सामानि च यत्र शार्यः। स्तुवन्ति कीरा यजुषा ऋचाऽपि।
परस्परं [18a]सस्वरमादरेण। जानीहि तन्मण्डनमिश्रधाम ॥ २५ ॥
काव्यानि दिव्यानि पठन्ति यत्र। शुकाङ्गनाः काञ्चनपञ्जरस्थाः।
सद्धर्मशास्त्राणि समन्ततोऽपि। जानीहि तन्मण्डनमिश्रसद्म ॥ २६ ॥

---

1. °पत्या। (A) 2. फलितः। (A) 2a. विलज्जा। (B); (C); 3. दिविदारविराजिते। (A); दिव्यो कोहि। (B); (C); 4. फनसो। (A) 5. मातुलङ्गकः। (A) 6. °रिव मण्डिताः। (A); निर्मितानेकमरन्दै°। (B) 7. प्रार्थितानर्थान्। (A), (B); (C); 8. °त्रोटी°। 9. °दिक्षोदव°। (A) 10. घटोध्नी। (A) 11. मृग°। (A), (C); 12. जवेषु। (A), (C); 12a. शुभयो°। (B); 13. (च्छिप्रा)। (A) 14. लोकाः दिवमन्तर°। (A); °दिव मन्दर°। (B); 'मन्दार°। (C); 15. दिव्याभ्या°। (A) 16. श्रितम्। (A), (B); (C); 17. उज्ज्वल°। (A) 18 °सद्म। (A) 18a. सुस्वर°। (B); (C); जानीहि केचित्कथयन्ति सत्यम्।



कर्मैव केचित्कथयन्ति सत्यम्। तत्पूर्वपक्षं च परे नयन्ति।
यद्वीथिकाद्वारनिबद्धकीराः। जानीहि तन्मण्डनमिश्रसद्म ॥ २७ ॥

इत्थमुक्तो द्विजेनाऽथ श्रीमद्देशिकपुङ्गवः। जगाम तद्गृहद्वारं लक्ष्मणा तेन लक्षितम् ॥ २८ ॥
तस्मिन्नेव दिने तस्य सद्मन्यासीत्तु पैतृकम्। ब्राह्मणार्थं मुनिं[19] व्यासं पितृस्थाने निवेश्य च ॥ २९ ॥
तत्सदृग्द्विजदौर्गत्याद्वि[20]श्वेदेवस्थले पुनः। लक्ष्मीनारायणाभिख्यं शालिग्रामं निवेश्य च ॥ ३० ॥
कवाटं सुस्थिरं बध्वा मध्यान्हे समवस्थितः। शङ्कराचार्यवर्योऽपि पश्यन् द्वारं कृतार्गलम् ॥ ३१ ॥
पादुकाघुटिका[22]सिद्धिमुखाः सर्वाश्च सिद्धयः। विन्यस्ता[23] हस्त एवाऽस्य देशिकेन्द्रस्य धीमतः ॥३२॥
पद्मपादमुखान् शिष्यान् संस्थाप्य बहिरेव सः। जवाद्गगनमार्गेण न्यविक्ष[23a]त्तद्गृहाङ्गणम् ॥३३॥
तदा मण्डनमिश्रोऽपि विप्रपादार्चनोद्यतः। पाराशर्यं पितृस्थाने निवेश्याऽथ निवृत्य सः ॥ ३४ ॥
विश्वेदेवप्रदेशे तु समासीनं यतीश्वरम्। चुकोप बहुधा दृष्ट्वा व्यासेनाऽपि निवारितः ॥ ३५ ॥
किं वा यतिन् सुरा पीता न हि श्वेतैव लक्ष्यते। कुतो मुण्डी समागास्त्वमागलादिति चाब्रवीत् ॥३६॥
किं मत्तोऽसि यतिन्मत्तो भवानेव गृहिष्व[24]हो। किं वा त्वं जडवद्भासि देहे तद्भौतिके भवेत् ॥ ३७॥
निर्भाग्यस्त्वं कथं यातो यतिदूषक एव सः। किं चोरवृत्त्यैवाऽयातो न चोरोऽहं समागतः ॥३८॥
स एव तस्करो लोके तत्त्वज्ञानविवर्जितः। संन्यासः केन ते प्रोक्तः केनैव कथितः पुरा ॥ ३९ ॥
महतीं वहतः कन्थां करे दण्डकमण्डलू। शिखायज्ञोपवीताभ्यां तव भारो[25] भवेत्कथम् ॥ ४० ॥
आश्रमोचितधर्मत्वात्कन्थाऽपि ध्रियते मया। शिखायज्ञोपवीताभ्यां श्रुतेर्भारो भविष्यति ॥ ४१ ॥
अनाकार्य किमायातः किमाव्हानं तपस्विनाम्। इत्यादिकं वचः शृण्वन् सत्यवत्यात्मजस्तदा ॥ ४२ ॥
प्रोचे[26] मण्डनमिश्रं तमनाकार्यागतोऽपि यः। विष्णुरेवेति मन्तव्यो नात्र कार्या विचारणा ॥ ४३ ॥
अयं परं तु संन्यासी सूकृतात्ते समागतः। जाने महत्त्वमेतस्य पुरैव ज्ञानचक्षुषा ॥ ४४ ॥
अस्मै पाद्यं प्रदेह्यद्य भास्वते चन्द्रमा इव। सत्यवत्यात्मजेनोक्तं दातुं पाद्यं समुद्यतम् ॥ ४५ ॥
तदा मण्डनमिश्रं तमवादीद्देशिकेश्वरः। नाऽहं भिक्षार्थमायातो वादभिक्षां प्रदेहि मे ॥ ४६ ॥
तदाकर्ण्य गुरोर्वाक्यं विस्मयाविष्टमानसः। कुरु भिक्षां यतिश्रेष्ठ प्रसङ्गस्तदनन्तरम् ॥ ४७ ॥
जायतामिति निश्चित्य ततः कर्म चकार सः ॥ ४८ ॥

## विज्ञानकन्दः

गत्वा मण्डनमिश्रसद्म तदनु स्थित्वा च पाद्यस्थले।
स्वासीनं यतिपुङ्गवं स कुपितो दृष्ट्वा निनिन्दाऽधिकम्।
श्रीमच्छङ्करदेशिकेश्वरवरस्तस्योत्तरं दत्तवान्।
श्राद्धानन्तरमेव वाङ्मुखविधौ तौ निश्चयं चक्रतुः ॥ ४९ ॥
श्रीचिद्विलास कथितं भवता पुरा मे। श्राद्धं विधाय तदनन्तरमेव वादे।
निश्चिक्यतुस्तदनु वा किमकुर्वतां तौ। व्यक्तं तदद्य वद सर्वकला[27]कुलेन्द्र ॥ ५० ॥

## श्रीचिद्विलासः

विज्ञानकन्द कथयामि कथामुदाराम्। श्रीदेशिकेश्वरकृतां तदनु प्रभूताम्।
आकर्णयाऽद्य निरवद्ययशोविशेषाम्। लोकोपकारकृतये कृतनैकरूपाम् ॥ ५१ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीचिद्विलासयतीन्द्रविज्ञानकन्दतपोधनेन्द्रसंवादे शङ्करविजयविलासे सप्तदशोऽध्यायः ॥

---

19. मुनिन्यासं। (A) 20. °र्गत्या विश्वे°। (A); °वैश्व°। (B); (C); 21. सालग्रामं। (A), (B); (C); 22. °घटिका°। (A) 23. विन्यस्य। (A) 23a. न्यविशत्। (B); (C); 24. गृहे°। (A) 25. भारोऽभवत्। (A), (B); (C); 26. ऊचे। (A) 27. सर्वं किलाकुलाद्रे। (A); सर्वकलाकुलाद्रे। (B);

# ॥ अथाऽष्टादशोऽध्यायः ॥

श्राद्धानन्तरमेवेमौ संनिविश्य स्थिरासने। सन्धां बबन्धतुस्तीव्रां भवताऽहं जितो यदि ॥ १ ॥

गृही भूयां भवानेव जितो यदि मया पुनः। स्वीकुरुष्वेति संन्यासं सत्वरं नात्र संशयः ॥ २ ॥

साक्षिणी तव भार्याऽत्र बिजानाति च साऽखिलम्। विद्यास्वष्टादशा[1]स्वेष तत्संख्य[2]दिवसैरपि ॥ ३ ॥

वाङ्मुखं संमुखीनः सन्[3] कर्तुमेव समुत्सुकः। प्रीता सरसवाणी सा पश्यन्तीवा[3a]वतस्थुषी ॥ ४ ॥

विद्यामेकां समारभ्य प्रसङ्गं चक्रतुः क्रमात्। विद्वान्मण्डनमिश्रोऽपि श्रीमान् शङ्करदेशिकः ॥ ५ ॥

प्रोचे मण्डनमिश्रोऽथ तदास्तां यतिपुङ्गव। संन्यासस्तु कलौ न स्याद्‌भवता स्वीकृतः कथम् ॥६॥

अस्मिन् शृणु प्रमाणानि श्रुतिस्मृत्युदितान्यपि। अश्वालम्भं गवालम्भं संन्यासं पलपैतृकम् ॥ ७ ॥

देवरेण सुतोत्पत्तिः कलौ पञ्च विवर्जयेत्। चत्वारोऽप्याश्रमा ह्येते यज्ञाध्ययनवर्जिताः ॥ ८ ॥

ब्राह्मण्यादेव हीयन्ते यद्यप्युग्रतपोधराः[4]। यज्ञोपवीतं सर्वेषां द्विजानां मुक्तिसाधनम् ॥ ९ ॥

परित्यजन्ति वै[5] मोहात्ते वै निरयगामिनः। शिखायज्ञोपवीतेन त्यक्तेनाऽसौ कथं[5a] द्विजः ॥ १० ॥

सन्ध्यां नोपासते विप्राः कथं ते ब्राह्मणाः स्मृताः। वेदोक्तमाचरन्मर्त्यो नरकं नैव पश्यति ॥ ११ ॥

कर्मणा साध्यते स्वर्गो[5b] राज्यपुत्रादयो यतिन्। तस्मात्कर्म प्रकुर्वन्ति वेदज्ञा भूसुरोत्तमाः ॥ १२ ॥

कर्मकालं विजानाति काले कर्म करोति यः। स एव ज्ञानवाँल्लोके विद्वांसः प्रवदन्ति हि ॥ १३ ॥

सत्कर्माचरणे निष्ठं ज्ञानवान् भक्तिमान् विदुः। कलावित्यादिवचनैः संन्यासस्तु निषिध्यते ॥ १४ ॥

स एव भवताऽग्राहि किं पुनर्ब्रह्मचारिणा। इत्ययुक्तं तदीयोक्तमाकर्ण्य गुरुपुङ्गवः ॥ १५ ॥

शृणु बालिश भूयोऽपि प्रमाणं कथयामि ते। यावद्वर्णविभागोऽस्ति यावद्वेदः प्रवर्तते ॥ १६ ॥

संन्यासश्चाग्निहोत्रं च तावदेव कलौ युगे। प्रथमे वा द्वितीये वा वानप्रस्थाश्रमेऽपि वा ॥ १७ ॥

यदा विरज्यते बुद्धिः सोत्तमाश्रममाश्रयेत्। ये च सन्तानजा दोषा ये च स्युः कर्मसंभवाः ॥ १८ ॥

संन्यासस्तान् दहेत्सर्वांस्तुषाग्निरिव काञ्चनम्। प्रथमादाश्रमाद्वाऽपि विरक्तो भवसागरात् ॥ १९ ॥

ब्राह्मणो मोक्षमन्विच्छंस्त्यक्त्वा संगान् परिव्रजेत्। चत्वारो ब्राह्मणस्योक्ता आश्रमाः श्रुतिचोदिताः ॥ २० ॥

क्षत्रियस्य त्रयः प्रोक्ता द्वावेको वैश्यशूद्रयोः। वपनं सशिखं कृत्वा त्यजेत्सूत्रं बहिर्धृतम् ॥ २१ ॥

ब्रह्मैव सूत्रमित्युक्तं तादृक्सूत्रं वहेद्‌बुधः। यत्सूचयति विप्रं[5c] तत्परमं पदमुच्यते ॥ २२ ॥

तादृषसूत्रं विजानीयात्स सूत्रज्ञोऽत्र कथ्यते। बहिः सूत्रं त्यजेद्योगी जीवन्मुक्तिपदे स्थितः ॥ २३ ॥

एवमर्थं विजानन्ति ते स्युर्ज्ञानोपवीतिनः। ज्ञानं शिखा ज्ञानिनां तु निष्ठा[5d] ज्ञाने सदुच्यते ॥ २४ ॥

विशुद्धं ज्ञानमेतेषां वह्नेरिव शिखोच्यते। ज्ञानमेव परं ब्रह्म तद्दधाति[6] च यः[7] पुमान् ॥ २५ ॥

शिखावानुच्यते सोऽयं नेतरे केशधारिणः। यज्ञोपवीतं कर्माङ्गं वदन्त्युत्तमबुद्धयः ॥ २६ ॥

उपकुर्वाणकात्पूर्वं यतो लोके न दृश्यते। यावत्कर्माणि कुरुते तावदेवाऽस्य धारणम् ॥ २७ ॥

---

1. °दशस्व°। (A), (C); 2. °संख्या°। (A), (B); (C); 3. तर्तु°। (A) 3a. पश्यतीव च त°। (B); 4. °धनाः। (A), (B); (C); 5. ये। (A), (B); (C); 5a. यथा। (B); (C); 5b. स्वर्गराज्य°। (B), (C) the reading ill agrees with the verb साध्यते; 5c. विश्वं। (B); (C); 5d. निष्ठाज्ञानं स उच्यते। (B); (C); 6. तद्धारयति यः। (A), 7. यत्सुधीः। (B); यः सुधीः। (C);



तस्मादस्य परित्यागः क्रियते कर्मभिः सह। अग्निहोत्रविनाशे तु जुह्वादीनि यथा त्यजेत् ॥ २८ ॥

यथा च मेखलादीनि गृहस्थाश्रमवाञ्छया। पत्नीयोक्त्रं[8] यथेष्टचन्ते सोमान्ते च यथा ग्र[9]हात् ॥ २९ ॥

तद्वद्यज्ञोपवीतस्य त्यागमिच्छन्ति योगिनः। कौपीनाच्छादनं वस्त्रं कन्थां शीतनिवारिणीम् ॥ ३० ॥

अक्षमालां च गृहीयाद्वैणवं दण्डमव्रणम्। माधूकरमनेकान्नं परहंसः समाचरेत् ॥ ३१ ॥

अक्षरं परमं ब्रह्म सदा ध्यायन् जितेन्द्रियः। शिखां यज्ञोपवीतं च नित्यकर्म परित्यजेत् ॥ ३२ ॥

वदत्येवं भगवति शङ्कराचार्यदेशिके। श्रुतिस्मृतिपुराणादिवचोगुम्फैर्विलज्जितः ॥ ३३ ॥

तदा मण्डनमिश्रोऽपि विस्मयाकुलितान्तरः। प्रत्युत्तरमसौ दातुमसमर्थोऽव[10]तस्थिवान् ॥ ३४ ॥

किमुद्‌घुष्टं त्वया मूढ पुरेदानीं किमीक्षसे। अचेतनं कथं कर्म निःश्रेयसफलप्रदम् ॥ ३५ ॥

तत्प्रेरकं परं ब्रह्म वर्तते श्रुतिसंमतम्। दुष्कर्मकृदरिष्टः[11] स्यादाम्नायपथदूषकः ॥ ३६ ॥

उत्तमाश्रमिणो यो वा दूषयेत्स ततोऽधिकः। संरब्धस्य गुरोर्वाक्यमाकर्ण्याऽथ तदङ्गना ॥ ३७ ॥

सती सरसवाण्येषा समुत्थायाऽथ सत्वरम्। भिक्षायै यतिनं नित्यमाह्वयन्ती ततः पतिम् ॥ ३८ ॥

भोजनार्थेति विज्ञा सा तस्मिन्नष्ट[12]दशेऽहनि। विज्ञाय तेन विजितं देशिकेन्द्रेण वल्लभम् ॥ ३९ ॥

तावुभावपि भिक्षार्थमाह्वयामास सत्वरम्। ततो मण्डनमिश्रोऽसौ समुत्थायाऽतिभक्तितः ॥ ४० ॥

प्रदक्षिणत्रयं कृत्वा नमस्कृत्य सहस्रशः। यद्यदुक्तं मया स्वामिन्नुत्त[13]माश्रमनिन्दनम् ॥ ४१ ॥

तत्सर्वं क्षमतां श्रीमन् शंकराचार्य[14] पुंगव। पुनीहि मां कृपावृष्ट्या मोहजातं निवारय ॥ ४२ ॥

ज्ञानिनं मां विधेह्यद्य शुध्दाद्वैत[15] परायणम्। दत्वा संन्यासमेवाद्य त्वदन्तेवासिनं कुरु ॥ ४३ ॥

एवं वदति विप्रेन्द्रे तद्वचस्तुष्टमानसः। ददौ मण्डनमिश्राय संन्यासं[16] जितचेतसे ॥ ४४ ॥

सुरश्रेष्ठांशजातत्वाद्‌गात्वा[17] तद्देशिकोत्तमः। सुरेश्वराचार्य इति मुदाऽभिख्यामदा[18]त्तदा ॥ ४५ ॥

एतत्सर्वं समालोक्य दिवं गन्तु समुद्यता। दूर्वासशापनिर्मुक्ता वाणी स्तुत्वाऽथ देशिकम् ॥ ४६ ॥

## विज्ञानकन्दः

जित्वा मण्डनमिश्रमेष गुरुराट् जेतुं तदीयाङ्गनाम्।
साक्षादेव सरस्वतीं शुभवतीं[19] स्वर्गन्तुमेवोद्यताम्।
आचष्टाऽथ किमेष तत्र कृतवान् श्रीचिदिलासाऽखिलम्।
ब्रूह्यग्रेऽपि विशेषहर्षजनकं पापव्रजोद्‌भेदकम् ॥ ४७ ॥

## चिद्विलासः

विज्ञानकन्द चरितानि विचित्रितानि। श्रीशङ्करस्य विमतौघभयंकरस्य।
वक्ष्यामि विध्द्य[21]वहितो भव तानि सम्यक्। [22]संकीर्तनश्रुतिविधौ महती तवाऽस्था ॥ ४८ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीचिद्विलासयतीन्द्रविज्ञानकन्दतपोधनेन्द्रसंवादे शङ्करविजयविलासेऽष्टादशोऽध्यायः ॥

---

8. पत्नियोक्तं विनिष्ठंते। (A) ? 9. ग्रहान्। (A), (B); (C); 10. °ऽथ तस्थिवान्। (A), (B); (C); 11. °कृद्विनष्टः। (A); कृद्वरिष्ठः। (B); (C); 12. अष्टा°। (A), (B); (C); 13. तत्तदाश्रम°। (A), (C); 14. °देशिक। (A), 15. °विशारदम्। (A) 16. च जितेन्द्रियः। (A); जितरेतसे। (B); (C); 17. °ज्ञाततत्त्वाच्च देशिकः। (A); ज्ञात्वा। (B); (C); 18. प्रख्यातिमगमत्तदा। (A) 19. शुभवतीं। (A) 20. ब्रूह्यद्यैष। (A) 21. तत्र भवतो महतश्च। (A) 22. सत्कीं°। (A)

राजाज्ञां विरचय्य सोऽपि सचिवः कृत्वा तदीयोदितम् ।
भूयस्तद्विनिवेदितुं नृपगृहं प्रापेत्यवोच : खलु ।
शिष्यास्ते कथमाचरन् किमवदन् गत्वा सभामण्डलम् ।
तत्सर्वं कथयाऽद्य हृद्यम[40]हस : श्रीचिद्विलासाऽग्रत : ।।५२।।

## श्रीचिद्विलासः

भानोर्गाढतमोवृतिर्हुतभुजो यद्वा भवेच्छीतता ।
मालिन्यं सलिलस्य चेद्धिमरुचः सार्वत्रिकी पूर्णता ।
तस्याऽसीद्र[41]तिलोलता त्रिपुरजित्पूर्णाकृतेरप्यहो ।
तद्वाणीं प्रविजित्य तां वशयितुं नेतुं पुरीं स्वामपि ।।५३।।

विज्ञानकन्द तदनन्तरमेष राजा । विज्ञाय तत्प्रकथितं तदनन्यभाव : ।
यद्यच्चकार तदनु शृणु वत्स भक्त्या । श्रीदेशिकेश्वरकथास्वतिरज्यसे त्वम् ।। ।।५४।।

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीचिद्विलासयतीन्द्रविज्ञानकन्दतपोधनेन्द्रसंवादे शङ्करविजय-विलासे एकोनविंशोऽध्यायः ।।

---

40. °मनसः । (A) 41. °दति° । (A) 1. स्वात्मभेदैक° । (A), (B), (C)



# ।। अथ विंशोऽध्यायः ।।

निविश्य च तत : शिष्या : पद्मपादादयस्तदा । अपठन् स्तुतिमेतां ते स्वात्मबोधैकबो[1]धिनीम् ।।१।।

निस्तमसि नीरजसि निर्गलितसत्त्वे । तेजसि विवेकजुषि भेदमतिशून्ये ।
निर्वचनमानसपदातिगमचिन्त्यम् । तत्त्वमसि तत्त्वमसि तत्त्वमसि राजन् ।।२।।

यज्जनितमेतदखिलं जगदनित्यम् । स्वप्नजगदभ्रज[1a]गवारिवनतुल्यम् ।
अप्रमितमा[1b]तिरहितं परसुखं यत् । तत्त्वमसि ---------- राजन् ।।३।।

देहगुणजालमतिलील[2]मतिलोलम् । येन लसितं भवति धीपुरशतं च ।
अद्वयमनन्तकमपारमतिसूक्ष्मम् । तत्त्वमसि ------------ राजन् ।।४।।

कोशमलपञ्चकमिदं च सविकारम् । यत्र वियदादिविमलस्फुरितमेतत् ।
अस्ति न[3] कदाचिदपि रज्जुवदनन्तम् । तत्त्वमसि ------- राजन् ।।५।।

भेदमतिजातमवधूतमनुभूतम् । येन विदितं [4]तत्पराःपरसुखं च ।
तद्भवति सोऽहमिति यच्छ्रुतिषु चोक्तम् । तत्त्वमसि -------- राजन् ।।६।।

ततस्तेषां स्तुतिं श्रुत्वा विहाय च सभोचितम्[4a] । कलविंकाकृति[5]र्भूत्वा तेज :पुञ्जदु[6]रीक्षण : ।।७।।
ब्रह्मरन्ध्रपथादेष निःससार तदा द्रुतम् । तद्विज्ञाय च शिष्यास्ते यथागतमगुस्तदा ।।८।।
शयानमिव तं भूपं मेनिरे सिंहविष्टरे । निद्राणमेव सततं मन्त्रिणो बान्धवास्तदा ।।९।।
ततः स गत्वा वेगेन तत्राऽवृष्ट्वा तनुं निजाम् । इतस्ततः परिचरंस्तनुं दृष्ट्वा चितोपरि ।।१०।।
ज्वालामालास[7]माक्रान्तां दह्यमानां क्षणादिव । शिरोगतपथादेष : प्रविवेश तदन्तरम् ।।११।।
तुष्टाव श्रीगुरु : साक्षाल्लक्ष्मीनारायणं तदा । स्तोत्रेणाऽनेन दिव्येन सर्वार्तिविनिवारिणा ।।१२।।

श्रीमत्पयोनिधिनिकेतन चक्रपाणे । भोगीन्द्रभोग[8]मणिराजितपुण्यमूर्ते ।
योगीश शाश्वत शरण्य भवाब्धिपोत । लक्ष्मीनृसिंह मम देहि करावलम्बम् ।।१३।।

संसारवृक्षमघ[9]बीजमनन्तकर्म– । शाखाशतं करुण[10]यत्रमनङ्गपुष्पम् ।
आरुह्य दुःखफलिनं पतितो[11] दयालो । लक्ष्मीनृसिंह ----- °लम्बम् ।।१४।।

संसारकूपमतिघोरमगाधमूलम् । सम्प्राप्य दुःखशतसर्पसमाकुलस्य ।
दून[12]स्य देव कृपणं पर[13]मागतस्य । लक्ष्मीनृसिंह -------°लम्बम् ।।१५।।

संसारभीकरकरीन्द्रकराभि[13a]घात– । निष्पीड्यमानवपुषः सकलार्तिनाश ।
प्राणप्रयाणभवभीतिसमाकुलस्य । लक्ष्मीनृसिंह ------- °लम्बम् ।।१६।।

संसारसर्पविषदष्टभयो[13b]ग्रतीव्र– । दंष्ट्राकरालपरिदग्धविनष्टमूर्ते : ।
नागारिवाहन[14]सुधाब्धिनिवासशौरे: । लक्ष्मीनृसिंह --------°लम्बम् ।।१७।।

संसारसागरविशालकरालकाम– । नक्रग्रहग्रसननि[15]ग्रहविग्रहस्य ।
व्यग्रस्य राग[16]रसनोन्मणि पीडितस्य । लक्ष्मीनृसिंह ------- °लम्बम् ।।१८।।

---

1a. °भ्रगज° । (B), (C) 1b. °मूर्ति° । (B), (C) 2. °नील° । (A) 3. च । (A) 4. तत् परा° । (A), (B) 4a. मभातलम् । (B), (C) 5. °कृति भूत्वा । (A) 6. °धुरी° । (A) 7. °परि-क्रान्तां । (A) 8. °भोगि° । (A) 9. °मधु° । (A) 10. °करणपत्र° । (A); °पात्र° । (B), (C) 11. पततो । (A), (B), (C) 12. दानस्य । (A), दीनस्य । (B), (C) 13. पद° । (A), (B), (C) 13a. °राति° । (B), (C) 13b. °दष्टतयो° । (B), (C) 14. °वाहर° । (A) 15. °विग्रह° । (B) 16. गाररशनो° । (A)

संसारदावदहनाकुलभीकरोरु –। ज्वालावलीभिरभितप्ततनूरुहस्य।
त्वत्पादपद्मसरसीरुहमाश्रितस्य। लक्ष्मीनृसिंह ----------°लम्बम् ॥१९॥
ब्रह्मेन्द्ररुद्रमरुदर्ककिरीटकोटि–। संघट्टिताङ्घ्रिकमलामलकान्ति कान्त।
लक्ष्मीलसत्कुचसरोरुहराजहंस। लक्ष्मीनृसिंह ----------°लम्बम् ॥२०॥

ततस्तुष्टो नृसिंहोऽपि प्रादुर्भूय तदग्रतः। वामाङ्गुष्ठाञ्चितार्वाह्नि शमयामास तत्क्षणम् ॥ २१ ॥
समालम्ब्य कराग्रेण शङ्कराचार्यविग्रहम्। पस्पर्श परितः सम्यग्ववर्ष करुणासुधाम् ॥ २२ ॥
हुतभुग्ज्वालयाऽऽलीढं विज्वरीकृत्य तद्वपुः। स्वकराम्भोजसंस्पर्शात्स व्यधाद्द्विगुणोज्ज्वलम् ॥ २३ ॥
चकार करुणाम्भोधिस्तस्य सम्यङ्नृकेसरी। साष्टाङ्गं प्रणिपत्याऽथ शङ्कराचार्यदेशिकः ॥ २४ ॥
लक्ष्मीनृसिंहकृपया पुनरुज्जीवितोऽस्म्यहम्। इत्यादि बहुशः स्तुत्वा प्रसाद्य च पुनः पुनः ॥ २५ ॥
तत्रैवान्तरधात्सोऽपि लक्ष्मीनरहरिस्ततः। तैः शिष्यैरन्वितस्तस्मा लब्धा[17]ज्ञां नृहरेः शुभैः ॥ २६ ॥
यत्राऽस्ते सा गिरां देवी व्योमसीमसमाश्रिता। तं प्रदेशं समेत्याऽसौ स्तुत्वा तां बहुभिः स्तवैः ॥ २७ ॥
प्रसन्नवदनाम्भोजां विस्मयोत्कण्ठिताशयाम्। विधाय शङ्कराचार्यदेशिकाधीश्वरः स्वयम् ॥ २८ ॥
ऊचे सरसवाणीं तां यद्वक्ष्यसि तदुत्तरम्। इदानीमेव वक्ष्येऽहं विपश्चिद्व्रजसंमतम् ॥ २९ ॥
इत्युक्तवन्तमेनं सा ज्ञात्वैवासाविहागतः। नो चेदयं[18] कथं ब्रूयान्मदग्रेऽप्यतिदर्पितः ॥ ३० ॥
प्राग्वन्न विद्यते योगी भासते द्विगुणोज्ज्वलः। अभिधास्यत्ययं विद्वान् कामशास्त्रं[19] विनिश्चितम् ॥३१॥
इति विज्ञाय सर्वज्ञा तेजसाऽस्य गुरोर्मुखे। श्रीमन्यतिन् विजानासि शास्त्राणि विविधानि[20]ते ॥३२॥
जिताऽहं भवता नूनं वेद्मि त्वां गिरिजासखम्। सत्या भक्त्याऽथ युक्त्या[21]ते सूक्त्या चामृतसद्रुचा ॥३३॥
तुष्टाऽहमष्टमूर्ते त्वं मां गन्तुं सत्यविष्टपम्। अनुजानीहि योगीन्द्र सर्वत्र विजयी भव ॥ ३४ ॥
इत्थं दत्वा[22] वरानस्मै प्रश्रयावनतात्मने। पुनर्जिगमिषुं वाणीं प्रसाद्य बहुसान्त्वनैः ॥ ३५ ॥
प्रार्थयामास भूयोऽपि श्रीमान् शङ्करदेशिकः। यदि प्रसन्ना भवसि सहाऽगच्छ पुरो मया ॥ ३६ ॥
वरानन्यान्न मन्येऽहं विरक्तस्य वरैरलम्। इत्युदीर्यार्यवर्योऽसौ गिरां देवीं परात्पराम् ॥ ३७ ॥
ययाचे बहुशो भक्त्या स्तुत्वा श्रुत्युक्तवर्त्मना।
वाङ्मयं यत्त्वया[23] व्याप्तम् त्रैलोक्यमिव विष्णुना ॥ ३८ ॥
त्वत्तत्त्वं यदि चेद्गा[24]तं ब्रह्म तस्य करे स्थितम्। त्वां विना गदितुं वाऽपि कः शक्नोति धरातले ॥३९॥
न विदन्त्यम्बुजाक्षाद्या मह[25]तां ते परात्पराम्। मनुजा वेत्तुमर्हन्ति कथं कलिमलीमसाः ॥ ४० ॥
अतः प्रसीद देवि त्वं समागच्छ[26] मया सह। इति सम्प्रार्थिता वाणी देशिकेन्द्रेण सूरिणा ॥४१॥
अनुमेने तदा गन्तुं सहैव करुणानिधिः। ततः श्रीशङ्कराचार्यः श्रुत्वा वाण्या [26a]समीरितम् ॥४२॥
मुमुदे वदतांवर्यः स्वमनोरथपूरणात्। ततस्तां गुरुवर्योऽपि गगनाङ्गणवर्त्मना ॥ ४३ ॥
आनीय सहितः[27] शिष्यैः पद्मपादादिभिस्ततः। अन्विष्यभुत्तमं देशं निरीतिकृतबाधनम् ॥ ४४ ॥
सर्वदा सस्यसंपूर्णं सर्वलक्षणलक्षितम्। निर्वैरप्राणिसंकीर्णं रम्यस्रोतस्विनीवृतम् ॥ ४५ ॥
तपोधनाश्रमैर्दिव्यैः परितैः[27a] समलङ्कृतम्। प्रत्यङ्घ्रिजलकुल्याभिर्मालाभिरिव शोभितम् ॥४६॥
अपरिज्ञातदुर्भिक्ष्यं वाणीसंस्थापनोचितम्। क्रमेणेतस्ततः[28] पश्यन् श्रीमच्छङ्करदेशिकः ॥ ४७ ॥

17. तस्माल्लब्ध्वा°। (A), (B) 18. °दहं। (A) 19. °शास्त्रविनि°। (A), (B), (C)
20 विविधान्यपि। (A), (B), (C) 21. युक्त्याथ। (A) 22. तत्त्ववरा°। (A) 23. यत्तया। (A)
24. चेज्ज्ञातं। (A), (B), (C) 25. महितां। (A); महत्ताम्। (B), (C) 26. °गत्य। (A)
26a. वाणीसमी°। (B), (C) 27. सहितैः। (A) 27a. परितः। (B), (C) 28. क्रमेण तत्ततः। (A)



पद्मपादामरेशार्यहस्तामलकतोटकैः। तथा [29]वाण्या सहैवाऽन्यैर्जयशब्दविजृम्भितैः ॥ ४८ ॥
सम्प्राप गुरुवर्योऽसौ विभाण्डकतपोवनम् ॥ ४९ ॥

## विज्ञानकन्दः

जित्वा तामधिदेवतामपि गिरां कृत्वा स्वनिघ्नामसौ।
श्रीमान् शङ्करदेशिकः सह तया प्रापद्विभाण्डाश्रमम्।
इत्याख्यायि ततः परं च भवता यद्यद्विधाय्य[30]द्भुतम्।
तत्सर्वं मम कथ्यतां गुरुवरेणाऽत्युन्नतश्रेयसा ॥ ५० ॥

## श्रीचिद्विलासः

लब्ध्वा विभाण्डकतपोवनसंनिवेशम्। यद्यद्व्यधायि गुरुणा परमाद्भुतेन।
विज्ञानकन्द तदपि शृणु तेऽद्य वक्ष्ये। श्रीदेशिकेन्द्रचरितं कलुषप्रजघ्नम् ॥५१॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीचिद्विलासयतीन्द्रविज्ञानकन्दतपोधनेन्द्रसंवादे शङ्करविजय-विलासे विंशोऽध्यायः ॥

29. तया। (B), (C) 30. धाद्य°। (A)

# ॥ अथैकविंशोऽध्यायः ॥

श्रीमान् विभाण्डकतपोवनमेत्य पश्चात्। तुङ्गातरङ्गपरिरञ्जितपार्श्वभागम्।
श्रीशङ्कराचा[1]र्यगुरुराट् प्रविलोक्य हृष्टः। वाणीनिवेशनकृतोद्यममानसोऽभूत् ॥ १ ॥
यत्राऽस्ति भक्तमलहानिकरो महेशः। साक्षाद्विहाय रजताचलमात्मसद्म।
नाम्नाऽपि विद्धि मलहानिकरः प्रतीतः। प्रोद्यद्विभाण्डकतपोधनपूज्यमानः ॥ २ ॥
यत्रोटजानि परितः[1a] सरितो विभान्ति। भव्यानि कश्यपवसिष्ठपराशराणाम् ॥
किं चाद्भुतक्रमपराक्रमपण्डितस्य। श्रीभार्गवस्य महसो तनु[2]कौशिकस्य ॥ ३ ॥
यत्राऽस्ति चादिमवराहमहोग्रदंष्ट्र-। कोटघु[2a]द्गतेर्निखिलदैवतलालनीया।
तत्पादसङ्गमहसा ध्रियते हि गङ्गा। किं वर्ण्यते[2b] नु महिमा मुखनिःसृतायाः ॥ ४ ॥
श्रीमान्नृकेसर[2c]गिरिः स चकास्त्यदूरे।ऽ प्यद्यापि वैरमपहाय परस्परेण।
व्याघ्री मृगानवति पन्नगमेव बर्ही। बभ्रुश्च रक्षति विभूषणमत्र शम्भोः ॥ ५ ॥
शाखामृगाश्च निजचापलमुत्सृजन्तः। हस्तान् करैः समवलम्ब्य तपोधनानाम्।
पङ्ग्वन्धकुब्जकुणिकेक[3]रलोचनानाम्। कुर्वन्ति यत्र गमनागमने सहायम् ॥ ६ ॥
घर्मोग्रभानुकरघातनितान्तखि[4]न्न–। सन्नागप[4a]न्नगवधूमवलोक्य केकी।
पक्षौ प्रसार्य च तदाऽऽतपवारणाय। रक्षत्यहो ननु विचित्रमतः परं किम् ॥ ७ ॥
यत्रैव भूसुरवरैर्विततं वितन्द्रैः। प्रक्रम्यमाणमखहव्यपरिग्रहाय।
इन्द्रादयोऽपि[5] निरतं गमनागमाभ्याम्। उद्विज्य तत्र निवसन्ति कुटुम्बिनस्ते ॥ ८ ॥
अम्भोनिधानचुलकीकरणप्रवीणः। विन्ध्यक्षमाधरशिरोनमनप्रगल्भः।
सन्त्यज्य सोत्तरदिशं वसतिं स्वकीयाम्। कुम्भोद्भवोऽपि निजमाश्रममत्र तेने ॥ ९ ॥
यत्राऽनिशं महिसुरैः प्रवितन्यमानैः। सत्रैः सहस्रनयनोऽप्यतिहृष्टचेताः।
वर्षत्यजस्रमनुसस्यमुदस्य मेघान्। तत्तत्फलोदयकृतावधिनाधिकोनम् ॥ १० ॥
यत्रोद्भवन्ति तरवो ननु गन्धसाराः। सर्वत्र सौरभसमञ्चितदिग्विभागाः।
ए[6]षां जनुः सुजनतापविनोदनाय। व्यालेपनाय कुचयोर्वरवर्णिनीनाम् ॥ ११ ॥
श्रोणीरुहा विशदवल्कलिनो जटाभिः। उद्भास्यमानशिरसः कृतनीरभक्षाः।
शीतातपक्लमसहाः प्रप[7]तन्ति यत्र। वाचंयमा इव [7a]पुनः स्थिरतामुपेत्य ॥ १२ ॥
ताम्बूल वल्लीपरिणद्धपूग–। द्रुमान्तरेलालतिकातिरम्यम्।
देव[8]प्रसूनद्रुमजापकाढ्यम्। वनं विभाण्डस्य मुनेश्चकाशे ॥१३॥
गव्यूतिमात्र[9]परिशोभितऋष्यशृङ्ग–। दिव्याश्रमं स्मरणतः कलिकल्मषघ्नम्।
आश्चर्यदं दिविषदामपि दृष्टमात्रा[10]। स्तोतुं तदाश्रमपदं क्षमते क्षितौ कः ॥१४॥

1. श्रीशङ्कराग्र्य°। (B), (C) 1a. मरितः परितो। (A), (B), (C) 2. ननु कौशिकस्य। (A), (B), (C) 2a. कोटयुद्धृते°। (B), (C) 2b. वर्ण्यतां। (B), (C) 2c. °केसरि°। (B), (C) 3. °केवल°। (A) 4. °भिन्न°। (A) 4a. °पुङ्गव°। (B), (C) 5. °ध्यनिसरं। (A) °पि मितरां। (B), (C) 6. येषां। (A) 7. प्रतपंति। (B) 7a. पुनरिव। (A) 8. देवः प्रसून°। (A) 9. °मन्त्र°। (A) 10 °मात्रात्। (A), (B), (C)



स्वाम्भःकृताप्लवजनव्रजपातकौघ –। संक्षालनादधिगताधिकपापजाताः।
स्नात्वैव यत्र सरितः प्रविनिर्मलाङ्[11]ग्य:। नित्यं व्रजन्ति च निजानि निवेशनानि ॥१५॥
एलालतालिङ्गितगन्धसारैः। ताम्बूलवल्लीपरिणद्धपूगैः।
द्राक्षालताश्लिष्टसारे[12]लसालैः। अशोभतैतद्वनमस्य दृष्टेः ॥१६॥
श्रीतुङ्गभद्रातटिनीतरङ्ग–। समुच्चलच्छीकरसंघसङ्गी।
ईषत्स्फु[13]टच्चम्पकगन्धबन्धु –। मरुद्वितेने[14]ऽस्य गुरोः प्रमोदम् ॥१७॥
यद्वीचिकाराजिविराजिहंसी[15]–। नादातिनान्दीकरसंनिवेशम्।
लवङ्गमालावृति[16] सर्वतोऽपि। तदा[17]श्रमं मान्यममानि तेन ॥१८॥
श्रीतुङ्गभद्रा ननु तुङ्गभद्र–। संदायिनी स्नानवतो जनस्य।
यद्वीचिकाशीकरजालमाली–। मरुत्सरेत्सो ऽप्यलमिष्टदाने ॥१९॥
स्नाने फलं किं न्विति कथ्यतां ते। न वक्तुमीष्टे फ[18]णिभृद्वरोऽपि।
आम्नायमुद्धृत्य रिपुघ्नतोऽस्य। कन्या पुरा सादिवराहमूर्तेः ॥२०॥
यस्यास्तरङ्गपरिशीलितमानसोऽसौ। कुम्भोद्भवोऽपि स निजां दिशमुत्ससर्ज।
शर्वोऽपि शीतधरणीधरजा विवाहम्। प्रादर्शयत्पुनरहो मुनयेऽप्यमुष्मै ॥२१॥
विभाण्डकमुनेः सुतो वसति ऋष्यशृङ्गो मुनिः। प्रवर्षति घनो घनं न किल तत्र दुर्भिक्षता।
तदाश्रमसमन्ततो द्विदशयोजनान्यद्भुतम्। स एव तटिनीतटे चिरमुवास[19] दत्ताशयः ॥२२॥
अङ्गसङ्गतविपद्भयभङ्गे। तुङ्गमङ्गलनिर्गलसङ्गे।
ऋष्यशृङ्गमुनिरेव गरीयान्। धन्यमौनिजनमान्यगुणौघः ॥२३॥
तुङ्गातनुर्मधुभिदो ननु यत्र भद्रा। साक्षात्पुरारितनुरेव तयोस्तु योगः।
तस्मादुभे हरिहराविति निश्चितार्थौ[20]। लोकोपकारकृतये कलितावतारौ ॥२४॥
संभिद्य[21] यत्र सरितो ननु भूरिशो ऽपि। संक्षाल्य पङ्कमखिलं निजनीरलग्नम्।
रत्नाकरं प्रतिदिनं प्रविशन्ति कान्तम्[22]।
कल्हारतल्लजसमुज्ज्वलसौरभाढ्याः[23] ॥२५॥
तीरप्ररूढवरचम्पकपुष्परेणु –। वेद्यन्तरार्चितविष्टरसिद्धवृन्दैः।
उद्गीयमानमहसं[24] भुवि तुङ्गभद्राम्। का वा सरित्स्वविरहितामपि या ऽतिशेते ॥२६॥
अन्तर्निषिक्त[25]वरमौक्तिकपर्वरेणु –। निर्मापितो ऽपि वृतिसन्ततकान्तिकान्तम्।
दृष्ट्वा विभाण्डकतपोवनसंनिवेशम्। श्रीशङ्करार्यगुरूराण्मुदमाततान ॥२७॥
स्वाहा स्वधा वौषडिति क्रमेण। निरन्तराकर्णनयैक[26]कीराः।
पठन्ति गायन्ति पिकाङ्गनाश्च। सामानि सीमातिग[27]चित्रमत्र ॥२८॥
सर्वाणि पुण्यान्यनुभूय नाके। भुवंगतैः प्रार्थनया विधात्रा।
भोक्तुं च किञ्चित्सुकृतावशेषैः। स्वरेव[28] खण्डं ननु निर्मितं तत् ॥२९॥

11. °लागो। (A) 12. °रसाल°। (A), (C) 13 °त्वट°। (A) 14. °द्वितानस्य। (A) 15. °हंस°। (A) 16. °कृति°। (A) 17. तदाश्रयं। (B) 18. फण°। (A) 19. चिरमुपास दत्ताश्रमः। (A) 20. °तार्थे। (A) 21. संत्यज्य। (B), (C) 22. शान्तां। (A), (C) 23. °भक्त्या। (A); °भाद्या:। (B), (C) 24. महसीं। (A) 25. °निषक्त°। (A) 26. °यैव कीराः। (A), (B), (C) 27. सीमातमिहात्र चित्रम्। (A); सीमातिगमत्र चित्रम्। (B), (C) 28. °देशखण्डं। (A)

यद्वासिनश्चामृतभोजिनस्ते । महेश्वरा : श्रीपतयो धनाढ्याः ।
जैवातृका वाक्पतयो महेन्द्राः । विभान्ति सर्वत्र महीसुरेन्द्राः ॥३०॥
भद्रश्रियां जनन[29]सद्मसिताभ्रसीमा– । कस्तूरिकामरिच[30]वल्लरिजन्मभूमिः ।
विद्याविचारवसतिर्वरधर्मशाला । रेजे विभाण्डकतपोवनमस्य दृष्टेः ॥३१॥
यज्ञोपयुक्तास्तरवो ऽपि यत्र । पलाशयज्ञाङ्गकपिप्पलाद्याः ।
कुशाश्च काशाश्च तृणानि भूयो । तपोवने चैत्ररथादनूने ॥३२॥
स्व[31]र्वत्सुधर्मावसतिः सुधेव । बुधौघमान्या द्युरिवार्करम्या ।
रेजे सरस्वानिव रत्नपूर्णः तदाश्रमो विश्रममस्य तेने ॥३३॥
वाणी स्वयं कल्पिततुङ्गभद्रा । सरिच्च सा सङ्गततुङ्गभद्रा ।
तदाश्रमः सम्भृततुङ्गभद्रः । पुण्यां धरण्यां सुकृतां समाजः ॥३४॥
तुङ्गेति भद्रेति च तुङ्गभद्रे– । त्येवं त्रिधा नाम किटीन्द्रजायाः ।
अन्यानि नामानि च सन्ति भूयः । भवो विजानाति महत्त्वमस्याः ॥३५॥
अभ्रदन्तिकरकृष्टसल्लकी– । पल्लवोल्लसितगन्धबन्धया ।
पुष्पदन्तमदतुन्दिला[32]पया । का तुलां वहति तुङ्गभद्रया ॥३६॥
श्रीतुङ्गभद्रा क्षितिसङ्गताऽपि । दिवः स्रवन्ती[33] महता[34]ऽतिशेते ।
तेजो हि लोके ननु माननीयम् । उच्चैरधस्ताद्वसतिर्न गुर्वी ॥३७॥
कवेरकन्या ननु मान्यते सा । कुल्या ददा[35]तीति कृषीवलौघैः [36] ।
श्रीतुङ्गभद्रा परिपाति कुल्यान् । निमज्जतां पाथसि सज्जनानाम् ॥३८॥
या कृष्णवेणी ननु कृष्णवेणी । यमस्वसा[37] सा मलिनीकृताम्भाः [37a] ।
नूनं सरस्वाल्लवणोदमाली । तुङ्गा सरित्क्षीरतरङ्गसङ्गा[37b] ॥३९॥
यस्यां निमज्ज्या ऽनिमिषा रमन्ते । यस्याश्च तीरे परमाश्च हंसाः ।
पद्मालया सा ऽब्जभवाङ्गनायाः । मनोविनोदं वितनान नूनम् ॥४०॥
वाणी क्षोणीतलो[38]द्यत्तरगुरुचरितं तत्र विद्याश्रमं द्राक् ।
दीव्यच्छ्रीतुङ्गभद्रासलिलकणसमासेकशीतोपकण्ठम् ।
हर्षोत्कर्षं प्रपेदे रतिमपि वसतौ सत्यलोके ऽत्यजत्सा ।
दृष्ट्वा तादृक्प्रमोदप्रणयिजनपदं कस्य चेतो न हृष्येत् ॥४१॥
आस्वाद्योद्यद्रसालप्रसवमधु[38a]करीं कोकिले तत्र गाय– ।
–त्युच्चैराकृष्टचेता : समजनि च सुधामाधुरी साधु[39]रीति ।
नास्मार्षीत्प्राक्तनानां प्रविशदमहसामात्मसंवेशनानाम् ।
क्षिप्रं श्रीतुङ्गभद्रा स्फुटतटवसतिं चेतसा काङ्क्षति स्म ॥४२॥
मन्दारद्रुमवाटिकान्तरचलन्माध्वीककल्लोलिनी– ।
निर्मज्जद्व्यतिषज्ज[40] उन्मदचलत्पुष्पंधयान्धीकृतम् ।

29. जनिम° । (A) 30. °रिचि° । (A) 31. सर्व° । (A) 32. °लोप° । (A) 33. स्रवन्तं । (A) 34. महसा । (A), (B), (C) 35. दधा° । (A) 36. °लोच्चैः । (A) 37. यमस्य नाना° । (A) 37a. °ताम्बा । (A) 37b. °माली । (B); (C) 38. °ततो।° । (A) 38a. °मधुकरीं । (B); (C) 39. सा धुनीति । (A) 40. °ज्जदुन्म* । (A), (C)



आश्चर्याढ्यविभाण्डकाश्रममदृष्टवा[41]र्कातपोद्यत्क्लमम्[42] ।
श्रीमच्छङ्करदेशिकेश्वरमणेर्मोदं व्यधत्ता ऽधिकम् ॥४३॥
दीव्य[43]च्छ्रीतुङ्गभद्रास्फुटतटघटनाघातनिर्घोषनाद – ।
–भ्राम्य[44]न्नृत्यन्मयूरीपरभृतमहिलागानकाम्योपकण्ठे ।
पश्यंस्तीर्थत्रिकं द्रागनधिकृतकृति[45]प्राप्तमुत्तत्र चित्रम् ।
श्रीलश्रीदेशिकेन्द्रो ऽ[46] प्यतनुत स मतिं सत्य इत्येव लोक : ॥४४॥
कैलासात्समुपागतस्य निखिलाश्चर्यैकजन्मस्थलात् ।
क्षेत्राण्यप्यटतो[47] महान्ति चरतो दिव्यानि तीर्थान्यपि ।
मेरुं दृष्टवतो ऽस्य भूरिसरितो[48] वाराणसीं पश्यत : ।
चेतो मोदमुवाह देशिकमणेर्दृष्ट्वा विभाण्डाश्रमम् ॥४५॥
पान्थ[49]क्रीडानुरज्जत्सुरवरगृहिणीतुङ्गवक्षोजकुम्भ– ।
–व्यासज्जन्यङ्कुनाभ्यु[49a]ज्ज्वलदगरुसिताभ्रान्तिजम्बालिताम्भाः ।
तीरप्रान्तोपरूढोन्नतशिखरमहा[50]तेजनस्फुटयमान – ।
स्फूर्जन्मु[50a]क्तौघताराशबलितसिकता तुङ्गभद्रा चकाशे ॥४६॥
यत्रैकत्र घनो ऽपि वर्षति घनं भास्वांस्तपत्यन्यतः ।
हेमन्त : शिशिरो वसन्तसमय : कुत्रा ऽपि तत्रा ऽस्त्यहो ।
वायुर्वाति च मन्दमन्दमसकृच्छ्रीगन्धसारोज्ज्वलो – ।
–प्याकर्षन्मृगनाभिसौरभभरव्यासक्तमाध्वीलिहान् ॥४७॥
पारीन्द्रा :[50b] कलभानवन्ति खगराट् पात्यत्र सर्पाङ्गनाम् ।
व्याघ्री रक्षति कृष्णसारपृथुकान् स्तन्यं वितीर्या ऽसकृत् ।
शालूरी च सरीसृपोद्भटफणाशृङ्गे ऽपि शेते भृशम् ।
किं कार्यं बहुनोदितेन विधिना सत्त्वेन सृष्टं वनम् ॥४८॥
आगत्येह चमर्य एव विशदानुच्चाल्य सद्वालधीन् ।
सा[51]र्थान् यस्य तपोवनस्य जनयन्त्यद्धैव[52] राजाभिधाम् ।
अन्तः कञ्चुकिभिर्बहिर्मदगजैर्वेत्रैः समन्ताद्वृतम् ।
भूभृत्सद्मवदेव तद्वनमपि प्रायो ऽस्य मोदं ददौ ॥४९॥
तत्रत्यानि तपोवनानि चरत : पश्यन् मुहुर्हृष्यत : ।
भूयो विस्मयनिश्चलस्य च गुरो : श्रीतुङ्गभद्रामपि ।
अह्नो मध्यमगाद्दिनो ऽथ (नय[53])नेमाराद्धमुद्यन्मना : ।
स्नातुं देशिकपुङ्गवो ऽपि स ययौ तामेव कल्लोलिनीम् ॥५०॥

41. °दृष्टाशान्° । (A) 42. °त्कुडुं । (A) last letter is not clear 43. दिव्यश्री° । (A) 44. भ्राम्य°.....कण्ठं । (A), (B), (C) 45. °श्रुति° । (A) 46. °न्द्रो व्यत° । (A), (B), (C) 47. °प्यदृतो । (A) 48. °सरितं । (A) 49. पाथः°-----रज्य । (A), (B), (C) 49a. °नात्यु° । (B); °नाद्यु° । (C) 50. महोत्तेजनस्तुय्यं° । (A) 50a. °कुन्तौघ° । (B) 50b. हर्यक्षाः । (B), (C) 51. सोर्थां । ( ), सार्थां । (B) 52. °न्त्यद्यैव । ( ) °न्त्यब्धैव । (B) 53. सुमनो राद्धं समुद्युन्मनाः । (A); नयनेनाराद्धमुद्यन्मनाः । (B); द्दिनो धनये° । (C)

घर्मांशुस्तीव्रतापं स्वयमपि रचितं सोढुमेवा ऽ सहिष्णुः ।
स्नातुं श्रीतुङ्गभद्रासरित इव पयस्यात्मबिम्बं न्यधत्त ।
दूर्वासः कश्यपात्रिप्र[54]तिकुशिकसुतव्यासकुत्सा[54]दिमुख्याः ।
कर्तुं मध्याह्नकृत्यं सविधमुपगतास्तापसेन्द्रास्तदास्याः ।।५१।।
छाया[54a] छायामपीच्छत्यहह दिनकरे मध्यमह्नोधिरूढे ।
नीरं क्षीरं पिपासत्यपि पतगगणा नीडमेवा ऽ श्रयन्ति ।
लिम्पन्त्यङ्गे[55] सिताभ्रं मलयजमसकृद्योषितो भोगिनो वा ।
सोढुं तापानशक्ताः सविधमुपगता दिग्गजा मज्जनाय ।।५२।।
तत्काले सरितस्तटे स गुरुराट् स्नानार्थमभ्युद्यतः ।
सालूरीमतिगर्भभारविषहां सद्यः प्रसूत्युन्मुखीम् ।
तीव्रोदग्रदिवाकरातपपरिक्लान्तां भुजङ्गीं फणाम् ।
आस्तीर्यातपवारणाय परितः पान्तीं दृशा ऽ लोकत ।।५३।।
वाग्देवी[56] वसतः समञ्चितमदं क्षेत्रं सदृक्षं क्षितौ ।
नौ सन्तीति कृता[57] विपद्विततयो निर्मत्सराः प्राणिनः ।
देव्याश्चित्तमिहैव दत्तकुतुकं श्रीतुङ्गभद्रोज्ज्वला ।
पूर्णो मे ऽ द्य मनोरथः समजनीत्येवं व्यजानाद्गुरुः ।।५४।।

## विज्ञानकन्दः

गत्वा मुन्याश्रमान्तस्तदनु च परितो वीक्ष्य भूयो विलक्षः ।
वाणीसंस्थापनार्थं स[58] च मतिमतनोदित्थमेवा ऽ त्य विद्वान् ।
आश्राव्या ऽ तीवतुष्टः समभवदथ तत्प्रान्तरोद्भासमाना– ।
–न्याचक्ष्वाद्याश्रमाण्यप्यतिकुतुकवते मह्यमत्यद्भुतानि ।।५५।।

## श्रीचिद्विलासः

श्रीमन् विज्ञानकन्द श्रृणु तदपि मया कथ्यमानं समस्तम् ।
श्रीमद्वैभाण्डदिव्याश्रमनिकटगतान्याश्रमाण्यप्यशेषम् ।
वक्ष्ये ऽ हं तन्महत्त्वं विगतकलिमलं श्रृण्वतां पश्यतां वा ।
सिद्धैर्विद्याधरेन्द्रैः सुरमुनिनिचयैः स्तूयमानं समस्तैः ।।५६।।

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीचिद्विलासयतीन्द्रविज्ञानकन्दतपोधनेन्द्रसंवादे शङ्करविजयविलासेविभाण्डकतपोवनवर्णनं नामैकविंशो ऽ ध्यायः ।।

54. प्रति°- - - - - - कुल्या।द्रि°। (A); पात्रीर्वृति°। (C) 54a. चारू चारू°। (B) 55. °त्यग्रे। (A) 56. वाग्देवीवसतेः। (A), (B), (C) 57. कृतादिपद्वित°। (A); कृता° (C) 58.. निज-मति°। (A)



# ॥ अथ द्वाविंशोऽध्यायः ॥

वैभाण्डकाश्रममहोज्ज्वलपार्श्वभागे। दिव्याश्रमो ननु विभाति स कौशिकस्य ।
यो वा विगृह्यत[1] नयेन पितामहस्य। हर्तुं ततः सुरगवीमपि काङ्क्षति स्म ।।१।।
क्षात्रं[1a] समस्तमपि चा ऽ [2]त्रमुपादिदेश। रामाय भूमितनयां घट[3]यांचकार ।
यश्चोर्वशीमपि शशाप शिलीभवेति । सर्वाद्भुतैकवसतिर्वसति स्म यत्र ।।२।।
तुङ्गैस्तमालतरुभिर्नवमातुलङ्गैः। सौगन्ध्यबन्धुरजलैश्च रसालसालैः।
सार्वर्तुकप्रसरकेसरको[4]विदारैः। उद्भासि कौशिकतपोवनमस्त्यदूरे ।।३।।
कृत्वा तपः[5] सुचिरमत्र तपोवनान्ते। जप्त्वा च वे[6]दजननीमतिभक्तियुक्तः।
ब्राह्मं बभार मुनिरेष महो[7] महीयः। भीतात्सरोरुहरु[8]हात्तपसा निजेन ।।४।।
तुङ्गा सरित्सरति यत्र मरुत्वदाशाम्। फुल्लारविन्दकु[8a]सुमोज्ज्वलगन्धबन्धुः।
स्नात्वैव यत्र सकृदेव दिवं प्रयान्ति । दिव्य[9]द्विमानमधिरुह्य निरस्तपापाः ।।५।।
तत्सीमभागपरिशोभितदेवरात–। राजर्षिराजतपसां वनमत्र भाति ।
यत्राऽपि मज्जनमघौघनिकृन्तनाय। सद्यो मनोरथशतैकसमर्पणाय ।।६।।
किञ्चित्ततो ऽ पि पुरतः परमेष्ठिसूनोः। दिव्याश्रमो निरुरुचे महनीयशीलः।
तुङ्गा सरिद्वहति यत्र च पश्चिमाशाम्। तस्यो[10]न्नतिं कथयितुं विधिरेव वेद ।।७।।
साध्वी समस्तमहिलाजनमौलिमाला। संलालनीयचरणारुणवारिजाया ।
साऽरुन्धती पतिपदाम्बुजसेवनोक्ता । यत्राऽवसच्चिरमुदारमहो विशेषा ।।८।।
यः स्नाति तत्र सलिले कलिकल्मषघ्ने। दंष्ट्राग्रकोटिजनुषोऽत्र सरिद्वरायाः।
शुध्यत्यनल्पकलुषोऽपि सकृज्जनो[11]ऽघो । भानाविहाश्रयति कर्कटकं किमन्यत् ।।९।।
यः स्नाति वा मकरमासि सभानुवारे। ऋक्षे महेशितुरुषस्यरुणोदये वा ।
पापानि सप्तजनुराकलितानि हित्वा। नाकं प्रयाति सुरभूयमथाऽश्नुतेऽसौ ।।१०।।
एतद्विलोकयितुमुन्मनसा कदाचित्। दूर्वाससा सुलभकोपवताऽप्यगामि ।
कोट्यर्बुदैर्यतिवरैर्निजमाययोत्थैः। वीतोऽथ दण्डकरकाकलितात्महस्तैः ।।११।।
दृष्ट्वा तदा मुनिवरं महनीयशीलम्। सूनुर्विधेरपि विलोक्य परं प्रहृष्टः।
साऽरुन्धती सविनयं प्रविण[12]म्य पद्भ्याम्।
आचष्ट विष्टरनिविष्टवतो यतीन्द्रान् ।।१२।।
युष्मत्पदाम्बुजरजोविसर[12a]प्रसारात्–। पूतं मदाश्रमपदं परितोऽद्य जातम्।
किं वाऽऽगमस्य भवतामिह[13] तं निदानम्।
ब्रूता[14]ऽद्य किं नु करवाणि किमीप्सितं वः ।।१३।।

1. विगृह्य तनयेन। 1a. शास्त्रं। (B), (C) 2. छात्र°। (A); क्षात्रं। (B) 3. फणया°। (A) 4. °रको विदूरैः। (A) 5. तु वस्तु चिर°। (A); शुचिरमुत्र। (B) 6. लेशज°। (A) 7. महामहीयः। (A) 8. °सहभवा°। (A) 8a. °कुमुदो°। (B) (C) 9. दिव्यं वि°। (A) 10. °न्मतिं। (A) 11. °जनौघो। (A) (C) 12. परिणम्य। (A), (B), (C) 12a. °विरजत्°। (B) विसरत्प्र°। (C) 13. भवतां महितं। (A) 14. ब्रूह्यद्य। (A)

भिक्षां प्रदेहि न विलम्बनमत्र कार्यम्। भुक्त्वाऽद्य विंशतिरभूदिह भोजनार्थम्।
प्राप्तानिमान्यतिवरानवगच्छ साध्वि। नो चेदितोऽपि यदि किंकरणीयमेभिः ॥१४॥
इत्यूचिवांस[15]मवगत्य पतिव्रता सा। दूर्वाससं यतिवरानपि मायिकांस्तान्।
तद्भोजनोचितनिवेशनमन्यदेव। निर्माप्य तत्क्षणत एव स-भोज्यजातम् ॥१५॥
भोक्तुं समानयत तानखिलांश्च साध्वी। साऽरुन्धती तदनु वेदविधातृसूनुः।
कोट्यर्बुदायुततनूः स्वयमप्यधत्त। प्रत्येकमाचकलदद्भुतमातिथेयम् ॥१६॥
कृत्वाऽर्घ्यपाद्यमधुपर्कमुखाद्यपूजाम्। सोऽरुन्धतीमतिथिसत्कृतये न्ययुङ्क्त।
साऽपीप्सितान्नघृतपायसभक्ष्यभोज्यैः। प्रातर्पयद्यतिवरानपि शर्कराद्यैः ॥१७॥
दूर्वाससा तदनु विस्मितमानसेन। दृष्ट्वा वसिष्ठगृहिणीषु[16] महाप्रभावम्।
स्तुत्वा वसिष्ठवनितामपि तुङ्गभद्राम्। नत्वा यथागतमगामि मुनीश्वरेण ॥१८॥
अन्तर्बभूवुरपरे यतिवेषिणस्ते। दूर्वाससैव[17] रचिता निजमायया ये।
तत्तादृशो भुवि वसिष्ठमहाश्रमोऽपि। तुङ्गासरित्परिसरे प्रतिभाति यत्र ॥१९॥
एतद्विलोक्य सकलं भुवि नारदोऽपि। वैकुण्ठमाप विनिवेदयितुं मुरारेः।
उच्चैर्गृणन् प्रतिपदं किटिराजजाया। का वा सरित्सदृगिति प्रविवेश वेश्म ॥२०॥
को वा वसिष्ठमहिमा मुनिपुङ्गवो वा। काऽरुन्धतीव महनीयमहोविभावा।
का वा सरित्स किटिजामपहाय तुङ्गा—। मित्यूचिवानथ विवेश हरेः स देशम्* ॥२१॥
दृष्ट्वा मुनिं तदनु विष्टरमस्य दत्वा। सम्पूज्य भूरिविभवैर्मधुपर्कमुख्यैः।
आपृच्छ्य तस्य कुशलं सरसीरुहाक्षः। तुङ्गामहत्त्वमशृणोदथ नारदेन ॥२२॥
सम्प्रेष्य[17a] नारदमथो सरसीरुहाक्षः। तुङ्गासरिद्वरनिरीक्षणदत्तचित्तः।
लेखैर्द्विजाकृतिधरैरभितः श्रियाग्रे। प्रापाऽश्रमस्य सविधं स विधातृसूनोः ॥२३॥
दृष्ट्वा वसिष्ठमुनिरागतमास्य[18]जातम्। गोविन्दमिन्दुमिव ऋक्षगणैः परीतम्।
दत्वा च[18a] पाद्यमधुपर्कमुखादिपूजाम्। सोऽरुन्धतीमतिथिसत्कृतये न्ययुङ्क्त ॥२४॥
सा दत्तभूरिरस[19]सङ्गततुङ्गभक्ष्य—। प्राज्याज्यभोज्यममितं वरमृष्ट[18b]मन्नम्।
भुक्त्वा प्रहृष्य पुरतः पुनराविसासीत्। लक्ष्म्या सहैव निखिलैरमरैर्मुरारिः ॥२५॥
दृष्ट्वा वसिष्ठवनिता श्रियमेव साक्षात्। नारायणं च पतिभक्तिपरायणा सा।
नुत्वा परीत्य शतशो वरदम्पती तौ। भूयो ननाम चरणारुणवारिजाभ्याम् ॥२६॥
स्तुत्वा वसिष्ठवनितामपि वारिजाक्षः। लक्ष्म्यै प्रदर्श्य च वसिष्ठवधूप्रभावम्।
तुङ्गातरङ्गसलिले विमले च सस्नौ। तत्राश्रमोटजतटे वसतिं वितेने ॥२७॥
आकर्ण्य तामपि कथामपि नारदेन। शम्भुर्गिरीन्द्रतनयासहितः[19a] प्रतस्थे।
धृत्वा जरत्तरवपुश्च तया जरत्या। द्रष्टुं तपोधनवनं च स[19b] तुङ्गभद्राम् ॥२८॥
दृष्ट्वा वसिष्ठमुनिरद्भुतदम्पती तौ। आतिथ्यमारचयदद्भुतमेव तत्र।
हित्वा समस्तममृतं किल पृच्छति स्म। वृद्धो मुमूर्षुरिव तं च मुनिं वसिष्ठम् ॥२९॥

15. °वान् सम°। (A) 16. °गृहिणीसुमहा°। (A), (B); गृहिणी सुमहत्प्र। (C) 17. दूर्वाससा विरचिता। (B), (C) *this half is not found in (B); (C) does not give the last quarter 17a. संप्रेक्ष्य। (B), (C) 18. °मस्य। (A) 18a. दत्वार्घ्यपाद्य°। (B) 18a. °भूरिसरसं गत° भक्ष्यं। (A) 19. °मिष्ट°। (B), (C) 19a. °सुतया सहितः। (B), (C) 19b. वृषतुङ्ग°। (B), (C)



साऽरुन्धती निजतपोबलवैभवेन। सस्मार चेतसि सुरेन्द्रमतन्द्र[19c]भावा।
भीतः सुधारससमञ्चितहेमकुम्भम्। हस्ते निधाय पुरतो भुवि संन्यधत्त ॥३०॥
आदाय तत्कलशमिन्द्रकराग्रात्[19d]। साऽरुन्धती च जरते प्रवितीर्य तुष्टा
शम्भुर्विलोक्य पतिभक्तिमहत्त्वमस्याः। प्रादर्शयद्गिरिभुवे[20]ऽद्भुतमन्थरायै ॥३१॥
स्तुत्वाऽब्जभूतनुभुवं परमादरेण। तुङ्गासरित्पयसि कल्पितनित्यकृत्यः।
पश्यंस्तदाश्रमपदं परितोऽपि हृष्यन्। दत्वा वरानथ बहून् प्रययौ महेशः ॥३२॥
वेधाः कदाचिदिममाश्रममेत्य पश्यन्। लब्ध्वाऽतिथेयमधिकं च वसिष्ठवध्वा।
तुङ्गातटिन्यमलवारिणि निर्ममज्ज। सन्तर्प्य दैवतगणान्नितरां मुमोद ॥३३॥
स्तुत्वा स्नुषां पतिपदाम्बुरुहाति भक्ताम्। वत्से त्वमेव ननु यौव[21]तमाननीया।
नाऽस्त्यत्र ते समगुणा महिला धरायाम्। इत्यूचिवानथ जगाम यथागतं सः ॥३४॥
तस्माद्वसिष्ठमुनिवर्यतपोवनं तत्। अत्यु[22]ज्ज्वलं धरणिमण्डलमण्डनाय।
तुङ्गासरित्परिसरे रचितं विधात्रा। ज्ञातुं तदीयमहिमानमिनोऽप्यशक्ताः ॥३५॥
किञ्चित्ततोऽपि पुरतो ननु तुङ्गभद्रा। मत्वोत्तरां[23] दिशमथेन्द्रककुन्मुखी सा।
आशां निधेशितुरथो तटिनी प्रयाति[24]। क्षेत्रं विभाण्डकमुनस्तु तदेव दिव्यम् ॥३६॥
देवत्रयी वसति[25] तत्र जगत्त्रयं च। वेदत्रयी च सवनत्रितयं क्रमेण।
शक्ति[26]त्रयं हुतभुजां त्रितयं च दिव्यम्। भूरादिकत्रितयमेव विभाति चित्रम् ॥३७॥
तप्त्वा तपांसि जमदग्निरिहव लेभे। राजन्यदर्पदलनैकगुणप्रवीणम्।
दीर्घायुषं च मुरशासनमेव सूनुम्। शूलोल्लसत्करतलेन महेश्वरेण ॥३८॥
तीर्थं त्रिशूलपदपूर्वकनामधेयम्। स्नानेन दानकरणेन च किञ्चिदत्र।
पापान्यपास्य बहुजन्मकृतानि सद्यः। [26a]नाकं प्रयाति दिविजैः सह मोदते च ॥३९॥
स्नात्वैव तत्र मलहानिकरं प्रपूज्य। दत्ते महीसुरवराय च मृष्टमन्नम्।
तस्य प्रभावमवगच्छ सुरेन्द्रलोके। भोगान्विभुज्य परतः शिवतां प्रयाति ॥४०॥
स्नात्वा जनोऽत्र सलिले मकरं गतेऽर्के। सिंहं भ[27]जत्यलिमुपागतवत्युदारे।
वैकुण्ठमेत्य मुरशासनतां प्रयाति। स्वेच्छानुसारमखिलानि सुखानि भुङ्क्ते ॥४१॥
किञ्चित्ततोऽपि पुरतो ननु शाबराख्यम्। तीर्थं विभाति ननु दिव्यमन[28]र्घशीलम्।
शम्भुर्व्यधत्त किल शाबरमत्र रूपम्। स्नानं च तत्र निखिलाघविघातदक्षम् ॥४२॥
माहेश्वरं तदनु तीर्थमतीव चित्रम्। तुङ्गासरित्परिसरे रुरुचे पवित्रम्।
यत्राऽप्लवन्नपि जनो महिते तरङ्गे। साक्षान्महेशपदवीमुपयाति चित्रम् ॥४३॥
इत्यादि दिव्यमुनिवर्यतपोधनोद्यत्—। वेला व्यराजत दृशोर्गुरुपुङ्गवस्य।
दिव्यो विभाण्डकतपोवनसंनिवेशः। साक्षाद्विधेरिव निकेतनमाचकाशे ॥४४॥
तत्राऽतनोति पितृतर्पण[28a]मर्णसि द्राक्। श्राद्धं यथाविधि विधाय विधूतचिन्तः।
संपूजयन् स मलहानिकरं महेशम्। तत्काल एव पितरोऽस्य दिवं प्रयान्ति ॥४५॥

19c. °तन्द्रितात्मा। (B), (C) 19d. °कराम्बुजाग्रात्। (B), (C) this Complates the true metriclly; 20. गिरिमिहे°। (A) 21. ये व्रतमा°। (A) 22. भात्यु°। (B), (C) 23. °त्ततो°। (A), (B) 23a. गत्वो°। (A), (B), (C) 24. धनेशी° ------प्रयाते। (A), (B), (C) 25. देवत्रयी तत्र। (B), (C) 26. भक्ति°। (A) 26a. लोकं। (B), (C) 27. गतेत्य°। (A) 28. °नर्घ्यं°। (A) 28a. °तर्पणमिष्टसिध्यै। (B), (C)

किञ्चित्प्रदत्तमिह तत्कनकाद्रितुल्यम् । स्नानस्य चेत्तु महिमा भुवि कथ्यतां कैः ।
श्रीमद्विभाण्डकतपोवनसंनिवेशे । सिद्धिः सकृत्प्रतपतामपि हस्तलग्ना ॥४६॥
संभोज्य मस्करिणमत्र सकृत्कदा वा । भक्त्या प्रपूज्य मलहानिकरं महेशम् ।
तुङ्गासरित्पयसि मज्जति दुर्जनो वा । सोऽप्यंहसां तति[29]महो विधुनोत्यशेषम् ॥४७॥
तस्माद्विचित्रतरमस्य विभाण्डकस्य । क्षेत्रं पवित्रमधिकं त्रिदिवादपीषत् ।
तप्त्वा तपांसि बहुशो मनुजैरवाप्यम् । क्षेत्रान्तरेषु दिविषत्तटिनीतटेषु ॥४८॥
तुङ्गां न वेद परमामृतसारपूर्णाम् । कल्लोलिनीमपि विवेद जलौघपूर्णाम् ।
वेधा विभुर्विधिकलाभरणोऽथ वाऽस्याः । जानाति सारमधिकं न हि वेत्ति को वा ॥४९॥

## विज्ञानकन्दः

श्रीचिद्विलास कथितं भवताऽऽश्रमाणाम् । श्रीमद्विभाण्डकतपोवनसङ्गतानाम् ।
आकर्ण्य भूरि महिमानमतीव तुष्टः । देवाऽद्य मे कथय तस्य मुनेश्चरित्रम् ।
को वा विभाण्डकतपोधनसार्वभौमः । तुङ्गातटे किमधिकृत्य तपश्चचार ।
को वा बभूव मलहानिकरो महेशः सर्वं च तन्मम वदाऽद्य विशुद्धबुद्धे ॥५१॥

## चिद्विलासः

विज्ञानकन्द सुगुणावलिवल्लिकन्द । प्रायेण तन्मुनिचरित्रमिहातिचित्रम् ।
वक्ष्येऽवधारय विदारय जाड्यमन्तः । श्रेयांसि साधय विदूरय पापजातम् ॥५२॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीचिद्विलासयतीन्द्रविज्ञानकन्दतपोधनेन्द्रसंवादे द्वाविंशोऽध्यायः ।

29. °मिह । (A) °प्यंहसंतति° । (B), (C)



# ॥ अथ त्रयोविंशोऽध्यायः ॥

धातुर्मरीचिरजनिष्ट सुतो गरीयान् । तस्याऽऽत्मजोऽप्यथ बभूव स कश्यपोऽपि ।
जज्ञे विभाण्डमुनिराडथ कश्यपेन । तस्मात्स एष मुनिसन्ततिमाननीयः ॥१॥
क्षेत्राणि तीर्थान्यपि संचरिष्णो– । श्चित्राणि भव्यचरितानि समन्ततोऽपि ।
भूयो विभाण्डकतपोधनशेखरस्य । तुङ्गासरित्परिसरो नितरां दिदीपे ॥२॥
कृत्वा तपोवनमनुत्तममेव दिव्यम् । अध्या[1]स्य तत्र दृढमासनमेव बध्वा ।
प्राणादिकान् विचरतो मरुतो निरुध्य । नासाग्रलग्ननयनः सुचिरं प्रतेपे[2] ॥३॥
आधाय चाऽऽत्मनि मनः स्थिरतामुपेत्य । सन्त्यज्य चान्यदखिलं निजकृत्यजातम् ।
ध्यायंश्चिरं हृदि परं गुरुमेव शम्भुम् । अब्दान्निनाय शतशः परिपूतचेताः ॥४॥
अश्नन् फलानि कतिचिद्दिवसान्निनाय । जग्ध्वा च कानिचिदहान्यथ पल्लवानि ।
भुक्त्वा समीरणमसौ गमयांचकार । तूष्णीं वसन्नथ बहून् समयान्निनाय ॥५॥
इत्थं निरस्तमरुदागमनप्रचारम् । निस्तन्द्रमेव मुनिराजनि संनिविष्टे ।
निर्वीचिसंचलननिश्चलवारिपूर– । कल्लोलिनीधव इवाऽत्र तपोवनान्तः ॥६॥
निष्कम्पभूमिरुहजातमनुष्णरश्मि– । सञ्जाततापमवधूततमःप्रसारम् ।
निर्जातिवैरतनुभृद्विसरं चकाशे । सद्मेव धातुरिह तद्वनमप्यवन्याम् ॥७॥
एवं चरत्यनिशमुज्ज्वलचित्तवृत्तौ । श्रीमद्विभाण्डकमुनौ मुनिमाननीये ।
तीव्रं तपांसि महितानि मही चकम्पे । भीतो बभूव सुरराट् फणिराट् चचाल ॥८॥
बिभ्युस्तपोधनवरा जगतीतलेऽस्मिन् । तापा[3]त्तपः समुदितान्मुनिपुङ्गवस्य ।
देवाश्च तत्र सुरहो हरिरीश्वराद्याः । न्यस्तं समस्तमपि चित्रवदेव तस्थौ ॥९॥
तेजः शिरोगतपथादथ निःससार । कल्पान्तभानुशतसंनिभमप्यकाण्डे ।
ब्रह्माण्डभित्तिमपि भेत्तुमहो पटीयः । पीत्वैव सप्तजलधीनपि नाऽप तृप्तिम् ॥१०॥
उद्विग्नमेतदखिलं जनजातमस्मिन् । सम्भूय लेखगुरवे विनिवेद्य सर्वम् ।
जीवोऽपि वृत्ररिपवे विनिवेद्य वृत्तम् । सोऽप्युर्वशीं भुवमनीनयदेव तूर्णम् ॥११॥
साऽप्युर्वशी दिविषदामधिपं जगाद । भीता विभाण्डकतपोवनमेव गन्तुम् ।
ईषत्तपोविघटनेऽपि मया कृतेऽसौ । क्रुध्यत्यहो शपति नाऽत्र विचारणीयम् ॥१२॥
नो चेच्छृणोमि भवतो गदितं च राज्ञः । वस्तुं निरस्तमिह चित्तमहो स्वरेव ।
तस्माद्यथोचितमहं करवाणि युक्त्या । गन्तुं मुनीन्द्रनिकटं तु बिभेमि नूनम् ॥१३॥
लब्ध्वा कथं कथमपि त्रिदशाधिपाज्ञाम् । धृत्वा तनुं रतिशतायुतकाम्यभासम् ।
पश्यन्त्यसौ प्रतिपदं च सदाऽऽश्रमाणि । तुङ्गामवाप तटिनीमथ तुङ्गभद्राम् ॥१४॥
सा तूर्वशी किटिधराधरकन्यकायाः । मायां विरच्य तटसीम्नि ननर्त चित्रम् ।
स्नातुं तदा मुनिवरोऽपि च दैवयोगात् । तत्रैव दत्तकुतुकः प्रययौ स तूर्णम् ॥१५॥
दृष्टवा मुनेरपि चचाल मनस्तदानीम् । तामुर्वशीमखिलयौवनमा[4]निनीयाम् ।

1. अध्यास्त । (B) 2. प्रपेदे । (A) 3. तापात्तप° । (B); 4. यौवत मान° । (A); °लालनीयम् । (B), (C)

को वोर्वशीवशमवाप मुनिर्न लोके। तादृक्ष एव भुवने न विलोकितोऽभूत् ।।१६।।
रेतः पपात सलिले किटिवर्ष्मजायाः। तूर्णं विभाण्डकमुनेरथ कृष्णसारी ।
तेनेह तत्सलिलमत्र पपौ पिपासुः। गुर्विण्यभूदहह तत्क्षणतोऽतिचित्रम् ।।१७।।
प्रासूत सूनुमपि तत्र विचित्रसारम्। शृङ्गेन सङ्गि–शिरसं शशिकोटिभासम् ।
तूर्णं यथागतमसावपि निःससार। दृष्टवा किशोरकमसौ मनसा विचिन्तन् ।।१८।।
वाणी तदा गगनतोऽपि विनिःससार । धीमन् विभाण्डकमुने पृथुकं गृहाण ।
अन्तर्दृशा ननु विचारय बालकोऽसौ। कस्मादभूदिति कुतोऽत्र विलम्बसे त्वम् ।।१९।।
आकर्ण्य तद्वचनमभ्रपथा[5]वतीर्णम् । ज्ञात्वा तनूभवमसौ निकटं निनाय ।
रक्षन्नमुं तनयमेव चिरं न्यवात्सीत् । तुङ्गातरङ्गसमुदीक्षणकौतुकी सन् । ।।२०।।
शृङ्गं दधच्छिरसि यच्छिशुराविरासीत् । तस्मादसौ ननु भवेद्भुवि ऋष्यशृङ्ग : ।
आख्यां ददावथ पिताऽपि निरीक्ष्य बालम्। नाम्नैव तेन विदितोऽजनि ऋष्यशृङ्ग : ।।२१।।
एवं मुनौ वसति तत्र सुतेन साकम् । जातस्तदा ऽङ्गविषये किल वृष्टयभाव : ।
दौर्भिक्ष्यमापतदनन्तरमत्युदारम् । लोका विनेशुरभितोऽपि च तत्र तत्र ।।२२।।
तस्याऽधिपोऽप्यखिलवित्स च रोमपाद : । राजा विचार्य सचिवैः परिहारमस्य ।
नाऽन्यद्विभाण्डकसुतागमनादिहास्ती –। त्याधाय[6] ‘तन्मुनिवरानयनोद्यतोऽभूत् ।।२३।।
वाराङ्गनास्तदनु सोऽयमुपादिदेश । सौन्दर्यलेशजितकामवधूप्रचारा : ।
नानाविधैः स्वयमिहाऽनयता[7]ऽतियत्नैः। श्रीमद्विभाण्डकतनूभवमृष्यशृङ्गम् ।।२४।।
ताश्चागता मुनितपोवनमात्र[8]तुङ्गाम् । नत्वा च तत्पयसि धूतविशेषपापाः ।
दृष्टवा च तं मुनिवरं च मृगाविशेषम्। भूयो ऽपि तत्परिसरे ननृतु : सगीतम् ।।२५।।
जानाति किंचन न वक्ति[9] वचांसि ताश्च। किन्त्वस्य चेतसि मृगा इति निश्चयोऽभूत् ।
निर्मृष्टरूप्यकनकाभरणाः कुतस्त्याः। भूयोऽपि विस्मयमिहाऽकलयन्ति मेऽद्य ।। ।।२६।।
विज्ञाय तस्य हृदयं पुनरङ्गनास्ता :। दानेन गानकथया मृदुनर्तनेन ।
चेतो ऽस्य न द्रवति भक्षणमीप्सतेऽसौ। तत्रैक्य[10]मत्र रमते स तथैव कार्यम् ।।२७।।
इत्थं विचार्य चतुरास्त्वथ वारमुख्याः। दत्वा ऋजीकमृदुशष्कुललड्डुकादीन् ।
पूपान् मनोज्ञतरदाधिक[11]कूर्चिकाद्यान्। प्रायेण तं निजवशं मुनिमेव तेनुः ।।२८।।
विघ्नं[12] विधाय यमिनं त्वथ ऋष्यशृङ्गम्। प्रेम्णाऽङ्गदेशमगमन्मुनिना सहैताः ।
तस्मिन् पदं निदधति[13] ध्रुवमङ्गदेशात् । दुद्राव भीतवदहो ननु वृष्टयभाव :।।२९।।
दृष्ट्वाथ तं व्रतपतिं वरमृष्यशृङ्गम् । श्रीरोमपादमहिमभृद्वरशेखरोऽपि ।
नुत्वा ननाम बहुशो विनयानताङ्ग : । शान्तां तनूभुवमथो मुनयेऽप्यदत्त ।।३०।।
तुष्ट[14]न्मुनिः श्वशुरसद्मनि राजभोगान् । भुञ्जन्नजस्रमपि लड्डुकमेव खादन् ।
विस्मृत्य कानिचिदहानि निनाय तत्र। यातो निजाश्रमपदं च स तुङ्गभद्राम् ।।३१।।
श्रीमान् विभाण्डकतपोधनचक्रवर्ती । यातः प्रसूनसमिदाहरणाय तूर्णम्।
आगत्य तीरमथ तत्किटिराजजाया। नाऽलोकताऽत्र तनयं शुचमाप भूयः ।।३२।।

5. °भ्रपटा°। (A) °मत्र यथाव°। (B), (C) 6. –त्याधारयन्मु°। (A) 7. °नयतेति यत्र। (A) नयतेति यत्नैः। (C) 8. °मत्र तुङ्गां। (A), (B) (C) 9. म- - - - -सिताश्च। (A) 10. तत्रैव यत्र। (A), (B), (C) 11. °दाडिमचूर्णिकाद्यान्। (A) 12. निघ्नं। (A), (B), (C) 12a. समेता (B), (C) 13. °धती। (A) 14. तुष्टो मुनिः। (A)



तस्मिन्दिने स नियमानखिलान् समाप्य। स्नात्वा च पोत्रितनयासलिले मुनीन्द्रः।
यातो निजाश्रमपदं त्वरया ऽथ दिव्यम्[15]। लिङ्गं पुरोऽथ मलहानिकरं ददर्श ।।३३।।
दृष्टवातिविस्मयमवाप विभाण्डकोऽपि। सूनुः क्व वा समगमत्तदहं न जाने।
देवोऽपि दैववशतस्त्विह संन्यधत्त। को वाऽत्र लङ्घयति तं नियतेर्नियोगम् ।।३४।।
स्वामिन् प्रसीद गिरिजासख देवदेव। मह्यं कृपारसतरङ्गितचित्तवृत्ते।
सायुज्यमेव वितराऽद्य गिरीन्द्रधन्वन्। वाञ्छा[16]मि नान्यदिह किञ्चन वस्तुजातम् ।।३५।।
इत्थं विभाण्डकमुनौ बहुशो महेशम्। सम्प्रार्थयत्यहह सोऽपि दया[16a]सुधाब्धिः ।
सायुज्यमेव विततार ततः क्षणेन। किं दुर्लभं धुरि महेशितरि प्रसन्ने ।।३६।।
सस्मार तातमथ दिव्यतपोवनं च। तुङ्गातरङ्गपरिचुम्बितपार्श्वदेशम् ।
शान्तां वधूमपि सहैव समानिनाय। नाऽलोकताश्रमपदे पितरं विभाण्डम् ।।३७।।
सर्वत्र तत्र सहितः पितरं विचिन्वन् । स्वं[17] वासदेशमचिरात्समुपाससाद ।
साक्षात्कृतं तदनु लिङ्गमवेक्षते स्म। संचिन्तयन् हृदि गुरुं पुरतोऽवतस्थे ।।३८।।
देवोऽवदत्तदनु मन्यु[18]कृतं महेशः। गव्यूतिमात्रपरिशोभितदिव्यदेशे ।
श्रीचन्द्रमौलिरिति विश्रुतनामधेयम् । लिङ्गं चकास्ति नरकेसरिपर्वताधः ।।३९।।
त्वं याहि तत्र सदिशे [19]तदभीप्सितानि। नालम्बतामिह विलम्बनमृष्यशृङ्ग ।
इत्थं महेशगदितं स निशम्य साक्षात् । क्षिप्रं तदाश्रमपदं स ययौ मुनीन्द्रः।।४०।।
गत्वा ततो गिरिशमेव बहु प्रसाद्य । तप्त्वा तपांसि शतशो गिरिशात्प्रसन्नात् ।
स्वामिन्नयाचत महेशितुरेकभावम् । देवस्तथाऽस्त्विति तदीयतनौ न्यविक्षत् ।।४१।।
अद्याऽपि लिङ्गबहिरेव हि शृङ्गमेकम्। शान्तावया सह जनैः प्रविलोक्यते च।
तस्माद्विभाण्डकमुनिस्तु महोमहीयान्। तत्सूनुरद्भुतगुणस्तु गुरोर्गरीयान् ।।४२।।

## विज्ञानकन्दः

भूयः श्रीचिद्विलास त्वमथ समवदश्चित्रवैभाण्डवृत्तम् ।
सूनो[20]रस्याऽपि विश्वप्रसृमरयशसो ऋष्यशृङ्गस्य वार्ताम् ।
आकर्ण्याऽकर्ण्य चेतोऽभवदतिमुदितं देशिकेन्द्रस्ततोऽस्मिन् ।
चक्रे किं वा चरित्रं तदपि वद विभो श्रोत्रपीयूषसारम् ।।४३।।

## चिद्विलासः

वक्ष्ये विज्ञानकन्द शृणु महिततरं शङ्कराचार्यवृत्तम् ।
गत्वा वैभाण्डदिव्याश्रमसविधमनुप्राप्य यद्यद्व्यतानीत् ।
आधत्स्वान्तर्नितान्तं तदपि च निखिलं सर्वलोकैकपूज्यम् ।
श्रोतुर्गातुर्विधातुः पदमपि भुवनेनाऽतियत्नैकलभ्यम् ।।४४।।

इति श्रीमत्पमहंसपरिव्राजकाचार्यश्रीचिद्विलासयतीन्द्रविज्ञानकन्दतपोधनेन्द्रसंवादे शङ्करविजय-विलासे त्रयोविंशो ऽध्याय : ।।

15. दिव्यलिङ्गं। (B) 16. नेच्छामि। (A) 16a. दयाब्धिसिन्धुः। (B), (C) 17. तुङ्गास°। (A) संवास°। (B), (C) 18. मध्यकृतं। (A) 19. सदिशेत्त्वद°। (A), (B), (C) 20. स्तस्या°। (A)

## ॥ अथ चतुर्विंशोऽध्यायः ॥

ततः श्रीशङ्कराचार्यदेशिकेश्वरकेसरी। वीक्ष्य तुङ्गातटगतानाश्रमान् मुमुदेतराम् ॥१॥
तेभ्यो विभाण्डकमुनेराश्रमो रुरुचेतराम्। वाराणस्या : शतगुणं कुरुक्षेत्रान्महत्तरम् ॥२॥
प्रयागादधिकं लोके विभाण्डकतपोवनम्। मलहानिकरः साक्षाद्विश्वेशो नाऽत्र संशयः ॥३॥
तुङ्गा तु जाह्नवी साक्षात्पौत्रि[1]राजसमुद्भवा। सहायातैरग्रजातैरन्वितो देशिकेश्वरः ॥४॥
वेदवेदाङ्गतत्त्वज्ञैस्त्रिसन्ध्यस्नानतत्परैः। अनभ्यस्तानृतकथैर्यथोचितविधायिभिः ॥५॥
अग्निहोत्रैकनिरतैर्वैश्वदेवविधायिभिः। देवताराधनोद्युक्तैर्यतिभिक्षाप्रदायिभिः। ॥६॥
दयालुभिः सत्त्व[2]शीलैर्गुरुदैवतपूजकैः[2]। मीमांसातर्कवेदान्तपातञ्जलविशारदैः ॥७॥
स्वात्मज्ञानैकनिरतैः सततं जितकाशिभिः। सुरेश्वरादिसच्छिष्यैः सर्वैरप्यनुनाथितः ॥८॥
वाग्देवीचेतसो[2a]ऽप्यत्र रोचते वस[3]तिर्भृशम्। किं करोमीति मनसा चिन्तयन् समवर्तत ॥९॥
तदाऽभवन्नभोवाणी देशिकेशितुरग्रतः। इदमेव पवित्रं ते वाग्देवीविनिवेशने ॥१०॥
क्षेत्रं यतिपते नूनं नाऽलम्बस्व विलम्बताम्। गिरमेनां समाकर्ण्य कुतो वेयं विनिःसृता ॥११॥
विलोक्याऽसौ दश दिशो निश्चिकाय ततो हृदि। वागेषा तु शुभोदर्का श्रूयते गगनान्तरात् ॥१२॥
प्रतिवक्ति मनोवृत्तिं ममैव करुणावती। इति निश्चित्य वेगेन शङ्कराचार्यदेशिकः ॥१३॥
वर्षाम्भ्वीं गुर्विणीं यत्र पाति स्म फडिराडपि। तत्रैव सरितस्तीरे पोत्रिराजतनूभवः ॥१४॥
निर्माप्य चित्रं सदनं भूरिशालासमन्वितम्। सौधप्राकारसहितं शिलास्तम्भैश्च शोभितम् ॥१५॥
वाग्देवतास्थापनार्थमुचितं महदुन्नतम्। शरदृतौ समायाते शुभनक्षत्रसंयुते ॥१६॥
मुहूर्तेऽभिजिति श्रेष्ठे[4] दानकर्मणि शोभने। भार्गवे वासरे तत्राऽप्युच्चस्थे ग्रहपञ्चके ॥१७॥
सद्योगकरणासक्ते लग्ने महति पूजिते। वाणीस्थापनमातिष्ठत्यस्मिन् देशिकपुङ्गवे ॥१८॥
प्रसूनवृष्टिर्न्यपतद्दिवो[5] देवविनिर्मिता। तुष्टुवुर्मुनयश्चैनं श्रीमच्छङ्करदेशिकम्। ॥१९॥
देवदुन्दुभयो नेदुर्ननृतुश्चाप्सरोगणाः। जयघण्टानिनादोऽपि सर्वत्र समलक्ष्यत ॥२०॥
श्रीचक्रं तत्र संलिख्य मन्त्रशास्त्रविधानतः। नवचक्रात्मके तत्र नवशक्तिसमन्विते ॥२१॥
दलेष्व[6]रेषु वृत्तेऽपि मर्मसन्धिषु निर्मले। तत्तद्बीजानि दिव्यानि विन्यस्य चतुरस्रके ॥२२॥
यथोचितं यथास्थानं प्रतिष्ठाप्याऽधिदेवताः। बहिर्दश दिशो बद्धा श्री[6a]मद्देशिकपुङ्गवः ॥२३॥
गीतवादित्रनिर्घोषैर्जयशब्दविजृम्भितैः। पौरैर्जानपदैरेष महोत्सवसमुत्सुकैः ॥२४॥
पद्मपाबादिभिः शिष्यैः प्रमोदभरनिर्भरैः। स्तूयमानो देशिकेन्द्रो वाणीमस्थापयन्मुदा ॥२५॥
तदा प्रसन्नमभवज्जगदेव समन्ततः। दिवं हित्वा भुवं प्राप्ता वाग्देवीत्यतिविह्वलाः ॥२६॥
स्वर्गं सुमनसत्स्यक्त्वा क्षितिं गन्तुं समुत्सूकाः। शङ्कराचार्यवर्यं तं ननन्दुरभितः स्थिताः ॥२७॥
तस्मिन्नेव दिने तत्र प्रमोदः सर्वतोऽप्यभूत्। शारदायाः शरत्काले कारयामास चोत्सवान् ॥२८॥
विप्रान् सन्तर्पयामास बहुधागमपारगान्। दक्षिणाभिः सुवासोभिः साज्य[6b] मिष्टान्नभोजनैः ॥२९॥
विनैकेहेन दक्षेण स्थास्नुना[7] प्रभविष्णुना। वरिवस्या नवस्या[8] वा गिरां देव्याः कथं घटेत् ॥३०॥
इत्थं विचार्य चतुरः श्रीमान् देशिकपुङ्[9]गवः। वाग्देव्याः सविधे दिव्यं[9a] गोपुराट्टालशोभितम् ॥३१॥
श्रीमठं तत्र निर्माय विद्यापीठम[10]चीक्लृपत्। चतुर्ष्वेकं वावदूकं सुरेशाचार्यमग्रिमम् ॥३२॥
ब्रह्मविद्यावरिष्ठं तं तत्पीठे विनिवेश्य सः। अजिज्ञपत्सुरेशार्यमित्थं देशिकपुङ्गवः ॥३३॥

1. तोतिराज°। (A) 2. सत्य°-----पूजनैः। (A), (B); सत्यं°। (C) 2a. °चेतसे। (B), (C) 3. सततं। (A) 4. श्रेयो। (A) 5. हृदि। (A) 6. दले स्वरेषु। (A) 6a. श्रीमान् दे°। (B), (C) 6b. सम्यङमृष्टान्नं। (B), (C) 7. स्थाणुना। (A) 8. °नमस्या। (A), (B), (C) 9. °चक्रमाः। (A) °चन्द्रमाः। (B), (C) 9a. नित्यं (B), (C) 10. °चिक्षिपत्। (A)



यस्त्वद्वैतमते स्थित्वा भारतीपीठनिन्दकः। स याति नरकं घोरं यावदाभूतसंप्लवम् ॥३४॥
आसेतुहिमवच्छैलं सदाचारान् विचारय। यत्र स्खलति यः को वा विप्रस्तं शिक्षयाऽधिकम् ॥३५॥
सम्प्रदायान्[11] दशैवैतान् शिष्येष्वारचय स्वतः। तीर्थाश्रमवनारण्यगिरिपर्वतसागराः ॥३६॥
सरस्वती भारती च पुरीत्येते दशैव हि। शिवात्क्रमात्समायातं चन्द्रमौलीश्वरं परम् ॥३७॥
रत्नगर्भं गणपतिं पूजयेति ददौ मुदा। कारयामास तेनैव स्वीयभाष्यौ[12]घवार्तिकम् ॥३८॥
सविधे निवसन्नेव शरदो नव पञ्च च। वाग्देव्याः पूजनं कुर्वन्न्वसत्तेन तन्मठे ॥३९॥
मलहानिकरं देवं प्रत्यहं पूजयन् सुधीः। तुङ्गभद्रातरङ्गाम्भः समालोकनकौतुकी ॥४०॥
शङ्कराचार्यवर्योऽसौ पद्मपादादिभिर्युतः। महोत्सवान् गिरां देव्याः कारयामास भूरिशः ॥४१॥
भूसुरानपि शास्त्रज्ञान् सह तेनैव सङ्गतान्। वाग्देवीपूजनायाऽसौ निवेश्य बहुशः[14] पटून् ॥४२॥
सुरेश्वरार्यशुश्रूषां कर्तुमत्यन्तपण्डितान्। सुरेश्वरार्यभगवान् प्रकाशयतु सर्वतः ॥४३॥
सिद्धा[15]द्वैतं परं नित्यं निगृह्याऽन्यमतान्तरम्। यावत्संन्यासिनां धर्मान् विचारय विचक्षण ॥४४॥
इति दत्वा वरं तस्मै सुरेशार्याय देशिकः। पूर्वस्यां भैरवं देवमुत्तरस्यां च कालिकाम् ॥४५॥
दक्षिणस्यां महादुर्गां प्रतीच्यां दिशि मारुतिम्। देव्याश्च परितोऽत्युग्रां दुष्टनिग्रहहेतवे ॥४६॥
निधाप्य तोटकाद्यैस्तैर्निर्गन्तुमुपचक्रमे। तदा[16] त्वं वीरसेनेन तद्देशपरिपालिना ॥४७॥
भूयोऽपि वन्दितो भक्त्या शङ्कराचार्यदेशिकः। उक्त्वो[17]चान् बहुशो दत्वा ससैन्यः ससुहृज्जनः ॥४८॥
कृताञ्जलिपुटस्तस्थावेकाग्रकृतमानसः। तमूचे शङ्कराचार्यो वीरसेनमहीपतिम् ॥४९॥
त्वं राजा सर्वधर्माणां परिपालयिता भुवि। वाग्देवतां श्रीमहेन्द्रं सुरेशाचार्यमन्वहम् ॥५०॥
विचारय सुखी नित्यं सह[18] पुत्रसुहृज्जनैः। इत्याशिषो वितीर्याऽस्मै वीरसेनमहीभुजे ॥५१॥
ततः श्रीशङ्कराचार्यदेशिकेश्वरकुञ्जरः। स्तुत्वा वेदशिरोभिस्तैर्गद्यैः पद्यैरनेकशः ॥५२॥
गृहीत्वाऽऽज्ञां गिरां देव्याः प्रणम्याऽतीवभक्तितः। ततः श्रीतुङ्गभद्राया मूले स्नातुं समुत्सुकः।
प्राचीं दिशं समुद्दिश्य देशिकेन्द्रो विनिर्ययौ ॥५३॥

### विज्ञानकन्दः

वाग्देवीविनिवेशनं किटितनुस्तीरे विभाण्डाश्रमे
श्रुत्वा श्रीमठनिर्मितं च भवतस्तुष्टोऽभवं श्रीगुरो।
पश्चाद्देशिकपुङ्गवः किमकरोच्छ्रीचिद्विलासाऽद्य मे।
सर्वं तच्च गृणी[19] प्रबोधय परं तत्त्वं तमोभेदकम् ॥५४॥

### चिद्विलासः

श्रेयन्[20] विज्ञानकन्द प्रचुरनिजयशोनिर्जितामु[21]ष्णभानोः।
भूयः श्रीदेशिकस्याऽद्भुततरचरितं सर्वलोकप्रतीतम्।
वक्ष्ये चित्ते निधत्स्व प्रकटय न पुरो दुर्धियामुद्धतानाम्।
लोके तादृग्विधानां भजदवनिभृतां[22] वृत्तमत्युत्तमं[22] हि ॥५५॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीचिद्विलासयतीन्द्रविज्ञानकन्दतपोधनेन्द्रसंवादे शङ्करविजयविलासे चतुर्विंशोऽध्यायः ॥

11. °दायास्तथैवैतान्। (A) 12. °भाष्यार्थं°। (A), (B), (C) 14. °शो वटन्। (A) 15. शुद्धाद्वैतं। (A), (B), (C) 16. तदात्वे। (A), (B), (C) 17. उत्कोशान्। (A); उत्कोचान्। (B), (C) 18. सहपुत्रः सुहृ°। (A) 19. गृणीष्व बोधय (A), (B), (C); 20. श्रीमन्। (A) 21. °तानुष्ण°। (A), (B), (C); 22. भजदवनकृतां वृत्तमत्यद्भुतं°। (B), (C)

# ॥ अथ पञ्चविंशोऽध्यायः ॥

ततः श्रीशङ्कराचार्यदेशिकाधीश्वरः स्वयम्। पद्मपादादिभिः शिष्यैः प्रमोदस्तिमितान्तरैः ॥१॥
वराहक्ष्माधरं प्राप्य सर्वलोकैकपूजितम्। निरीक्ष्य तत्र तीर्थानि संस्नाय च पृथक् पृथक् ॥२॥
प्रदक्षिणं परिक्रम्य वराहक्ष्माधरेश्वरम्। तुङ्गभद्रासरिन्मूलमवलोक्याऽतिहर्षितः ॥३॥
नृकेसरिगिरिं चाऽन्यं निर्वैरप्राणिसंकुलम्। नलिनीनन्दिनीमूले स्नात्वा देशिकपुङ्गवः ॥४॥
तदग्रे नरसिंहं च साक्षात्कृत्वाऽतियत्नतः। तत्पर्वतादधोदेशे ऋष्यशृङ्गं महेश्वरम् ॥५॥
दृष्टवा विस्मितचित्तोऽसौ तुष्टाव च पुनः पुनः। ततस्तदाज्ञामादाय स्वशिष्यैरभितो वृतः ॥६॥
काञ्चीं वरदराजस्य राजधानीमवाप सः। इयाज वेधा यत्रैव समुद्दिश्याम्बुजेक्षणम् ॥७॥
सोऽप्याविरासीत्सन्तुष्टो वपामेवोद्वहन्मुखे। पश्यत्सु सर्वदेवेषु यज्ञकुण्डहुताशनात् ॥८॥
अत्रैकस्यां गुहायां च रुद्रशक्तिरनुत्तमा। अभिन्ना ब्रह्मणा सेयं चिन्मात्रैकतनुर्मता ॥९॥
त्रिधा गुणात्मिका सैव[1] निर्गुणा चाऽत्र दृश्यते। दिदृक्षतां मुनीनां तु स्वात्मानन्दैकगोचरः ॥१०॥
तावुभावपि तत्रत्यौ निरागारौ भृशोज्ज्वलौ। निरीक्ष्य देशिकेन्द्रोऽयमुत्सेहे निर्मितुं पुरा ॥११॥
तत्रत्यो राजसेनोऽपि राजा राजन्वतीं धराम्। कर्तुमेतं निशम्याऽथ वृत्तं[2] देशिकवाञ्छितम् ॥१२॥
सपुत्रमित्रसेनानीसचिवः[3] सहबान्धवः। शङ्कराचार्यवर्यस्य जगाहे सविधं मुदा ॥१३॥
प्रणम्य शिरसा भूमौ साष्टाङ्गं विनयान्वितः। कृतार्थोऽस्मि पवित्रोऽस्मि
समुत्तीर्णो भवाम्बुधेः ॥१४॥
स्तुत्वेत्थं देशिकेन्द्राय स्वकीयविभवोचितम्। उत्कोचान् सुबहून् दत्वा
तस्थौ बद्धाञ्जलिः पुरा ॥१५॥
शङ्कराचार्यवर्योऽथ तद्भक्त्याऽतीव विस्मितः। ऊचे वाचमिमां कांचिद्विचारणविचक्षणः ॥१६॥
महाराज विनीतोऽसि यशोवान् शौर्यवानसि। लक्ष्मीर्यत्र समृद्धाऽऽस्ते मदस्तत्रैव लक्ष्यते ॥१७॥
इति गाथा पुराऽकर्णि त्वयि सा तु मृषाऽभवत्। किञ्चिन्मनीषितं मेऽद्य वर्तते शृणु सादरम् ॥१८॥
श्रीमान् वरदराजोऽसौ वरदो जगतामपि। श्रीकान्तोऽपि कृतान्तं को ह्यनालयकृताश्रयः ॥१९॥
सा सर्वमङ्गलाऽत्रैव कुत्राऽपि च गृहान्तरे। तदर्थमत्र निर्माप्य देवालयमनुत्तमम् ॥२०॥
रम्यं पुरं विनिर्माय शृङ्गाटकसमुज्ज्वलम्। सौधप्रकारपरिखावीथिकाभिर्विराजितम् ॥२१॥
परस्य ब्रह्मणः शक्तेः कामाक्ष्याश्च महोजसः। प्रतिष्ठा करणीयेति तत्र कर्ता त्वमेव हि ॥२२॥
इति तद्वचनं श्रुत्वा स राजोत्थाय सत्वरम्। यदाज्ञप्तं देशिकेन्द्रैरद्यैव करवाण्यहम् ॥२३॥
दया नि[4]धीयतामीषत्किंकरे मयि देशिक[4]। अनेके सन्ति भवतामन्तेवासिवराः क्षितौ ॥२४॥
विहायैतान् कृपा तेऽद्य मय्येव विनिवेश्यताम्। इति ब्रुवन्तं राजानं राजसेनमथाऽब्रवीत् ॥२५॥
शक्तोऽसि सत्यसन्धोऽसि पुरं कारय सत्वरम् ॥२६॥
धर्मे विलम्बनां[5] कांचित्कर्तुं नार्हसि भूमिप। इत्यादिदेश भूपाय राजसेनाय देशिकः ॥२७॥
शिरसैव विधृत्याऽऽज्ञां स राजा हर्षसंयुतः। यथोक्तां कारयामास पुरीं लक्षणलक्षिताम् ॥२८॥
देवालयत्रयं[6] तत्र पृथगेव विनिर्ममे[6]। शिवकञ्चीति तत्रैकामेकाम्रेशकृता[6a]श्रयाम् ॥२९॥

1. चैव। (A) नैव। (B); (C); 2. व्रतं। (A) 3. महितः। (A) 4. विधी°....देशिकैः। (A) 5. °बनं किं°। (A) 6. देवालये तत्र तत्र.... विनिर्मिते। (A) 6a. °श्रमाम्। (B); (C);



नाम्ना तत्रैव कामाक्ष्याः पार्श्वे प्रासादमु[7]त्तमम्। विष्णुकञ्चीति नाम्ना[7a] यां तोरणादिपरिष्कृ[8]-
ताम् ॥३०॥
श्रीमद्वरदराजस्य सौधमन्यत्समुज्ज्वलम्। एतत्सर्वं विनिर्माप्य दिनैरष्टभिरिष्टधीः ॥३१॥
आगत्य तत्र सचिवैर्गुरवे[9] व्यनिवेदयत्। स्वामिन् गुरो देशिकेन्द्र भवद्भिर्यदुदीरितम् ॥३२॥
तत्सर्वं साधितं सम्यक् स्वयमेव विचार्यताम्। यत्राऽस्ति किंचिद्वैकल्यं क्षम्यतां किंकरस्य मे ॥३३॥
इत्युक्त्वा पुरतस्तस्थौ राजसेनो महीपतिः। प्रहर्षमतुलं[10] लेभे देशिकेन्द्रोऽपि मानसे ॥३४॥
[11]तत्सर्वां नगरीं पश्यन् सर्वसम्पत्समन्विताम्। कामाक्ष्याः पुरतो देशे श्रीचक्रं स्वयमालिखत् ॥३५॥
तत्प्रकारं प्रवक्ष्येऽहं शृणु वत्स यथाक्रमम्। चतुर्भिः शिवचक्रैश्च शक्तिचक्रैश्च पञ्चभिः ॥३६॥
नवचक्रैश्च संसिद्धं श्रीचक्रं शिवयोर्वपुः। त्रिकोणमष्टकोणं च दशारद्वितयं तथा ॥३७॥
चतुर्दशारं चैतानि शक्तिचक्राणि पंच हि। बिन्दुश्चाष्टदलं पद्मं पद्मं षोडकपत्रकम् ॥३८॥
चतुरस्रं चतुर्द्वारं शिवचक्राण्यनुत्तमात्। त्रिकोणे बैन्दवं श्लि[12]ष्टमष्टारेऽष्टदलाम्बुजम् ॥३९॥
द्वादशारं षोडशारं भूगृहं भुवनास्रकम्। शैवानामपि शाक्तानां चक्राणां च परस्परम् ॥४०॥
अविनाभावसम्बधं यो जानाति स चक्रवित्। त्रिकोणरूपिणी शक्तिर्बिन्दुरूपपरः शिवः ॥४१॥
अविनाभावसम्बन्धस्तस्माद्बिन्दुत्रिकोणयोः। एवं विभागमज्ञात्वा श्रीचक्रं यः प्रपूजयेत्[12a] ॥४२॥
न तत्फलमवाप्नोति ललिताम्बा न तुष्यति। तस्मान्मुमुक्षुभिः कार्यं श्रीचक्रार्चनमन्वहम् ॥४३॥
शिवशक्त्यैकरूपत्वान्निर्मितं देशिकेन तत्। श्रीचक्रपश्चाद्भागे तु कामाक्षीं ज्ञानरूपिणीम् ॥४४॥
प्रतिष्ठाप्य च पूजायै ब्राह्मणान् विनियुज्य च। एकाम्रेश्वरपूजार्थं विप्रानादिश्य भूयशः ॥४५॥
श्रीमद्वरदराजस्य नमस्यायै नियुज्य च। सर्वज्ञपीठमारोढुमुत्सेहे देशिकोत्तमः ॥४६॥
तदा[12b]ऽशरीरिणी वाणी नभोमार्गाद्व्यजृम्भत[13]। भो यतिन् भवता सर्वविद्यास्वपि विशेषतः ॥४७॥
कृत्वा प्रसङ्गं विद्वद्भिर्जित्वा तानखिलानपि। सर्वज्ञपीठमारोढुमुचितं ननु भूतले ॥४८॥
इति वाचः समाकर्ण्य किमेतदिति विस्मितः। किंचिदालोचयन्नास्त किं करोमीति मानसे ॥४९॥
ताम्रपर्णीसरित्तीरवासिनो विबुधास्तदा। षड्दर्शिनीसुधावार्धिपारदृश्वगुणोन्नताः[14] ॥५०॥
आगत्य तं देशिकेन्द्रं प्रणिपत्येदमूचिरे। भिदा सत्यमिवाऽभाति त्वया[14a] त्वैक्यं निगद्यते ॥५१॥
देवभेदो मूर्तिभेदः प्रत्यक्षेणाऽत्र लक्ष्यते। स्वर्गादिफलभेदश्च सर्वशास्त्रविनिश्चितः ॥५२॥
तत्प्रत्यक्षं च मिथ्येति कथयस्यधुना यते। इति ब्रुवत्सु विद्वत्सु शङ्कराचार्यदेशिकः ॥५३॥
शृणुतात्रोत्तरं विप्रा ब्रह्मैकं तु सनातनम्। इन्द्रोपेन्द्रधनेन्द्राद्यास्तद्विभूतय एव हि ॥५४॥
मृदि कुम्भो यथा भाति कनके कङ्कणं यथा। जले वीचिर्यथा भाति तथेदं च विभाव्यते ॥५५॥
यां देवतां भजन्ते[15] ये तत्सारूप्यं प्रयान्ति ते। ये वा पुण्यं चरन्तीह ते स्वर्गे फलभोगिनः ॥५६॥
एको देव इति श्रुत्या जगत्सर्वं तदाकृति। तद्भिन्नमन्यन्नास्त्येव वेदान्तैकविनिश्चितम् ॥५७॥
तस्मादखण्डमात्मानमद्वयानन्दलक्षणम्। ज्ञात्वा गुरुप्रसादेन मुक्ता भवत नाऽन्यथा ॥५८॥
श्रुतिस्मृतिपुराणोक्तैर्वचनैरिति देशिकः। भेदवादरतान्विप्रानाधायाऽद्वैतपारगान् ॥५९॥
ततस्ततो विपश्चिद्भिः प्रणतश्चातिभक्तितः। गीतवादित्रनिर्घोषैर्जयवादसमुज्ज्वलैः ॥६०॥
आरुरोहाऽथ सर्वज्ञपीठं देशिकपुङ्गवः। पुष्पवृष्टिः पपाताऽथ ववुर्वाताः सुगन्धयः ॥६१॥
उवासैकं तत्र मासं सशिष्यः स च[15a]देशिकः। पाठयन्नीवृदायातान् शिष्यानपि समन्ततः ॥६२॥

7. °मुन्नतम्। (A), (B); (C); 7a. नाम्नाऽन्यां। (B); (C); 8. °परीवृताम्। (A) 9. °वेऽप्यनि°। (A) 10. °मधिकं। (A) 11. तां सर्वां। (A), (C); 12. क्लिष्टमष्टावेष्ठिदला°। (A) 12a. समर्चयेत्। (B), समाचरेत्। (C); 12b. ततोऽश°। (C) 13. °म्भती। (A) 14. °गुणोज्ज्वलाः। (A) 14a. त्वयाऽऽत्मैक्यं। (B); 15. यजन्ते। (A), (B); (C) 15. सह। (A); (C);

### विज्ञानकन्दः

उच्चैः श्रीवरदाधिराजवसतिं निर्माय सौधोन्नताम् ।
एकाम्रेशनिवासमुज्ज्वलतरं देव्या महागोपुरम् ।
श्रीचक्रं प्रविलिख्य तत्परिसरे चाऽस्थाय[16] तद्देशिकः ।
कामाक्षीमिति तां निशम्य नितरां तुष्टस्ततः किं वद ॥६३॥

### चिद्विलासः

वक्ष्ये विज्ञानकन्द त्वमपि[17] गुरूवरे शङ्करे न्यस्तचेताः ।
तत्सर्वं विस्मि[18]तान्यव्यवहृतिरधुनाऽकर्णयाऽसक्तकर्णः ।
वृत्ते यस्मिन् श्रुते वा श्रुतिपथमुपयात्युच्चरत्यप्यनर्घे ।
प्रातर्भास्वत्युदीते तम इव विगलत्यंहसां वृन्द[19]मद्धा ॥६४॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीचिद्विलासयतीन्द्रविज्ञानकन्दतपोधनेन्द्रसंवादे शङ्करविजय-विलासे पञ्चविंशोऽध्यायः ॥

16. °स्थापयदे° । (A) 17, त्वमसि । (A), (C); 18. निस्मृता° । (A), (C); 19.कन्दमद्य । (A); वृन्दमत्था । (B); (C)



## ॥ अथ षड्विंशोऽध्यायः ॥

ततः श्रीशङ्कराचार्यो वेंकटेश्वरमीक्षितुम् । शिष्यैस्तैः स समायुक्तो निर्जगाम महोदयः ॥१॥
गत्वा क्रमेण मार्गेषु क्षेत्राणि प्रविलोकयन् । नत्वा गोविन्दराजेशं भक्ताभीष्टफलप्रदम् ॥२॥
प्रदक्षिणं परिक्रामन् शेषाचलमतन्द्रितः । गिरेरूर्ध्वं समारुह्य स्नात्वा पुष्करणीजले ॥३॥
वेंकटेशं विलोक्याऽथ नमस्कृत्वा च भक्तितः । स्तुत्वा बहुविधैः स्तोत्रैः श्रीभूकान्तासमन्वितम् ॥४॥
तत्रत्यान् ब्राह्मणान् दृष्ट्वा श्रीमान्देशिकपुङ्गवः । वैखानसागमाचारान् श्रुत्युक्तपथवर्जितान् ॥५॥
शुद्धाद्वैतपरान्कृत्वा बोधयामास तत्त्वतः । ततस्ते तद्वचः श्रुत्वा नत्वा तत्पादपङ्कजम् ॥६॥
अज्ञानेन कृतं यद्यत् क्षमस्व करुणादृशा । सफलं दर्शनात्तेऽद्य जन्माऽस्माकं शुभावहम् ॥७॥
इति ब्रुवन्तस्ते सर्वे शरणं समु[1]पागताः । वेंकटेशं प्रसाद्याऽथ गिरेरवरुरोह सः ॥८॥
चिदम्बरं महाक्षेत्रं निराकार[2]हराश्रयम् । गत्वा श्रीदेशिकेन्द्रोऽसौ तैः शिष्यैः सर्वतो वृतः ॥९॥
दृष्ट्वा चिदम्बरेशानं नत्वा स्तुत्वा च भक्तितः । पश्यन् चिदम्बरं क्षेत्रं समन्तादपि चित्रितम् ॥१०॥
शङ्कराचार्यवर्योऽत्र निनाय दश वासरान् । एतस्मिन्नन्तरे विप्रा भास्वन्मतसमाश्रिताः ॥११॥
आगत्य देशिकेन्द्रं तें प्रोचुरित्थं मदोद्धताः । यस्मिन्नस्तमिते रात्रिर्यस्मिन्नभ्युदिते दिनम् ॥१२॥
त्रयीमूर्तिस्त्रिसन्ध्यात्मा त्रिजगत्प्रण[2a]वत्रयम् । सूर्य आत्मेति वेदोक्त्या परं ब्रह्म स एव हि ॥१३॥
पुरुषो भगवानेष निर्गुणः सगुणोऽप्यसौ । भास्करेऽप्युदिते विप्रा अग्निहोत्रं च कुर्वते ॥१४॥
तद्धविःप्राशनाद्देवा वृष्टि मुञ्चन्ति[3] चाऽनघ । वृष्टवा चौषधिसम्पत्तिस्तस्मादन्नं भवेद्ध्रुवम् ॥१५॥
अन्नाद्भूतसमुत्पत्तिरन्नात्सर्वं प्रवर्धते[4] । तस्मात्समस्तलोकांना कारणं रविरीश्वरः ॥१६॥
तद्वपुंमण्डलं पूर्णमुपास्यं मोक्षकाङ्क्षिभिः । गायत्री वेदजननी तस्या देवो दिनेश्वरः ॥१७॥
इति निश्चित्य तच्चि[5]ह्नं दध्मो वपुषि सर्वतः । तादृशं मतमस्माकमुज्झि[6]त्वा श्रुतिचोदितम् ॥१८॥
कथयस्यन्यदेवाद्यशुद्धाद्वैतं मतान्तरम् । तव मिथ्या गिरस्त्वेता वयं तु न सहामहे ॥१९॥
तदीरितमिति श्रुत्वा सौरमार्गप्रवर्तिनाम् । प्रोचे प्रत्युत्तरं धीमांस्ततः श्रीदेशिकोत्तमः ॥२०॥
भो मूढ माठराख्य त्वं न वेत्स्याम्नायसत्कथाम् । ततो विकत्थसे त्वं हि पाषण्डौघशिरोमणे ॥२१॥
विराजश्चक्षुषो जन्म सूर्यस्य वदति श्रुतिः । घटवज्जन्मभाजोऽस्य जगन्कारणता कथम् ॥२२॥
जन्यं यद्दृश्यते वस्तु नश्यत्येव न संशयः । वेदान्तनिश्चितोऽर्थोऽसौ श्रुतिमार्गप्रवर्तकः ॥२३॥
भीषोदेति यतः सूर्यो वायुरस्मा[7]त्पवत्यपि । तस्य भासा सर्वमिदं विभातीति श्रुतिः सती ॥२४॥
ब्रह्मतेजोविना किञ्चिन्न स्फुरेद्भुवनत्रये । ततस्तन्मध्यगं तेजः परब्रह्मसनातनम् ॥२५॥
सौरमण्डलमध्यस्थं साम्बसंसारभेषजम् । नीलग्रीवं विरूपाक्षं ब्रह्मेति परिचिन्तय ॥२६॥
इत्यादिश्रुतिवाक्यौघैः पुराणोक्तैः स देशिकः । सौरान्निरुत्तरान्कृत्वा तच्चिह्नाङ्कितविग्रहान् ॥२७॥
आधायाऽद्वैतिनः सर्वान् श्रुत्यर्थातथ्यवादिनः । चिन्हानि त्याजयामास तैर्धृतानि वपुष्यसौ ॥२८॥
ततो भास्वन्मताध्यक्षाः साष्टाङ्गं प्रणिपत्य ते । त्वत्प्रसादाद्वयं सर्वे तारिता भवसागरात् ॥२९॥
इति स्तुतः स तैर्विप्रैर्भोजसिङ्गेन भुभुजा । भेरीकाहलनिस्वानैर्बधिरीकुर्वता[8] दिशः ॥३०॥

1. तमु° । (A) 2. निराकारं हरास्पदम् । (A) 2a. °प्राणवर्त्यंयम् । (B); (C); 3. °द्देवः.... मुञ्चति चानघ. । (A) 4. प्रवर्तते । (A) 5. तत्सर्वं । (A) 6. °मुद्धृत्य । (A) 7. वायुर्यस्मात्प्रवात्यपि । (B); (C); 8. बधिरीकृतदिङ्मुख. । (B); (C)

ससैन्येन सपौरेण सानुजेनाग्रतो वृतः। त्रिसहस्त्रैस्तालधरैस्तालवृन्तधरैः शतैः ।।३१।।
चामरोदस्तहस्ताभ्यां विपश्चिद्भ्यां सम[9]न्ततः। जयघण्टानिनादेन घोषयद्भिः समन्ततः ।।३२।।
कौतुकालोकनव्यग्रैरशेषैरभितो वृतः। शङ्कराचार्यवर्योऽसौ प्राप मध्यार्जुनं ततः ।।३३।।
यत्र साक्षान्महादेवः पार्वत्या सह भासते। तत्र दृष्ट्वा महादेवं मध्यार्जुनकृताश्रयम् ।।३४।।
प्रणम्य शिरसा स्तोतुमित्थं समुपचक्रमे। नमस्ते गिरिजाकान्त नमस्त्रैलोक्यपूजित ।।३५।।
हरिनेत्राब्जसंपूज्य निजपादसरोरुह। गङ्गाधर विरूपाक्ष त्रिपुरारे नमोऽस्तु ते ।।३६।।
स्मरभास्वत्तनूजातगर्वनिर्वापणक्षम। नमस्ते[10] सुकृपासिन्धो शरणागतवत्सल ।।३७।।
अनाथबन्धो गन्धर्वयक्षविद्याधरस्तुत। इति तुष्टाव[11] बहुशः प्रणनामाऽतिभक्तितः ।।३८।।
तत्क्षेत्रवासिनः सर्वान् प्रातःस्नानपरायणान्। पञ्चयज्ञपरान्नित्यं देवतातिथिपूजकान् ।।३९।।
उमागणपतीशार्काच्युतार्चनपरानसौ। त्यक्तभेदकथानाशु वेदान्तपरिनिष्ठितान् ।।४०।।

विधाय देशिकेन्द्रोऽसौ प्रसाद्य च महेश्वरम्। आसाद्याऽज्ञां महेशस्य मध्यार्जुन-
निवासिनः ।।४१।।

रामसेतुं दिदृक्षुः सन् दर्शनात्सुकृतप्रदम्। निर्जगाम ततः शिष्यैः
पद्मपादादिभिर्वृतः ।।४२।।

रामेश्वरं क्रमेणाऽप सर्वसम्पत्प्रदायकम् ।। ४३ ।।

## विज्ञानकन्दः

पश्यन् श्रीवेंकटेशं तदनु गुरुवरश्चित्सभां प्राप्य चित्राम्।
तस्यां नत्वा नटेशं गगनमयवपुर्भावभावैकवेद्यम्।
सौरानारात्समेतान्यतिपतिरकरोत्तान् प्रसङ्गेषु मूकान्।
दृष्ट्वा मध्यार्जुनेशं त्रिभुवनमहितो[12] सेतुयात्रां प्रपेदे ।। ४४ ।।

## चिद्विलासः

स्नातः प्रातर्महाब्धौ प्रमथितसलिले[13] दिव्यरत्नाकरेऽसौ।
पश्यन् रामेशलिङ्गं सलिलमपि ततो गाङ्गमासिच्य भक्त्या।
यद्यत्तत्र व्यतानीदनुकुलमथ तच्छ्रूयतामादरेण।
श्रीमद्विज्ञानकन्द क्षितितलमहितं देशिकेन्द्रस्य वृत्तम् ।। ४५ ।।

इति श्रीमत्परमहंसपरिव्रजकाचार्यश्रीचिद्विलासयतीन्द्रविज्ञानकन्दतपोधनेन्द्रसंवादे शङ्करविजयविलासे षड्विंशोऽध्यायः ।।

9. समञ्चित.। (B); (C; 10. नमस्तेऽस्तु। (B); (C); 11. स्तुत्वाऽथ। (B), (C); 12. °महितं। (B); (C) 13. °कलिले। (B); (C);



# ।। अथ सप्तविंशोऽध्यायः ।।

ततः श्रीदेशिकेन्द्रोऽसौ गत्वा रामेश्वरस्थलम्। स्नात्वा महोदधौ रम्ये भक्त्या रत्नाकरेऽन्वहम् ।।१।।
तत्रत्यानि सुतीर्थानि दिव्यान्यपि विलोकयन्। अर्णवाभ्यर्णवास्तव्यमुनीनां दिव्यचक्षुषाम् ।। २ ।।
उटजानि विचित्राणि विलोक्याऽनन्दमुद्वहन्। परिजग्राह तैरेषः कृतातिथ्यानि सर्वतः ।। ३ ।।
स्वेनाऽनीतं वीवधस्थं गाङ्गं पाथः समुज्ज्वलम्। अभिषिच्य महाभक्त्या रामेशस्योपरि
स्वयम् ।। ४ ।।

पूजयामास तं देवं बिल्वपत्रैः स कोमलैः। तुलस्या कुन्दमन्दारधत्तूरकरवीरकैः ।। ५ ।।
तुष्टाव परया भक्त्या स्तोत्रेणाऽनेन देशिकः। भास्वद्वंशसमुद्भूतप्रतिष्ठितमनुत्तमम् ।। ६ ।।
रामेशाय नमस्तुभ्यं रामकामप्रदायिने। दर्शनाद्ब्रह्महत्यादिदोषापहृतिहेतवे ।। ७ ।।
नमस्ते जगदीशाय त्रिशिखोज्ज्वलबाहवे। अकाण्डक्षयकृत्क्ष्वेडगिलनोद्यतचेतसे ।। ८ ।।
नमस्तेऽस्तु गिरीशाय कालकालच्छिदे नमः। महाशेषविभूषाय चन्द्रार्काग्निदृशे नमः ।। ९ ।।
वामपार्श्वसमुद्भासिगिरिजारम्यमूर्तये। दीनावनाधीनहृदे नमः सोमार्धधारिणे ।। १० ।।
मुरारिशरहस्ताय त्रयीवाहाय ते नमः। वसुन्धरास्यन्दनाय वेधःसारथये नमः ।। ११ ।।
इति स्तुत्वा प्रणम्याऽथ शङ्कराचार्यदेशिकः। सर्वतः पर्यटंस्तत्र क्षेत्रे रामेश्वराभिधे ।। १२ ।।
अत्यवाहयदेवाऽसौ दिनान्यन्यानि कानिचित्। सम्यक् शारीरकं भाष्यं पाठयन् शिष्यसन्ततेः ।। १३ ।।
एतस्मिन्नन्तरे तत्र कापालिकमताश्रिताः। आजग्मुर्देशिकेन्द्रेण विवादं कर्तुमुद्यताः ।। १४ ।।
तनौ त्रिशूलं डमरुमर्धचन्द्रं च बिभ्रतः। जटोद्भासितमूर्धानो भूतिरुद्राक्षमालिकाः ।। १५ ।।
काषायावृतसर्वाङ्गा ध्यायन्तो हृदि भैरवम्। श्रूयतामस्मदाचारः सर्वश्रुतिपथोचितः ।। १६।।
नास्त्यत्र कर्मबाहुल्यं फलं भूयः प्रदृश्यते। पेयापेयविचारोऽपि भक्ष्याभक्ष्यविचारणा ।। १७ ।।
नैव भूयः प्रयासोऽपि तस्मादस्मन्मतं शुभम्। भयाच्च मरणाच्चैव वमनाद्भैरवो मतः ।। १८ ।।
इति व्युत्पत्तिमाश्रित्य जगत्कर्ता स एव हि। तदंशसंभवा देवास्तद्भासा भासते जगत् ।। १९ ।।
स एव दैवतैः पूज्यो मोक्षदाता स एव हि। तस्मादस्मन्मतं प्राप्य सुखी भव यतीश्वर।। २० ।।
धत्से काषायवासोऽपि कर्माणि परिहीयसे। आवयोः सदृशं रूपं वृथा त्वं खिद्यसि भ्रमात् ।। २१ ।।
अस्मिन्मते तु भवता स्वीकृते लोकविश्रुते। स्वीकुर्वन्ति भवच्छिष्या सर्वे विगतसंशयाः ।। २२ ।।
इत्थं ब्रुवत्सु तेष्वेषः शङ्कराचार्यदेशिकः। शिष्याननान्यवैक्षिष्ट किंचित्कुपितवानिव ।। २३ ।।
बटुनाथक दुर्बुद्धे वृथाऽनल्पं प्रजल्पसि। भैरवोऽस्तु स विश्वेशः पञ्चकृत्यपरोऽभवत् ।। २४ ।।
लीलावतारो देवस्य गिरिजारमणस्य सः। अस्माभिर्वन्दनीयोऽसौ सर्वलोकभयंकरः ।। २५ ।।
अनया कथया तेऽद्य मद्यपस्य किमागतम्। शिष्येष्वेवं ब्रुवाणस्य वाङ्मुखे विगतोत्तरः ।। २६ ।।
शङ्कराचार्यशिष्यैश्च सशिष्यस्ताडितो गुरुः। ततो हुंकृत्य कोपेन कापालिकगुरुस्तदा ।। २७ ।।
नृकपाले समापूर्य सुरामास्वाद्य किंचन। पीतावशिष्टं शिष्येभ्यो ददावतिरुषाऽन्वितः ।। २८ ।।
सस्मार भैरवं देवं तं हन्तुं यतिनं पुरा। आविरासीद्भैरवोऽपि क्षणाद्भक्तदयापरः ।। २९ ।।
कपालमालिकाजालपरिवेष्टितमस्तकः। त्रिशिखेनाऽसिना बाणैश्चापेनोज्ज्वलबाहुकः ।। ३० ।।

1. पाणौ। (B);

उदस्यार्ऽसिं कराग्रेण गुरोः संनिधिमाप सः । हा कष्टमिति सर्वेऽपि पलायनमचीकरन् ॥ ३१ ॥
अनुयाते महीपाले भोजसिङ्गे विचक्षणे । जीवग्राहं गृह्णतैनमित्येवं कथयत्यपि ॥ ३२ ॥
शङ्कराचार्यवर्योऽपि विस्मितः क्षणमास्त सः । ततो विज्ञाय सहसा प्रोत्थायाऽयाहि भैरव ॥ ३३ ॥
नमस्तेऽस्तु महाबाहो सुकृतैरमितैस्तव । दर्शनं घटते लोके नाऽन्यथा तीर्थयाजनैः ॥ ३४ ॥
भैरवः शिव एवाऽसि त्वत्मतं सन्यतं खलु । किन्त्वेते तु विरुद्धं ते वर्तन्ते श्रुतिनिन्दकाः ॥ ३५ ॥
खादन्ति पललं माध्वीं धयन्ति त्वां न जानते । स्वामिन् वेदेषु शास्त्रेषु पुराणेषु च कर्म यत् ॥ ३६ ॥
प्रतिपादितमस्तीह तत्कर्तव्यं हि धीमता[2] । विप्राणां कर्मणा धर्मः साध्यः स्यादिति मे मतम् ॥ ३७ ॥
धर्मेण सर्वपापौघा नाशं यान्ति हि सर्वदा । पापसंघे तथा नष्टे मनःशुद्धिः प्रजायते ॥ ३८ ॥
शुद्धे मनसि सर्वात्मसाक्षात्कारो भवत्यलम् । गुरावित्थं ब्रुवाणे तु भैरवो हर्षनिश्चलः ॥ ३९ ॥
विनिरीक्ष्य गुरोर्धैर्यमुक्तिप्रत्युक्तिकौशलीम् । उवाच देशिकेन्द्रं तं विप्रदण्डार्थमागतम् ॥ ४० ॥
शङ्करस्त्वं सदा पूज्यो ज्ञात्वैवाऽहमिहागतः । भवत्कृतं हि यत्कर्म मयाऽपि च कृतं हि तत् ॥ ४१ ॥
एषां कापालिकानां तु शिक्षां कुरु यतीश्वर । सुखी भव विनिर्जित्य दुर्मतान्यभितो भृशम् ॥ ४२ ॥
इत्युक्त्वान्तरधत्ताऽथ पश्यत्सु सकलेष्वसौ । आजग्मुर्विस्मयाविष्टा एते सर्वे पलायिताः ॥ ४३ ॥
भोजसिङ्गमहीपालो देशिकेन्द्रमहौजसा । विस्मितः प्रणमन् भूयः श्रीगुरोश्चरणाम्बुजम् ॥ ४४ ॥
ततस्तान् भैरवीयांश्च शङ्कराचार्यदेशिकः । मैरेयपललादीनि पिबतस्तान्मदोद्धतान् ॥ ४५ ॥
विप्राधमा भवन्तोऽत्र सर्वकर्मबहिष्कृताः । भवतेति च शप्त्वाऽसौ देशिकेन्द्रोऽथ सत्वरम् ॥ ४६ ॥
ततो रामेश्वरक्षेत्रान्निःससाराऽतिहर्षतः ॥ ४७ ॥

## विज्ञानकन्दः

शप्त्वाऽसौ भैरवीयान् श्रुतिपथविगताचारसंसक्तचित्तान् ।
कृत्वा तानेकजातींस्तदनु निरगमद्दिव्यरामेशपुर्याः ।
इत्थं व्याख्यायि विद्वंस्तदनु किमकरोद्देशिकेन्द्रोऽप्यगात्किम् ।
क्षेत्रं चित्रं पवित्रं तदपि च कथय श्रीगुरो मेऽद्य वृत्तम् ॥४८॥

## चिद्विलासः

विज्ञानकन्द कथयामि तदप्यशेषम् । श्रीदेशिकेन्द्रचरितं महनीयशीलम् ।
आधत्स्व चेतसि न विस्मर कुत्रचिद्वा । नाऽख्यायि[3] तत्त्वमिदमेव हि शास्त्रसिद्धम् ॥४९॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीचिद्विलासयतीन्द्रविज्ञानकन्दतपोधनेन्द्रसंवादे शङ्करविजयविलासेसप्तविंशोऽध्यायः ॥

2. धर्मत. । (B); (C); 3. नाऽख्याहितत्व° । (B)



# ॥ अथाऽष्टाविंशोऽध्यायः ॥

रामेश्वराद्विनिष्क्रम्य ततो देशिकपुङ्गवः । सशिष्यः सहभूपालो वक्रतुण्डपुरीमगात् ॥१॥
स्नात्वा गन्धवतीतोये गजाननमपूजयत् । तदनुग्रहमासाद्य दिनाष्टकमुवास सः ॥२॥
समागतं देशिकेन्द्रमाकर्ण्य विजयैषिणौ । तमागतौ धुण्डिराजवीरविघ्नेशनामकौ ॥३॥
पाशाङ्कुशछिन्न[1]दन्तचिह्नानि दधतौ तनौ । यतिन्नाकर्णयात्युच्चैरस्मदाचारवैभवम् ॥४॥
त्वन्मतं न समीचीनं पश्यतां शृण्वतामपि । आकाशवन्निरालम्बमद्वयं ब्रह्म केवलम् ॥५॥
मनोवागादिवृत्तीनामगोचरतरं परम् । मुमुक्षुभिः कथं ध्येयं खपुष्पवदिदं खलु ॥६॥
अतो मन्मतमुत्कृष्टं मताधीशो गणेश्वरः । ब्रह्मविष्णुमहेशानगणानामप्यधीश्वरः ॥७॥
वाल्मीकिव्यासमुख्यानां कवीनामप्यसौ कविः । सर्वविद्याविदामेव वित्तमः परिकीर्तितः ॥८॥
ब्रह्मादिसृष्टिकर्तृणामयमेव हि कारणम् । तदिच्छाकल्पितं सर्वं जगत्स्थावरजङ्गमम् ॥९॥
महागणपतिं ये तु सदा ध्यायन्त्यतन्द्रिताः । तन्मूलमन्त्रपठनपरा ये ब्राह्मणोत्तमाः ॥ १०॥
प्रवर्तन्ते गणपतौ मोक्षभाजो भवन्ति ते । विघ्नौघपरिहर्ताऽसौ क्षिप्रं सिद्धिप्रदायकः ॥११॥
आस्माकीनमतो दिव्यं मतमाश्रय मूढधीः । उक्त्वेत्थं योद्धुमारब्धौ सशिष्यौ तौ समुत्सुकौ ॥१२॥
ततः श्रीदेशिकेन्द्रोऽसावहो धुण्डिगणेश्वर । ब्रह्मादिकानामुत्पत्तिर्गणेशात्कथिता त्वया ॥१३॥
उमाङ्गमलजातस्य जगत्कारणता कुतः । पिता यस्य महादेवस्तस्याऽपि जनकः कथम् ॥ १४ ॥
चतुरास्यादिदेवानां परब्रह्मैव कारणम् । न तद्विना किञ्चिदस्ति जगत्सर्वं चराचरम् ॥१५॥
यथोत्पन्नो गणेशोऽसौ यास्यत्येव लयं पुनः । अतो दुर्युक्तियुक्तं ते तनौ चिह्नस्य धारणम् ॥१६॥
गजास्योऽपि महानेव सर्वदेवतपूजितः । जगत्कर्ता तु न भवेदुत्पन्नत्वान्महेशितुः ॥१७॥
इत्युक्तौ देशिकेन्द्रेण युक्तायुक्तविचारिणा । त्यक्त्वा धृतानि चिह्नानि प्रणम्य शिरसा गुरुम् ॥१८॥
भवत्तत्त्वोपदेशेन मोहान्धतमसं गतम् । ज्ञानभानुरुदीतोऽभूत्कृतार्थौ त्वन्निरीक्षणात् ॥१९॥
इति स्तुत्वा देशिकेन्द्रं सहैव परिजग्मतुः । ततः क्रमेण मीनाक्षीं दर्शनोद्यतमानसः ॥२०॥
मधुरानगरीं प्राप शङ्कराचार्यदेशिकः । पाण्ड्यराजसुतां दृष्ट्वा सर्वावयवसुन्दराम् ॥२१॥
सुन्दरेशं निरीक्ष्याथ नत्वा स्तुत्वा च भूरिशः । स्नात्वा सुवर्णपद्मिन्यां पुष्करिण्यामुषस्ययम् ॥२२॥
दिनानि कानिचित्स्थित्वा क्षेत्रं तदभितश्चरन् । शुद्धाद्वैतपरान् कृत्वा तत्रत्यानग्रजन्मनः ॥२३॥
दत्वाऽऽज्ञां भोजसिङ्गाय स्वपुरीं गन्तुमेव सः । अनन्तशयनं लेभे वैकुण्ठं भूतलोदितम् ॥२४॥
यत्र शेते महाविष्णुर्मोहितः स्वीयमायया । अनन्तं पद्मनाभं तं संपूज्याऽतीवभक्तितः ॥२५॥
स्तोत्रेणाऽनेन तुष्टाव श्रीमच्छङ्करदेशिकः । नमस्तेऽस्तु महा[2]कान्त नमस्ते मुर[3]हारिणे ॥२६॥
मधुकैटभविध्वंसकारणाय नमो नमः । नाभीसरोरुहोद्भूतचतुरास्याय ते नमः ॥२७॥
महाशेषाहितल्पाय कन्दर्पजनकाय ते । महावराहरूपाय नृकेसरिवपुर्भुते ॥२८॥
पद्मनाभमिति स्तुत्वा पक्षमेकमुवास सः । तत्रत्यरामराजेन भूरिविक्रान्तिशालिना ॥२९॥
वन्दितः पूजितो भूयः ससैन्येनाऽतिभक्तितः पाठयन्नास्त तत्रैव ग्रन्थान् स्वेन विनिर्मितान् ॥३०॥
एतस्मिन्नन्तरे विप्रा वैष्णवाचारपारगाः । शङ्खचक्रगदाशार्ङ्गचिह्नेन परिचिह्निताः ॥३१॥

1. पाशङ्कुशादिसंछिन्नचिन्हानि । (B); °शादिसच्चिन्ह° । (C); 2. रमाकान्त । (B); (C);
3. मुरवैरिणे । (B); (C)

दधतस्तुलसीमालास्तत्काष्ठस्य च मालिकाः। जपन्तो हरिनामानि गोपीचन्दनचर्चिताः ॥३२॥
कर्णयोस्तुलसीपत्रमङ्गारतिलकाङ्किताः। विष्णुशर्मा पद्मनाभः कृष्णद्वैपायनाभिधः ॥३३॥
व्यासदास इति ख्यातो वराहाचार्य एव च। वैखानसागमे दक्षाः पाञ्चरात्रादितत्पराः ॥३४॥
श्रुतीरितपथालापकथालेशा[4]विवेकिनः। आगत्य देशिकेन्द्रं तं स्वमताचारमूचिरे ॥३५॥
भिदैव सत्यं जगति दैवतं विष्णुरेव हि। मतान्यन्यानि यान्यद्य मूढमोहकराण्यहो ॥३६॥
विष्णोः सकाशादुद्भूतं जगत्तत्रैव संस्थितम्। स्थितिसंयमकर्ताऽसौ जगतोऽस्य जगच्च सः ॥३७॥
संसारसर्पसंदष्टनष्टचेष्टैकभेषजम्। कृष्णेति वैष्णवं मन्त्रं जप्त्वा मुक्तो भवेन्नरः ॥३८॥
तस्माद्देवे परा भक्तिर्भवेच्छ्रीमधुसूदने। तस्य स्यात्सफलं जन्म मुक्तिश्चैव करे स्थिता ॥३९॥
धर्मार्थकाममोक्षाख्याः पुरुषार्था यतीश्वर। विष्णुभक्तिपराणां वै संपद्यन्ते न संशयः ॥४०॥
सृष्टिस्थितिविनाशानां शक्तयः सर्वदेहिषु। वैष्णव्यः परिवर्तन्ते देशिकेश्वर सर्वदा ॥४१॥
एष धाता विधाता च कारणं कार्यमेव च। कर्ता कारयिता विष्णुर्भुक्तिमुक्तिफलप्रदः ॥४२॥
जीवन्ति जन्तवः सर्वे यथा मातरमाश्रिताः। तथैव वैष्णवीं भक्तिमाश्रित्य निखिला जनाः ॥४३॥
किं वेदैः किमु वा शास्त्रैः किं वा तीर्थनिषेवणैः। विष्णुभक्तिविहीनानां किं तपोभिः किमध्वरैः ॥४४॥
मानुषं दुर्लभं जन्म प्राप्येत जगतीतले। तत्राऽपि हरिभक्तिस्तु जन्मकोटिभिराप्यते ॥४५॥
तद्भक्ति[5]पादुकाधूलिं शिरसा यस्तु धारयेत्। संसारान्मुच्यते सोऽपि विषयग्राहसंकुलात् ॥४६॥
ये बाहुमूलपरिचिह्नितशङ्खचक्राः। ये कण्ठलग्नतुलसीनलिनाक्षमालाः।
ये वा ललाटफलके लसदूर्ध्वपुण्ड्राः। ते वैष्णवा भुवनमाशु पवित्रयन्ति ॥४७॥
इत्यादिकैः पुराणोक्तैर्माठरायणचोदितैः। निश्चित्य सत्त्वगुणकं हरिमेव निरन्तरम् ॥४८॥
भक्तिर्मुक्तिकरी साक्षाद्भक्तिरेव फलप्रदा। भक्त्यैव प्राक्तनाः सिद्धास्तस्माद्भक्तिर्गरीयसी ॥४९॥
श्रीमन् यते महाधीमंस्त्वमस्मन्मतमाश्रय। इत्युक्तवत्सु तेष्वेष गुरुराडुत्तरं ददौ ॥५०॥
रे मूढ विष्णुशर्मंस्त्वं श्रुत्युक्ताचारवर्जित। यज्ञादिकानि कर्माणि हित्वा भक्तिं प्रशंससि ॥५१॥
द्वैतभक्त्या हि संसारवर्धनं भिन्नरूपतः। अभिन्नरूप[6]मद्वैतभक्त्या मोक्षोऽभिजायते ॥५२॥
द्वैतरूपात्मिका भक्तिः क्लेशसन्त[7]तिदायिनी। अद्वैतभक्तिरचला निर्विकल्पा सुखप्रदा ॥५३॥
तस्मादद्वैतगां भक्तिमाश्रयेत्सर्वसिद्धिदाम्। भक्त्या चित्तं तु शुध्येत तस्माज्ज्ञानं प्रजायते ॥ ५४ ॥
ज्ञानादेव तु कैवल्यं नाऽन्यथा कल्पकोटिभिः। हरिरूप्रधरः शम्भुः शम्भुरूपधरो हरिः ॥ ५५ ॥
ईषदप्यन्तरं नाऽस्ति भेदकृत्पापमश्नुते। अभिन्नरूपमात्मानमज्ञात्वैव मनागपि ॥ ५६ ॥
भेदं ब्रूते च यो मूढः स साक्षाद्ब्रह्मघातकः। आकाशमेकं हि यथा घटादिषु पृथग्भवेत् ॥ ५७ ॥
तथाऽऽत्मैकोऽप्यनेकश्च जलाधारेष्विवां[8]शुमान्। अज्ञानसागरे मग्ना भेदं कुर्वन्ति पापिनः ॥ ५८ ॥
अनादिनिधने देवे हरिशङ्करसंज्ञिते। मनोवृत्तिमयं द्वैतमद्वैतं परमार्थतः ॥ ५९ ॥
अविद्यामोहितात्मानः पुरुषा भिन्नदर्शिनः। यो देवो जगतामीशः कारणानां च कारणम् ॥ ६० ॥
युगान्ते जगदत्ये तद्रुद्ररूपधरो हरिः। रुद्रो वै विष्णुरूपेण पालयत्यखिलं जगत् ॥ ६१ ॥
ब्रह्मरूपेण सृजति तस्माद्भेदो न विद्यते। शिवो गुरुः शिवो जीवः शिवो बन्धुः शरीरिणाम् ॥ ६२॥
शिव आत्मा शिवो देवः शिवादन्यं न किञ्चन। हरिशङ्करयोर्मध्ये ब्रह्मणश्चापि यो नरः ॥ ६३ ॥
भेदकृन्नरकं भुङ्क्ते यावदाचन्द्रतारकम्। यः स्वकर्म परित्यज्य भक्तिमात्रेण जीवति ॥ ६४ ॥
न तस्य तुष्यते विष्णुराचारात्पूज्यते यतः। तस्मात्कार्या हरौ भक्तिः स्वधर्मस्याऽविरोधिनी ॥ ६५ ॥
सदाचारविहीनानां भक्तिरप्यसुखप्रदा। वेदप्रणिहितो धर्मो वेदो नारायणः स्मृतः ॥ ६६ ॥
तत्राऽश्रद्धापरा ये तु तेषां दूरतरो हरिः। हरिभक्तिपरो वाऽपि हरभक्तिपरोऽपि वा ॥ ६७ ॥
भ्रश्यते स्वाश्रमाचारात्पतितः सोच्यते बुधैः। कुर्वन् श्रुत्युक्तकर्माणि तत्त्वध्यानपरायणः ॥ ६८ ॥

4. कथालेशविनिर्जिताः। (B); लेशविवर्जिताः। (C) 5. तद्भक्त°। (B), (C) 6. °रूपयाद्वैत°। (B), (C) 7. °संसृति°। (B), (C) 8. °ष्विहांशु°। (B)



वेदपाठपरो यस्तु स याति परमं पदम्। अतः सा तपसा रिक्ता तनुर्यस्य हि विद्यते ॥ ६९ ॥
आमो पक्को नरः श्रेयो नाऽश्नोतीति श्रुतीरि[9]णा। अविज्ञाय च तत्त्वार्थं श्रुतेरज्ञानवैभवात् ॥ ७० ॥
तप्तलोहेन चिह्नानि क्रियन्ते सर्वतस्तनौ। श्रुत्यन्तरं न जानीमो पुराणवचनानि वा ॥ ७१ ॥
देहक्लेशविधेरन्यत्फलं नास्तीति निश्चयः। निरञ्जनं निराकारं पूर्णमाकाशमध्यगम् ॥ ७२ ॥
स्वप्रकाशमनिर्देश्यं महतां च महत्तरम्। यन्नित्यं परमानन्दं पूर्णं ब्रह्म सनातनम् ॥ ७३ ॥
तदेव सृष्टिसमये वामाद्विष्णुमसीसृजत्। स्वमायया विधातारं दक्षपार्श्वाच्च सृष्टवत् ॥ ७४ ॥
मध्याद्रुद्रं ससर्जाथ जगदन्तकरं स्वतः। सृष्टिकाले परब्रह्म विश्वमित्थं ससर्ज हि ॥ ७५ ॥
अपाणिपादो जवनो ग्रहीता हृदि संस्थितः। पश्यत्यचक्षुरेवाऽसौ तथाऽकर्णः शृणोति च ॥ ७६ ॥
पश्यन्ति ऋषयो हेतुमात्मानं सूक्ष्मदर्शिनः। ब्रह्मणस्तादृशस्याऽस्य कथं चिह्नत्वकल्पना ॥ ७७ ॥
तद्धारणेन मुक्तिर्वा भक्तिर्वा जायते कथम्। आम्नायोक्तानि कर्माणि कुर्वन्ध्यायन् परं हृदि ॥ ७८ ॥
क्रमेण प्राप्य विज्ञानं ततः श्रेयोऽधिगम्यते। नित्यकर्मपरित्यागे पतितो भविता स्वयम् ॥ ७९ ॥
शङ्खचक्राङ्किततनुं दृष्ट्वा स्नानं समाचरेत्। अस्पृश्यः शु[10]चिर्भिर्विप्रैश्चितकाष्ठवदेव सः ॥ ८० ॥
वाङ्मात्रेणाऽपि नाऽर्चेत न सहाऽसीत तेन वा। शूद्रवत्स परित्याज्यो जीवच्छवसमाकृतिः ॥ ८१ ॥
तस्मै दत्तं च हव्यं च कव्यं चापि वृथा भवेत्। अपि चेन्निगमाचाररतो वेदा[11]न्ततत्परः ॥ ८२ ॥
लिङ्गचक्राङ्कमात्रेण स सद्यः पतितो भवेत्। ब्राह्मणानां च गायत्र्या संवादोऽभून्महान् पुरा ॥ ८३ ॥
अतस्तयाऽभिसंशप्ताः पाषण्डा भवतेति च। वेदोक्तकर्महीनाश्च तान्त्रिकाचारतत्पराः ॥ ८४ ॥
यूयं कलौ भवन्त्वेवमिति तानाह सा रुषा। अतः कलियुगे प्राप्ते भविष्यन्ति द्विजाधमाः ॥ ८५ ॥
शङ्खचक्राङ्किताकारारूर्ध्वपुण्ड्रललाटकाः। ज्ञानकर्मपथभ्रष्टा कामक्रोधप्रपीडिताः ॥ ८६ ॥
दुरात्मानः सत्यधर्मवर्जिताः शापभोगिनः। कलौ त्रिंशत्सहस्राब्दे पूर्णे नष्टा भवन्ति ते ॥ ८७ ॥
तस्माद्युष्माभिरेतानि शङ्खचक्रादिकानि च। श्रुतिस्मृतिविरुद्धानि न ग्राह्याणीह नित्यशः ॥ ८८ ॥
इत्युक्त्वा व्यासदासादीन् श्रीमच्छङ्करदेशिकः। शङ्खचक्रादिचिह्नानां धृतिदोषापनुत्तये ॥ ८९ ॥
स्मृत्युक्तेन विधानेन प्रायश्चित्तं विधाय च। तान् सर्वान् देशिकेन्द्रोऽसौ चकाराऽद्वैतपारगान् ॥
वासुकिक्षेत्रमापाऽथ पार्वतीसुतमीक्षितम् ॥ ९० ॥

## विज्ञानकन्दः

दृष्ट्वाऽनन्तशयेश्वरं विरचयंश्चक्रादिचिह्नाङ्कितान्।
तद्भक्तान् विगताङ्कनान् श्रुतिपथाचारैकदूरान्तरान्।
शैवाद्वैतपरान् विधाप्य च ततस्तत्रोचिता निष्कृतीः।
सुब्रह्मण्यमवाप देशिक इति प्रावोचि धीमंत्वया ॥ ९१ ॥
श्रीचिद्विलास तदपीरय देशिकेन्द्रो। सम्प्राप्य वासुकिनिकेतनमत्युदारम्।
किं वा ततान तनुभृद्वरसार्वभौमः। ब्रूह्यद्य तत्तदखिलं सुजनावतंस ॥ ९२ ॥

## श्रीचिद्विलासः

सम्यग्विचारय तदप्यखिलं ब्रवीमि। विज्ञानकन्द विनयानतचित्तवृत्ते।
श्रीशङ्करार्यचरितं कलुषापहारि। सद्यः प्रमोदजनकं स्मरतां जनानाम् ॥ ९३ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीचिद्विलासयतीन्द्रविज्ञानकन्दतपोधनेन्द्रसंवादे शङ्करविजयविलासे अष्टाविंशोऽध्यायः ॥

9. °रिणी। (B) Perhaps the correct word is श्रुतीरणा।; श्रुतिजंगो। (C) 10. सुविपश्चिद्भिः। (B), (C) 11. वेदाङ्ग°। (B), (C)

# ।। अथैकोनत्रिंशोऽध्यायः ।।

सम्प्राप्य वासुकिक्षेत्रं शङ्कराधीश्वरः स्वयम् । स्नात्वा कुमारधारायां तटिन्यां प्रातरुत्थितः ।। १ ।।
अर्चयन् पार्वतीसूनुं षडाननमनामयम् । तारकध्वान्तविध्वंसि महोभरसमुद्धरम् ।। २ ।।
शक्त्यायुधसमुद्भासिकराम्बुजपरिष्कृतम् । शिवशक्त्येकतारूपविभावनपटीयसम् ।। ३ ।।
शूरपद्मासुरस्तत्र समस्तयजनान्धसाम् । पातारं सुरसैन्यानामाधिव्याधिनिवर्तकम् ।। ४ ।।
कुन्दमन्दारकल्हारकरवीरप्रसूनकैः । बिल्वपत्रैस्तुलस्या च पूजयित्वा विशेषतः ।। ५ ।।
दिनानि कानिचित्तत्र निनाय गुरुपुङ्गवः । कुमाराद्रिं समारुह्य चन्द्रद्रोणसमाकृतिम् ।। ६ ।।
अद्भुतानि च तत्रापि पश्यन् विस्मितमानसः । अद्रिं प्रदक्षिणीकुर्वन्[1] प्रणमन्तं मुहुर्मुहुः ।। ७ ।।
पुनः पश्यन् षडास्यं च सुखमध्यास्त देशिकः । ततो मृडपुरीं प्राप सौगतैरभितो वृतम् ।। ८ ।।
केकिपिच्छाङ्कितकलान् विलुण्ठितकचोच्चयान् । अहिंसा परमो धर्म इत्यनल्पं प्रजल्पतः ।। ९ ।।
प्रत्यक्षादितरत्सर्वं मिथ्येति ब्रुवतः स्फुटम् । रात्रावनश्नतो नित्यं नग्नान् पीनकलेवरान् ।। १० ।।
आर्हतांस्तादृशान् दृष्ट्वा देशिको विस्मयान्वितः । शङ्कराचार्यवर्योऽपि तदाचारान्
न्ययुङ्क्त सः ।।११।।
तेऽप्यूचुः स्वमताचारान् सौगताचारसन्तमाः । पिता माता शरीरस्य निदानमिति निश्चितम् ।। १२ ।।
तत्कार्यं देहजातं तु मोक्षस्त[2]द्विलयो भुवि । भस्मीभूतस्य देहस्य जललीनोदबिन्दुवत् ।। १३ ।।
घटेत पुनरावृत्तिः कथं बुद्धिविवर्जित । तन्मोक्षो मोक्ष एव स्याद्वदन्त्यज्ञाः पुनर्भवम् ।। १४ ।।
मृतान् पितॄन् समुद्दिश्य वृथा श्राद्धानि कुर्वते । मृतः पिता कुतो याति भुङ्क्ते[3] श्राद्धं कथं त्विह ।। १५ ।।
पिता समागतः केन दृश्यते वा महीतले । स्वर्गानुभूतिः साम्राज्यं ह्यष्टवर्षवधूरतिः ।। १६ ।।
नरकानुभवोऽप्यत्र वैरिव्याघ्राद्युपप्लवः । इतोऽस्ति परतो लोकं इति मिथ्याविजृम्भितम् ।। १७ ।।
नीरूपस्याऽपि जीवस्य कल्प्यते गमनं यदि । व्योम्नो घटस्थितस्यापि घटेत चलनं तदा ।। १८ ।।
अदृश्यं किञ्चिदस्तीति वृथा जल्पन्त्यबुद्धयः । तस्मादस्मन्मतं दिव्यं त्वमप्याश्रय भो यते ।। १९ ।।
इति ब्रुवत्सु बौद्धेषु शङ्कराचार्यदेशिकः । उत्तरं वक्तुमारेभे देवताभाववादिनः ।। २० ।।
रे मूढ देहपातस्ते कथं मोक्षो भविष्यति । जीवो मृतं विहायैव लिङ्गदेहं विशत्यथ ।। २१ ।।
तृणं हित्वा जलूकेव तृणान्तरमनुक्षणम् । यागादिकानि कर्माणि कृत्वा स्वर्गं समश्नुते ।। २२ ।।
ज्योतिष्टोमादियागेन स्वर्गोऽस्तीति श्रुतिर्गुरुः[4] । मृतस्याऽपि च कर्तव्यं श्राद्धकर्म विधानतः ।।२३।।
तृप्यन्ति तेन पितर इति श्रुत्यर्थनिश्चयः । यदुक्तं[5] भवता हिंसापरो धर्म इति स्फुटम्[*5] ।।२४।।
तदयुक्तं विमूढात्मन् यागीयायाः श्रुतीरणात् । एकं प्रमाणं वक्ष्येऽत्र गायत्रीं च श्रुतीरिताम् ।। २५ ।।
ताराधिदेवतां भक्त्या जपसि क्षपणाधम । वेदनिन्दापरा ये तु देवताभाववादिनः ।। २६ ।।
ते सर्वे नरकं यान्ति यद्यपि ब्रह्मबीजजाः । इत्थं देशिकवर्येण बोधिताः सौगताश्च ते ।। २७ ।।
प्रणम्य शिरसा भूमौ देशिकेन्द्रमतन्द्रिताः । निरस्तगर्वास्ते सर्वे पादसेवां ययाचिरे ।। २८ ।।
पद्मपादादिशिष्याणां पादरक्षादिरक्षणं । [illegible][6]युजच्च तान् सर्वान् दयानिधिरसौ गुरुः ।। २९ ।।
मृडपुर्यास्ततो गत्वा गोकर्णक्षेत्रमाप सः । दशास्येनाऽतिरौद्रेण कृत्वा भूयस्तपांस्यपि ।। ३० ।।

---

1. °कृत्य । (B), (C) 2. °स्तु निलयो । (B); स्तु वि° । (C) 3. भुञ्जेत् । (B); (C) 4.जगौ । (B); (C); 5. यदुक्ता (B), 6. न्ययू° । (B), (C)



छित्वा शिरांसि बहुशो वह्नौ हुत्वा महेश्वरात् । प्रसन्नात्प्राप्तमुर्व्यां तु विघ्नेशेन प्रतिष्ठितम् ।। ३१ ।।
तत्राऽविरास्त तल्लिङ्गं दशास्यो विस्मितस्तदा । मायाविनं सविघ्नेशं पलायन्तमनुद्रुतः ।। ३२ ।।
कुट्टां चकार शिरसि मुष्टिनाऽतिप्ररुष्टधीः । ममज्ज मुष्टिः शिरसि नाऽद्यापि परिपूर्यते ।।३३।।
दशास्यो लिङ्गमुद्धर्तुमैच्छच्चचले जगत्त्रयम् । अशरीरिण्यभूद्वाणी लिङ्गमत्रैव तिष्ठतु ।। ३४ ।।
संभ्रमैरलमत्युग्रै रावण त्वं पुरीं व्रज । दशास्यस्तद्वचः श्रुत्वा परिक्षीणमनोरथः ।। ३५ ।।
स्वपुरीं प्राप वेगेन लङ्कामेवाऽतिचिन्तया । तत्तादृशो महादेवो गोकर्णे वर्तते खलु ।। ३६ ।।
रत्नाकरः पुरो भाति ताम्रगौरीति देवता । धृत्वा तुलां कराग्रेण गुञ्जयाऽऽधिक्यमिच्छति ।। ३७ ।।
सर्वतीर्थानि संभूय कोटितीर्थमभूदहो । तद्वर्तते हि गोकर्णे तन्महत्त्वं किमीर्यताम् ।। ३८ ।।
महाबलेश्वरं तत्र बिल्वपत्रैः सुकोमलैः । धत्तूरैः करवीरैश्च द्रोणकैः सुप्रसूनकैः ।। ३९ ।।
प्रातः पयोनिधौ स्नात्वा पद्मपादादिभिर्युतः । महाबलेश्वरं सम्यक् पूजयन् देशिकोत्तमः ।। ४० ।।
पञ्चक्रोशस्य यात्रां च कुर्वन् सर्वैः समन्वितः । निरीक्षमाणस्तत्रत्यान्यद्भुतान्यप्यनुक्षणम् ।। ४१ ।।
कंचित्कालमुवासाऽसौ निर्जगाम ततो मुदा । क्रमेण पश्यन् क्षेत्राणि दिव्यानि विविधानि च ।।
शङ्कराचार्यवर्योऽसौ श्रीशैलं प्राप सत्वरम् ।। ४२ ।।

## विज्ञानकन्दः

कृत्वा बौद्धनिबर्हणं मृडपुरे गोकर्णमासेदिवान् ।
नत्वा तत्र महाबलेशमसकृल्लब्ध्वा तदाज्ञां ततः ।
श्रीशैलं स जगाम देशिक इति श्रीचिद्विलसाऽवदः ।
तत्रत्यं कथय त्वमद्य चरितं तस्यैव सर्वं क्रमात् ।। ४३ ।।

## चिद्विलासः

विज्ञानकन्द विनयानतमानसोऽसि । श्रीदेशिकेन्द्रचरिते महती तवाऽस्था ।
तस्माच्छृणुष्व गुरुवर्यमहो विचित्रम् । यत्र स्मृतेऽपि स्वयमत्यमलं मनोब्जम् ।। ४४ ।।

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीचिद्विलासयतीन्द्रविज्ञानकन्दतपोधनेन्द्रसंवादे शङ्करविजयविलासे एकोनत्रिंशोऽध्यायः ।।

# ॥ अथ त्रिंशोऽध्यायः ॥

ततः श्रीशङ्कराचार्यदेशिकेश्वरभास्करः। श्रीशैलेशं नमस्कृत्य महोन्नतमहोदयम् ॥ १ ॥
भ्रमराम्बां नमस्कृत्य पूजयित्वा च[1] भक्तितः। क्रमेण मार्गे तीर्थानि क्षेत्राण्याश्चर्यभाञ्ज्यपि ॥२॥
दर्शं दर्शं विशेषेण लिङ्गानि विविधान्यपि। नत्वा स्नात्वैष तीर्थेषु समभ्यर्च्याऽतिभक्तितः ॥ ३ ॥
ज्योगुलाम्बां महालक्ष्मीं बगलाम्बां महोज्ज्वलाम्। ज्वालामुखीनृसिंहेशं हंसकोटिसमप्रभम् ॥ ४ ॥
पाण्डुरङ्गेशमासाद्य तत्र स्थित्वा दिनत्रयम्। तत्रत्यानग्रजान् कृत्वा शुद्धाद्वैतपरायणान् ॥ ५ ॥
जगन्नाथमथ प्राप दीनानाथान् सनाथयन्। साक्षाद्विसृज्य वैकुण्ठं यत्रैवोत्कण्ठते हरिः ॥ ६ ॥
महोदधिर्यत्र तीर्थं जगन्नाथपुरो भुवि। द्वारकावासिनो विष्णोस्तनुरद्यापि वर्तते ॥ ७ ॥
अवाप्य[2] क्षेत्रराजं तमवलोक्य समन्ततः। चारुतां वीक्ष्य तस्यास्य क्षेत्रस्य गुरुपुङ्गवः ॥ ८ ॥
दिनानि कानिचित्तत्र निवासमकरोन्मुदा। स्नात्वा महोदधौ प्रातर्जगन्नाथं प्रपूजयन् ॥ ९ ॥
खण्डयन् विमतान्येष मण्डलानि विपश्चिताम्। ऐन्द्र्यां ककुभि तत्रैकं भोगवर्धननामकम् ॥ १० ॥
जगन्नाथस्य चाऽभ्यर्णे मठमेकमचीक्लृपत्। पद्मपादाचार्यवर्यं तन्मठाधीशमा[3]चरत् ॥ ११ ॥
निर्जगाम ततो वेगाज्जगन्नाथाज्ञया पुरात्। अनुयातौ गुरोरस्य हस्तामलकतोटकौ ॥ १२ ॥
पुष्पवत्सदृशावेतौ चामरायत्तहस्तकौ। नदयन् शास्त्रसंलापैर्बहुभिः परितो वृतः ॥ १३ ॥
उज्जयिन्यभिधं क्षेत्रं क्रमेणाऽप स देशिकः। चिच्छक्त्या भासते यत्र महाकालेश्वरः स्वयम् ॥ १४ ॥
स्कन्दौ दैत्यजनां स्कन्दो दिविषद्वाहिनीपतिः। महाचण्डी करालास्या दैत्यदावदवानलः ॥ १५ ॥
निवासमकरोत्प्रीत्या श्रीमत्कालेशपार्श्वतः। महाकालेशमाराध्य सम्पूज्याऽथ षडाननम् ॥ १६ ॥
महाचण्डीं भगवतीं परिपूज्याऽतिभक्तितः। अनीनयद्दिनान्येषः कानिचित्प्रणयान्वितः ॥ १७ ॥
आश्राव्य देशिकेन्द्रं तं दुर्मतारण्यपावकम्। शाक्तमार्गरता विप्राः सर्वशास्त्रविशारदाः ॥ १८ ॥
रक्तचन्दनलिप्ताङ्गाः फाले कुङ्कुमचर्चिताः। दधतो रक्तवासांसि पादुकाबद्धबाहुकाः ॥ १९ ॥
आजग्मुर्देशिकाधीशमालोकयितुमुत्सुकाः। नमस्कृत्य द्विजास्ते तु शङ्कराचार्यपादयोः ॥ २० ॥
उपविष्टाः सदः कृत्वा वाङ्मुखं कर्तुमुद्यताः। सर्वविच्छङ्कराचार्यदेशिकस्तानलोकत ॥ २१ ॥
पप्रच्छ राजसेनैव निर्मितानिव तानसौ। फाले त्रिपुण्ड्रं सन्त्यज्य कुङ्कुमं ध्रियते कथम् ॥ २२ ॥
शुचिवासः समुत्सृज्य धृतं रक्ताम्बरं कुतः। निषिद्धानि प्रसूनानि धर्तुं किमुचितानि वः ॥ २३ ॥
दुष्कर्मणां हि संसर्गो युष्माकं पापहेतवे। इत्युक्ते देशिकेन्द्रेऽस्मिन् शाक्तमार्गसमुद्धताः ॥ २४ ॥
किं यतिन् कथयस्यद्य मन्मताज्ञानतो हि तत्। अस्मन्मतरहस्यं तु दुरूहं दैवतैरपि ॥ २५ ॥
शृणुत त्वं बोधयामः समाहितमना भव। साक्षाद्भगवतीयुक्ता[4] शम्भोः शक्तिः परा ननु ॥ २६ ॥
कारणं जगतामेषा गुणातीतस्वरूपिणी। तच्छक्त्या वशतः सृष्टं महत्तत्त्वमशेषतः ॥ २७ ॥
तद्द्वारा ब्रह्मविष्ण्वादिमूर्तित्रयसमुद्भवः। शक्तित्रयसमुत्पत्तिस्तस्या एवेति विद्ध्यहो ॥ २८ ॥
वाङ्मनोवृत्तिदूरा या भवान्येवाऽपराकृतिः। अतस्तत्पादपद्मस्य सेवा मुक्तिप्रदायिनी ॥ २९ ॥
कुङ्कुमादीनि चिह्नानि तस्याः प्रीत्यैव[5] दध्महे। अतस्तत्पादुका बाहौ कण्ठेऽपि ध्रियते सदा ॥३०॥
जीवन्मुक्ता वयं तस्माच्छ्रीविद्योपासकाः सदा। श्रूयते श्रुतिरत्राऽर्थे सर्वशास्त्रैकसंमता ॥ ३१ ॥

(1) विशेषतः। (B), (C) 2. अवाप। (B), (C) 3. °मातनोत्। (B), (C) 4. °भगवती शक्तिः शम्भोर्युक्ता°। (B), (C) 5. प्रीत्यै विद°। (B), (C)



विद्यां यो वेद चाऽविद्यां स तीर्त्वाऽविद्यया मृतिम्। विद्ययाऽमृतमश्नाति नेतरे मुक्तिभागिनः ॥ ३२ ॥
प्रकृतिश्चेश्वरश्चेति तयोरैक्यप्रदर्शनात्। सदेव सोम्येदमिति श्रुतिः प्रकृतिबोधिका ॥ ३३ ॥
अतः शक्तिमतस्थानां भुक्तिमुक्ती करस्थिते। प्रणवादिव रुद्राद्या भवन्त्यस्याश्च शक्तयः ॥ ३४ ॥
अतः सर्वादिभूतस्य शम्भोः शक्तिश्च कारणम्। अविनाभूतसंबन्धश्चन्द्रचन्द्रिकयोरिव ॥ ३५ ॥
तस्माद्भगवती विद्या ननु स्वाधीनवल्लभा। भवादृशानां सदृशमस्मन्मतमनुत्तमम् ॥ ३६ ॥
इत्थमुक्तेषु तेष्वेषः शङ्कराचार्यदेशिकः। निश्चितं बोधयामास वेदवेदान्तवाक्चयैः[6] ॥ ३७ ॥
भवदुक्ता भवानी या संसारार्णवतारिणी। तथापि पुरुषोत्कर्षादीशः कैवल्यदायकः ॥ ३८ ॥
यदा पश्यति चाऽत्मानं केवलं परमार्थतः। मायामात्रं जगत्सर्वं तदा भवति निर्वृतिः ॥ ३९ ॥
आत्मानमात्मना ध्यात्वा[7] मुक्तो भवति नान्यथा। ईश्वरः प्रकृतिं त्यक्त्वा वर्ततेऽजामिति श्रुतेः ॥४०॥
विकारकर्त्रीं प्रकृतिः प्रकृतेः परतः शिवः। तद्विज्ञानेन कैवल्यं परमात्मेति सोच्यते ॥ ४१ ॥
ज्ञानस्य मोक्षहेतुत्वे जाते मोक्षे क्व वर्तते। ईश्वरव्यतिरिक्ताया नश्वरत्वाज्जगत्ततेः ॥ ४२ ॥
अज्ञानं जीवनिष्ठं तु निवर्त्य ज्ञानमप्यहो। कतकक्षोदवत्तोयं स्वयमेव विनश्यति ॥ ४३ ॥
अतो ब्रह्मपरिज्ञानाद्ब्रह्मैव भवति श्रुतेः। मायाऽपि[8] वर्तते नित्यमीश्वरस्य नियोगतः ॥ ४४ ॥
तदुपासनया मूढ मनःशुद्धिकरी भवेत्। विशुद्धायां मनोवृत्तौ सद्यो मोक्षः प्रजायते ॥ ४५ ॥
विधूय पापपटलं यया पश्यति तत्पदम्। साऽपि विद्या महेशस्य नियोगवशवर्तिनी ॥ ४६ ॥
अयं हि भगवानीशः स्वयंज्योतिः सनातनः। परमात्मा परं ब्रह्म तस्मादन्यन्न किञ्चन ॥ ४७ ॥
भवानीभजका यूयमीदृशोपासनान्यतः। विसृज्य कुङ्कुमाद्यङ्कान् पादुकाधारणान्यपि ॥ ४८ ॥
शुद्धाद्वैतपरा भूत्वा सोऽहंभावनतत्पराः। मुक्ता भवत भो मूढा नान्यथा कल्पकोटिभिः ॥ ४९ ॥
मोक्षप्राप्त्यर्थमन्योऽत्र यत्नो नेषच्च विद्यते। इत्यादिश्रुतिवाग्जालैर्बोधिता देशिकेन ते ॥ ५० ॥
शङ्कराचार्यवर्येण शक्तिमार्गपरायणाः। त्रिपुराम्बा कुमारश्च बिन्दुभुक्पूर्णबोधकः ॥ ५१ ॥
पूर्णानन्दो वीरशाक्तः शुद्धविद्याकलानिधिः। नत्वा श्रीशङ्कराचार्यदेशिकेश्वरपादयोः ॥ ५२ ॥
पादुकं कुङ्कुमाद्यानि चिह्नान्युत्सृज्य सर्वतः। शुद्धाद्वैतपराः सर्वे पञ्चपूजापरायणाः ॥ ५३ ॥
यज्ञादिकानि[9] कर्माणि कुर्वन्तो न्यवसत्सुखम्। इत्थं विधाय तत्रत्यानग्रजांस्तत्त्ववेदिनः ॥
क्रमेण द्वारकां प्राप देशिकेन्द्रोऽप्यनन्यधीः ॥५४॥

## विज्ञानकन्दः

श्रीशैलान्निर्गतोऽसौ प्रतिपथममलं क्षेत्रजातं प्रपश्यन्।
कुर्वन् संचारपूतां धरणिमपि हठात्खण्डयन् दुर्मतानि।
गत्वा चाप्युज्जयिन्यां व्यतनुत गुरुराट् शाक्तमार्गानुरक्तान्।
शुद्धाद्वैतकनिष्ठानिति च समवदश्चिद्विलासाऽग्रतः किम् ॥ ५५ ॥

## चिद्विलासः

विज्ञानकन्द कथयामि तदादितस्ते। श्रीदेशिकेन्द्ररचितं चरितं समस्तम्।
आधत्स्व चेतसि न विस्मर किंचिदत्र। चित्रं पवित्रमिह तच्चरितं जगत्याम् ॥ ४६ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीचिद्विलासयतीन्द्रविज्ञानकन्दतपोधनेन्द्रसंवादे शङ्करविजयविलासे त्रिंशोऽध्यायः ॥

6. °वाङ्मयैः। (B). (C) 7. ज्ञात्वा। (B), (C) 8. माया विवर्तते। (B) 9. यज्ञादिनित्यकर्माणि। (B)

## ॥ अथैकत्रिंशोऽध्यायः ॥

ततः श्रीशङ्कराचार्यदेशिकेश्वरपुङ्गवः। पश्यन् क्रमेण मार्गेषु लिङ्गानि विविधान्यपि ॥ १ ॥
भुवं प्रदक्षिणीकुर्वन् प्रतस्थे दिग्जयेच्छया। पादपङ्कजविन्यासैर्धन्यां तन्वन् भुवस्थलीम् ॥ २ ॥
ततो द्वारवतीं प्राप देशिकाधीश्वरः स्वयम्। यत्राऽस्ते स महाविष्णुः साक्षाल्लक्ष्म्या समन्वितः ॥ ३ ॥
सिद्धेश्वरो यत्र[1] देवो भद्र[2]काल्येव शक्तिका। तीर्थं तु गोमतीत्येव स[3]रिल्लोकैकविश्रुता ॥ ४ ॥
तच्चारुतां विलोक्याऽसौ सुविशालं मनोहरम्। पश्चिमस्यां हरित्येष मठमेकं विनिर्ममे ॥ ५ ॥
हस्तामलकनामानं तदध्यक्षं ततान सः। तद्देशजानग्रजातीन् कृत्वाऽद्वैतपरायणान् ॥ ६ ॥
मासमेकं वसंस्तत्र पर्यटन्नभितो भृशम्। साधुवृन्दावनासक्तं वृन्दावनमुदैक्षत ॥ ७ ॥
ततोऽसौ मधुरां प्रापन्मधुरां नगरीं हरेः। ततो गोकुलमापाऽसौ तत्रैकं दिनमास्त सः ॥ ८ ॥
श्रीकृष्णपादपाथोजरजोराजिविराजितम्। गोपालबाललीलानामङ्कुरार्पणमन्दिरम् ॥ ९ ॥
मुरलीनादसौरम्यसमञ्चितहरित्तटम्। ततो निर्गत्य शिष्येण तोटकेन समन्वितः ॥ १० ॥
जनैः कतिपयैरेव विपश्चिद्भिरनुद्रुतः। विलोकयन् समन्ताच्च दुर्मतान्यपि खण्डयन् ॥ ११ ॥
मण्डयन् स शिवाद्वैतं पुण्डरीकमिवांशुमान्। पौण्डरीकं क्षेत्रमाप कुरुक्षेत्रं ततोऽप्यसौ ॥ १२ ॥
तत्क्षेत्रं परितः पश्यन् कुरूराजन्यकं स्मरन्। विस्मयाक्रान्तचित्तोऽसौ श्रीमान् शङ्करदेशिकः ॥ १३॥
ततो मायापुरीं गत्वा नत्वा तत्रत्यदेवताः। शुद्धाद्वैतपरान् सर्वान् व्यतनोत्तत्त्वबोधनात् ॥ १४ ॥
विपश्चिद्भिः सहैवाऽस्मिंस्तत्र तिष्ठति देशिके। त्रिपुराम्बा कुमारश्च परवादिदवानलः ॥ १५ ॥
धीमान् बटुकनाथश्च महाधुण्डिग(जे)श्वरः। दिवाकराचार्यनामा बिन्दुमाधवपण्डितः ॥ १६ ॥
प्रणम्य शङ्कराचार्यदेशिकेन्द्रकलानिधिम्। प्रार्थयामासुर[4]त्युक्ताः षडेते शिष्यपुङ्गवाः ॥ १७ ॥
स्वामिन् सर्वज्ञ सर्वेश चतुःषष्टिकलानिधे। त्वयाऽद्वैतमतं दिव्यं वेदवेदान्तसंमतम् ॥ १८ ॥
तदन्यद्धि लोकेऽस्मिन्नसारमिति साधितम्। भगवंस्तन्मताधीशं परं ब्रह्म सनातनम् ॥ १९ ॥
निर्गुणेऽस्मिन्निरालम्बे निर्विकारे निरन्तरे। कलौ मलिनबुद्धीनां प्रवेशः स्यात्कथं मतेः ॥ २० ॥
शैवं शाक्तं वैष्णवं च सौरं गाणपतं तथा। कापालं षण्मतान्यत्र प्रख्यापय यशोनिधे ॥ २१ ॥
इत्थं संप्रार्थितः शिष्यैः श्रीमान् शङ्करदेशिकः। यद्यन्मते भवद्वाञ्छा विशेषात्परिदृश्यते ॥ २२ ॥
विहाय चाङ्कनादीनि तप्तलोहकृतानि च। श्रुतिस्मृतिविरुद्धानि प्रकाशयत संमतीम्[5] ॥ २३ ॥
ददावाज्ञां गुरुस्तेभ्यः शिष्येभ्यो बहुधाऽर्थितः। नमस्कृत्वा देशिकेन्द्रं दिग्जयाय प्रतस्थिरे ॥ २४ ॥
दत्वाऽऽज्ञां देशिकेन्द्रोऽसौ निरगात्तत्पुराद्द्रुतम्। कृत्स्नां महीं समन्ताच्च शुद्धाद्वैतजनावृताम् ॥ २५ ॥
वितन्वन् बदरीं प्राप तपोधनकृताश्रयाम्। दिनानि कानिचित्तत्र स्वच्छन्दमवसत्सुधीः ॥ २६ ॥
नारायणो यत्र देवस्तीर्थं चाऽलकनन्दिनी। शक्तिः पुण्याम्बिकैवाऽस्य विष्णुवक्षःस्थलाश्रया ॥ २७ ॥
कौबेर्यां दिशि तत्रैकं मठं दिव्यमकारयत्। तन्मठे तोटकाचार्यवर्यं छायानुवर्तिनम् ॥ २८ ॥
अनिच्छन्तं मठाद्यन्यत्पादसेवाधुरन्धरम्। बलात्कृत्वा मठाध्यक्षं प्रश्रयावनताननम् ॥ २९ ॥
रत्नसिङ्गाय भूपाय निवेद्यैतदशेषतः। भक्त्या प्रपूजितस्तेन सपौरेण समन्त्रिणा ॥ ३० ॥

1. महादेवो। (B), (C) 2. रुद्र°। (B), (C) 3. सर्वं°। (B), (C) 4. °रम्युक्ताः। (B), (C) 5. षण्मतम्। (B)



साक्षादिव महादेवो निर्जित्य त्रिपुराण्यसौ। दुर्मतान्यभितो जित्वा रेजे शङ्करदेशिकः ॥ ३१ ॥
कदाचिद्याचयामास जराजर्जरविग्रहः। नारायणं स्वभक्तानामिष्टार्पणपरायणम् ॥ ३२ ॥
स्नातुमुष्णोदकसरः स च तुष्टो ददौ मुदा। अद्याऽपि तत्सरस्तत्र विद्यते विष्णुसंनिधौ ॥ ३३ ॥
कोष्णोदे[6] सरसि स्नात्वा त्रिसन्ध्यं स्थविरोऽपि सः। नारायणार्चनं कुर्वन् संस्मरन्मानसेऽनिशम् ॥ ३४ ॥
तत्रत्यान्यद्भुतान्येष पश्यन्नेव सुसंस्थितः। तस्मिन्नवसरे श्रीमान् दत्तात्रेयो महामुनिः ॥ ३५ ॥
स्वच्छन्दचारी सर्वत्र स्वेच्छाकलितविग्रहः। मूर्तित्रयात्मको योगी दिग्वासा विजितेन्द्रियः ॥ ३६ ॥
नारायणपदाम्भोजदर्शनोपाधिमाश्रितः। शङ्कराचार्यवर्यं तमवलोकितुमागतः ॥३७ ॥
श्रुत्वोदन्तं तदीयं स विस्मयाकलितान्तरः। आगतं तं निरीक्ष्याऽसौ प्रेमालिङ्गनपूर्वकम् ॥ ३८ ॥
पप्रच्छ कुशलं तस्य सोऽप्यपृच्छद्गुरोः शुभम्। इत्थं परस्परं तौ तु तस्थतुश्च कुशासने ॥ ३९ ॥
कुर्वन्तौ स्वेच्छयाऽऽलापाननुभूतान् समन्ततः। दत्तात्रेयो मुनिः प्राह देशिकेन्द्रमिदं वचः ॥ ४० ॥
वेद्म्यहं शङ्कराचार्य भवदागमनं भुवि। नारदेन पुरा प्रोक्तः शङ्करो लोकशङ्करः ॥ ४१ ॥
भवद्वपुः समाश्रित्य विजेतुं दुर्मतव्रजान्। अद्वैतमतमेवैकं संस्थापयितुमादरात् ॥ ४२ ॥
चरत्येव न संदेहः क्ष्माभारोद्धरणेच्छया। दत्तात्रेये वदत्येवं त्रिकालज्ञे महामुनौ ॥ ४३ ॥
स्वकृतान् दर्शयामास ग्रन्थान् भाष्यादिकानसौ। दृष्ट्वा तुष्टाव बहुधा सूत्रभाष्यमशेषतः ॥ ४४ ॥
श्रीमन् यते शङ्करार्य व्याससूत्रार्थनिर्णयः। न ज्ञेयो दैवतैर्वाऽपि त्वया चेद्विशदीकृतः ॥ ४५ ॥
सत्कर्तव्यं कृतं कार्यं दुर्मतान्य[7]जितान्यपि। अद्वैतं मतमेवाऽत्र साधितं सर्वसंमतम् ॥ ४६ ॥
त्वया सरस्वती देवी साक्षादेव जिता ननु। यशःसुधाब्धिकल्लोलैर्दिशो विशदितास्तव ॥ ४७ ॥
इतो गन्तुं समुचितः सत्यसन्धेन शम्भुना। कैलासः सुकृतावासो भवता देशिकेश्वर ॥ ४८ ॥
इत्युक्त्वा शङ्कराचार्यकरपल्लवमादरात्। अवलम्ब्य कराग्रेण दत्तात्रेयः स तापसः ॥ ४९ ॥
प्रविवेश गुहाद्वारं दत्वाऽऽज्ञां जनसंततेः। क्रमाज्जगाम कैलासं प्रमथैः परिवेष्टितम् ॥
पार्वत्या चेभवक्त्रेण कार्तिकेयेन चान्वितम् ॥ ५० ॥

### विज्ञानकन्दः

श्रीमच्छङ्करदेशिकेशचरितान्याद्यन्ततस्त्वन्मुखात्।
आकर्ण्यातितरां तुतोष हृदयं श्रीचिद्विलासाऽद्य मे।
अद्वैतेऽपि मते मतिः समभवन्नूनं निरूढाशया।
जीवन्मुक्तिपदं भवत्करुणयैवाऽऽसादितं श्रीगुरो ॥ ५१ ॥
भूयांसो भुवि सन्तु देशिकवराभिख्या विपश्चिद्वराः।
शिष्यार्थग्रहणैकदर्शितमहाप्रेमादिसीमादयाः।
अन्तेवासिमनोविनोदनविधौ तच्चित्ततापोद्धृतौ।
श्रीमन् देशिक चिद्विलास भवतो मानं न मन्यामहे ॥ ५२ ॥
श्रीमच्छङ्करदेशिकेन्द्रचरितं सर्वं भवान् वेत्त्यहो।
तस्मात्त्वं जगतीतले सुकृतिभिः संश्लाघनीयोदयः।
त्वन्नामस्मरणं त्वदङ्घ्रिभजनं त्वद्भाषिताकर्णनम्।
श्रेयःसाधनमन्वहं तु भवता सङ्गः किमित्युच्यताम् ॥ ५३ ॥

6. कोष्णोदस°। (B) 7. दुर्मतानि जितान्यपि। (B)

## श्रीचिद्विलासः

श्रीमन् विज्ञानकन्द त्वमिव न भुवने शङ्कराचार्यवर्ये ।
भक्तिं मुक्तिप्रदेऽस्मिन् विरचयति[1] जनः कोऽपि लोकैकपूज्ये ।
तस्मात्त्वं विज्ञमान्यो जनुरपि सफलं ते भवानेव धन्यः ।
भक्तिर्मुक्तिः करस्था ननु तव भविता देशिकेन्द्रप्रसादात् ।। ५४ ।।

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीचिद्विलासयतीन्द्रविज्ञानकन्दतपोधनेन्द्रसंवादे शङ्करविजय-विलासे एकत्रिंशोऽध्यायः ।।



# ।। अथ द्वात्रिंशोऽध्यायः ।।

[1]शङ्कराचार्यवर्यस्य देशिकाम्बुजभास्वतः । चरितं कलितापघ्नं शृण्वतां पठतामपि ।। १ ।।
आविर्भावं समारभ्य यः शृणोति गृणाति वा । स्नात्वैव तुङ्गभद्रायां प्रातर्भक्तिसमन्वितः ।। २।।
तस्याऽद्वैतपरिज्ञानं सोऽहमस्तीति भावना । परमेश्वरसायुज्यं भवेदेव न संशयः ।। ३ ।।
कार्तिक्यां माघमासे वा वैशाख्यां श्रद्धयाऽन्वितः । शङ्कराचार्यचरितं सर्वलोकैकपावनम् ।।४।।
यः पठेच्छृणुयाद्वाऽपि ब्रह्मसायुज्यमाप्नुयात् । भानुवारे च सप्तम्यां स्नात्वा तुङ्गासरिज्जले ।।५।।
सकृदध्यायमेकं वा पठेद्यः सुसमाहितः । सोऽपि भुक्त्वा बहून् भोगानन्ते कैलासमाप्नुयात् ।। ६ ।।
यः शृणोति गुरोर्वृत्तं रवौ कर्कटकं गते । तस्य पुण्यफलं वक्तुं न शक्तः फणिभृद्वरः ।। ७ ।।
धनार्थी यः पठेद्वृत्तं श्रीगुरोर्महिमाम्बुधेः । स लब्ध्वा धनसम्पत्तिं राजराजसमो भवेत् ।। ८ ।।
शिवरात्र्यामिन्दुवारे संपूज्य परमेश्वरम् । शङ्कराचार्यचरितं शृण्वन् जागरमाचरेत् ।। ९ ।।
तस्य पुण्यफलं वक्तुं जानाति स महेश्वरः । शरत्काले शारदायाः सदेशे देशिकेशितुः ।। १० ।।
यः पठेच्चरितं भक्त्या स भवेद्गुरुसंनिभः । स्नात्वा च तुङ्गभद्रायां विभाण्डकतपोवने ।। ११ ।।
संपूज्य भक्तिभावेन मलहानिकरेश्वरम् । चन्द्रमौलीश्वरं नत्वा रत्नगर्भं गणेश्वरम् ।। १२ ।।
आराधयंस्त्रिजगतां निग्रहानुग्रहक्षमम् । तत्रत्यं देशिकाधीशं नत्वा स्तुत्वा प्रय[2]त्नतः ।। १३ ।।
शृणोति शङ्कराचार्यचरितं लोकपूजितम् । यः पठेत्स भवे[3]ल्लोके पुत्रपौत्रादिसंपदः ।। १४ ।।
अपमृत्युमतीत्यैव दिक्पालैः सह मोदते । साध्वी सुवासिनी वाऽपि प्रातः स्नात्वा सरिज्जले ।। १५ ।।
यतिमाराध्य विधिवच्छृणुयाद्भक्तिसंयुता । साऽष्टौ तनूभवाँल्लब्ध्वा भुक्त्वा भोगान् बहूनसौ ।। १६ ।।
पत्या सहैव सायुज्यं शम्भोराप्नोति निश्चितम् । यत्राध्यायद्वयं वापि त्रितयं वा चतुष्टयम् ।। १७ ।।
विद्यार्थी यः पठेद्भक्त्या सर्ववित्स भवेत्क्षणात् । कन्यार्थी प्राप्नुयात्कन्यां पुत्रार्थी लभते सुतान् ।। १८ ।।
जीवग्राहं गृहीतो वा वैरिभिर्घातुकैरपि । गुरुचारित्र्यमध्ये तु श्लोकं श्लोकार्धमेव वा ।। १९ ।।
ध्यायन् शङ्करमेकाग्रचेतसा संस्मरेद्यदि । बिभ्यत्येनं ततो दृष्ट्वा हिंस्रा स्प्रष्टुं विनिश्चयः ।। २० ।।
कारागारे शृङ्खलया राज्ञा क्रुद्धेन यन्त्रितः । शङ्कराचार्यचरितमाद्यन्तं प्रपठेद्यदि ।। २१ ।।
गलन्ति शृङ्खलास्तूर्णमश्मसारविनिर्मिताः । राज्यभ्रष्टोऽथ वा राजा स्मरेद्यदि गुरोरिदम् ।। २२ ।।
चरितं सम्यगाद्यन्तं चक्रवर्ती स जायते । देवेष्विव महादेवो गिरिष्विव सुराचलः ।। २३ ।।
अब्धिष्विव सुधाम्भोधिर्ग्रहेष्विव दिवाकरः । तारकास्विव शीतांशुरहिष्विव च वासुकिः ।। २४ ।।
कामदोग्ध्रीवाऽर्जुनीषु लोहेष्वष्टापदं यथा । देशिकाख्येषु सर्वेषु श्रीमान् शङ्करदेशिकः ।। २५ ।।
साक्षान्मृत्युंजयो लोके तद्वृत्तं किमु वर्ण्यताम् । तस्मात्सर्वोन्नतस्याऽस्य चरितं यः पठेद्भुवि ।।२६।।
स एव सुकृती लोके तस्य जन्मैव सार्थकम् । अद्वैतमतमाश्रित्य धृत्वा भस्म त्रिपुण्ड्रकम् ।। २७ ।।
शृणोति न सकृद्वा यो द्विपाच्च पशुरेव सः । अतः प्रयतचित्तेन श्रोतव्यं हि तनूभृता ।। २८ ।।
निग्रहानुग्रहव्यग्रविग्रहोग्रसमाकृतेः । शङ्कराचार्यवर्यस्य चरितं भुवि पावनम् ।। २९ ।।
सकृद्वाऽप्यसकृद्वाऽपि जन्ममध्ये तु मानवः । पठेदवश्यतो भक्त्या शृणुयाद्वा कदाचन ।। ३० ।।
स सन्तरेद्भवाम्भोधिं दुस्तरं मलिनान्तरै[4]ः । शिवे भक्तिः परा यस्य शङ्कराचार्यदेशिके ।। ३१ ।।

---

1. रचयति सुजनः। (B)

1. श्रीचिद्विलासः। (B), (C) 2. च भक्तितः। (B), (C) 3. भजेत्। (B), (C) 4. °नाम्बरैः। (B), (C)

अद्वैतेऽपि मते श्रद्धा स सुखी स सुधीर्भुवि । अनेकजनुरायाततपःफलसमाश्रयात् ।। ३२ ।।
शङ्कराचार्यचरिते शुश्रूषा जायते नृणा[5]म् । तस्मान्मतमुपाश्रित्य दिव्यमद्वैतमुत्तमम् ।। ३३ ।।
शङ्कराचार्यपीठस्थं देशिकेन्द्रमनुत्तमम् । यो वा[6] निन्दति मूढात्मा स भवेद्भुवि पातकी ।। ३४ ।।
जन्ममध्ये सकृद्वापि शृणुयादिदमुत्तमम् । शङ्कराचार्यचरितं स एव सुकृती नरः ।। ३५ ।।
अस्मिन्विचारिते सम्यगजस्रमनुचिन्तनैः । जायते निर्मला प्रज्ञा पापजातं गलत्यतः ।। ३६ ।।
अद्वैतेऽपि मते भक्तिः समुदेति नृणामहो । हर एव परः साक्षाद्गुणातीतो निरञ्जनः ।। ३७ ।।
शङ्कराचार्यरूपेण समदृश्यत भूतले । ररक्ष रूक्षनेत्रत्वं विनैव परमेश्वरः ।। ३८ ।।
राजन्यो वाऽग्रजो वापि वैश्यो वा भक्तिसंयुतः । इदं चरित्रमाकर्ण्य मनोरथमवाप्नुयात् ।। ३९ ।।
पुरन्दरादिविबुधैर्भावितुं भक्तिसंयुतैः । शङ्कराचार्यचरितमिदमस्तु शुभावहम् ।। ४० ।।
आचन्द्रतारकस्थायी भवताज्जगतीतले । दत्तादनिशमिष्टान्नं श्रीमच्छङ्करदेशिकः ।। ४१ ।।
पठनाच्छ्रवणाद्वाऽपि लिखनाद्दानतोऽपि वा । सत्पात्रेभ्यो द्विजातिभ्यः श्रियमन्वहमश्नुते ।। ४२ ।।

इति श्रीमत्परमहंसपरिव्राजकाचार्यवर्यश्रीमच्छङ्करभगवत्पूज्यपादपयोजमरन्दनिष्यन्दास्वादतुन्दिलानन्दमिलिन्दायमानश्रीचिद्विलासयतीन्द्रविज्ञानकन्दतपोधनेन्द्रसंवादे शङ्करविजयविलासे द्वात्रिंशोऽध्यायः ।।

।।समाप्तमिदं चरितम् ।।

5. भुवम् । (B), (C)  6. विनि° । (B), (C)

# ĀCĀRYA ĪŚVARASENA: A HISTORICAL AND PHILOSOPHICAL STUDY

By
SHRINIVAS SHASTRI

The period extending from the fifth century to the tenth century A.D. is the most glorious one of Indian Philosophy. A number of well-known thinkers like Diṅnāga, Śaṅkara, Kumārila, Prabhākara, Maṇḍanamiśra, Dharmakīrti, Dharmottara, Vācaspatimiśra, Udayanācārya and others flourished during this period. Besides, there were some scholars whose names only have come down to us, but we do not know when and where they lived nor have we any information about their contribution to Indian Philosophy. Ācārya Īśvarasena is one such scholar. His works have not been discovered uptill now. There are, however, several references to him in a number of philosophical treatises. In the light of those references, we can get some idea of Īśvarasena and his contribution to Indian thought.

Arcaṭa or Dharmākaradatta, the author of the *Hetubindu-ṭīkā*, a commentary on Dharmakīrti's *Hetubindu*, refers to Īśvarasena frequently (vide, pp. 12, 167, 175, 176, 181 etc.); Durvekamiśra refers to him four times (pp. 259, 380, 393, 405) in the *Hetubindu-ṭīkāloka*, a commentary on the *Hetubindu-ṭīkā*. He also mentions Īśvarasena twice in the *Dharmottara-pradīpa*, a commentary on the *Nyāyabindu-ṭīkā* of Dharmottara (pp. 103, 108). Thus, it appears that Īśvarasena was a prominent Buddhist logician. Having flourished in the period between Diṅnāga, the great Buddhist logician, and Dharmakīrti, the greatest expositor of Diṅnāga system, he is found to have enjoyed a remarkable status in presenting Diṅnāga system. If it be so, numerous problems of Buddhist logic would remain unsolved in the absence of the study of Ācārya Īśvarasena.

Moreover, a study of Īśvarasena will throw a new light upon the various theories of Indian philosophy as a whole. No doubt, he was a Buddhist logician, but he agreed with the Vedic or Brāhminic logicians with regard to some logical doctrines. He criticized the views of Diṅnāga, who is supposed to be his teacher. For that reason the Buddhist authors sometimes refer to him as '*para*' (belonging to the other group).[1] Durveka miśra says that here *para* is no other than

1. *Hetubindu-Ṭīkā*, p. 12.